घोरशिवोऽपि मत्त इव मूर्च्छित इव दृढद्रुघणताडित इव महापिशाचनिष्पन्दीकृत इव मुषितसारावस्कर इव प्रियविरहमहाग्रहगृहीत इव दुष्टौषधपानप्रणष्टचित्तचेतन इव क्षणान्तरं स्थित्वा शिशिरमारुतेन समाश्वासितशरीरः स्तोकोपलब्धचेतनो मन्दमन्दमुन्मीलितलोचनयुगलो लज्जावशविसंस्थूलसर्वाङ्गोपाङ्गोऽतिदीनवदनो दीर्घमुच्छ्वस्य राजानमवलोकयितुं प्रवृत्तः, नरपतिनाऽपि दृढसंजातकरुणभावेन अतिदुखित एष इति उपलक्ष्य भणितो घोरशिवः-भो किमवलोकयसि ?, घोरशिवेन सगद्गदं भणितं-महाराज ! अवलोकयामि निजकर्मपरिणति विलसितं, राज्ञा भणितं-किमेवं सविषादं जल्पसि ? सर्वथा धीरो भव, परिहर दुरध्यवसायं, परित्यज कोपकण्डूं, विमुञ्च विजयाभिलाषम्, अनुसर प्रशमाभिरतिं, पिब करुणारसं, परिचिन्तय युक्तायुक्तं,

२

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir





समुज्झसु खुद्दजणोचियं वावारंति, अह समीहियत्थसिद्धी न जायत्ति तम्मसि ता गिण्हसु इमं परिकुवियकयंतजीहाकरालं नीलपहापडलसामलियसयलदिसिचक्कवालं मम करवालं, करेसु मम सरीरविणासणेण नियसमीहियसिद्धिं, जओ मुक्को मए संपयं पोरिसाभिमाणो तुह कज्जसाहणट्ठाएत्ति । अवि य—

अच्छउ तरंगभंगुरमसारगं नियसरीरयं दूरे । जीयंपि हु परहियकारणेण धारिंति सप्पुरिसा ॥ १ ॥
जं पुण पढमं चिय तुज्झ कारणे नो समप्पिओ अप्पा । विहिओ य झाणविग्घो एयं नणु कारणं तत्थ ॥ २ ॥
मम विरहे एस जणो एसो नीसेससाहुवग्गो य । धम्मब्भंसमवस्सं पाविस्सइ पावलोयाओ ॥ ३ ॥
इण्हिं तुह गुरु दुक्खं उवलक्खिय बद्धकक्खडसहावं । निरपेक्खं मज्झ मणो जायं सेसेसु कज्जेसु ॥ ४ ॥

---

समुज्झ क्षुद्रजनोचितं व्यापारमिति, अथ समीहितार्थसिद्धिर्नजातेति ताम्यसि, तदा गृहाण इमं परिकुपितकृतान्तजिह्वाकरालं नीलप्रभापटलश्यामलितसकलदिक्चक्रवालं मम करवालं, कुरु मम शरीरविनाशनेन निजसमीहितसिद्धिं, यतो मुक्तो मया साम्प्रतं पौरुषाभिमानस्तव कार्यसाधनार्थमिति । अपि च—

आस्तां तरङ्गभङ्गुरमसारकं निजशरीरकं दूरे । जीवितमपि हु परहितकारणेन धारयन्ति सत्पुरुषाः ॥ १ ॥
यत्पुनः प्रथममेव तव कारणे न समर्पित आत्मा । विहितश्च ध्यानविघ्न एतन्ननु कारणं तत्र ॥ २ ॥
मम विरहे एष जन एष निःशेषसाधुवर्गश्च । धर्मभ्रंशमवश्यं प्राप्स्यति पापलोकात् ॥ ३ ॥
इदानीं तव गुरु दुःखमुपलक्ष्य बद्धकर्कशस्वभावम् । निरपेक्षं मम मनो जातं शेषेषु कार्येषु ॥ ४ ॥



For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir





घोरसिवेण भणियं-महाभाग ! मा एवमुल्लवेसु, जीवसु तुमं मज्जीविएणावि जाव जलहिकुलसेलससितारयदिवायरे, पसीयसु मे, वियरसु एक्कं पसायंति, राइणा भणियं-किमेवं वाहरसि ?, जीवियदाणाओऽवि किमवरमदेयं ? ता असंभंतो पत्थेसु, घोरसिवेण भणियं-जइ एवं ता अणुजाणसु मम एयंमि पज्जलंतजालासहस्सकवलियसलभकुलसंकुले मिसिमिसंतद्ध-दड्ढकलेवरुच्छलंतविस्सगंधुद्धुरे मसाणहुयासणे पवेसुज्जमं, हवसु धम्मबंधवो, नन्नहा मे पुव्वविहियमहापावपव्वयक्कंतस्स अवस्सं विस्सामो भविस्सइत्ति, रण्णा भणियं-कुओ तुह पुव्वं पावसंभवो ?, जओ कयाइं तुमए विविहाइं तवचरणाइं आपूरियाइं पावभक्खणदक्खाइं मंतज्झाणाइं पूइयाइं देवक्कमकमलाइं निव्वत्तियाइं वेयरहस्सज्झयणाइं उवासिओ गुरुजणो पवट्टिया धम्म-मग्गेसु पाणिणो, ता न सव्वहा वोत्तुमवि जुत्तमेयं भवारिसाणं, घोरसिवेण भणियं-महाराय ! अलमलं मम पासंडिचंडालस्स

---

घोरशिवेन भणितम्-महाभाग ! मैवमुल्लप, जीव त्वं मम जीवितेनापि यावज्जलधिकुलशैलशशितारकदिवाकरान्, प्रसीद मयि-वितर एकं प्रसादमिति । राज्ञा भणितम्-किमेवं व्याहरसि ? जीवितदानादपि किमपरमदेयं ? तस्मादसम्भ्रान्तः प्रार्थय । घोरशिवेन भणितम्-यद्येवं तर्हि अनुजानीहि ममैतस्मिन् प्रज्वलज्ज्वालासहस्रकवलितशलभकुलसङ्कुले दीप्यमानार्धदग्धकलेवरोच्छलद्विस्रगन्धोद्धुरे श्मशानहुताशने प्रवेशोद्यमं, भव धर्मबन्धुः, नान्यथा मे पूर्वविहितमहापापपर्वताऽऽक्रान्तस्यावश्यं विश्रामो भविष्यतीति, राज्ञा भणितम्-कुतस्तव पूर्वं पापसम्भवः ? यतः कृतानि त्वया विविधानि तपश्चरणानि, आपूरितानि पापभक्षणदक्षाणि मन्त्रध्यानानि, पूजितानि देवक्रमकमलानि, निवर्तितानि वेदरहस्याध्ययनानि, उपासितो गुरुजनः, प्रवर्तिता धर्ममार्गेषु प्राणिनः, तस्मान्न सर्वथा वक्तुमपि युक्तमेतद् भवादृशानाम् । घोरशिवेन भणितम्-महाराज ! अलमलं मम पाषण्डिचाण्डालस्य



For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir





वीसत्थघाइणो पयडियविचित्तकूडकवडस्स दक्खिन्नरहियस्स निसायरस्सेव निक्करुणस्स, किंपागतरुफलस्सेव बाहिरमेत्तरमणीयस्स बगस्सेव सुसंजमियपाणिप्पायप्पयारस्स भुयंगमस्सेव परच्छिद्दावलोयणनिरयस्स दुज्जणस्सेव मुहमहुरभासिणो संकित्तणेणं, एवं च सव्वहा विरत्तोऽम्हि पावपंकपडिहत्थाओ नियकडेवराओ, नेव य अन्नो पावविसोहणोवाओ, राइणा भणियं–भो भो किमेवं पुणो पुणो अत्ताणं अत्ताणं व पुरिसं दूसेसि ?, पयडक्खरं निवेएसु नियपुव्ववित्तंतं, घोरसिवेण भणियं–महाराय ! गरुओ एस वुत्तंतो, राइणा भणियं–किमजुत्तं ?, साहेसु, घोरसिवेण भणियं–जइ एवं ता निसामेहि—

अत्थि सुरसरितुसारपवित्तपरिसरुद्देसं विविहावणभवणमालाविभूसियं समूसियसियवेजयंतीरेहंतसुरमंदिरसिहरं सिरिभवणं नाम नयरं, तत्थ य पयंडमायंडमंडलुद्दामपयावपरिसोसियविपक्खजलासओ अणेगसमरवावारविढत्तजसो अवंतिसेणो नाम

---

विश्वस्तघातिनः प्रकटितविचित्रकूटकपटस्य दाक्षिण्यरहितस्य निशाचरस्येव निष्करुणस्य, किम्पाकतरुफलस्येव बहिर्मात्ररमणीयस्य बकस्येव सुसंयमितपाणिपादप्रकारस्य भुजङ्गमस्येव परच्छिद्रावलोकननिरतस्य दुर्जनस्येव मुखमधुरभाषिणः संकीर्तनेन, एवं च सर्वथा विरक्तोऽस्मि पापपङ्कपूर्णान्निजकलेवरात्, नैव चान्यः पापविशोधनोपायः, राज्ञा भणितम्–भो भो किमेवं पुनः पुनरात्मानमत्राणमिव पुरुषं दूषयसे ? प्रकटाक्षरं निवेदय निजपूर्ववृत्तान्तं, घोरशिवेनभणितम्–महाराज ! गरुक एष वृत्तान्तः, राज्ञा भणितम्–किमयुक्तम् ? कथय, घोरशिवेन भणितम्–यद्येवं तर्हि निशमय—

अस्ति सुरसुरित्तुषारपवित्रपरिसरोद्देशं विविधाऽऽपणभवनमालाविभूषितं समुच्छ्रितसितवैजयन्तीराजमानसुरमन्दिरशिखरं श्रीभवनं नाम नगरम्, तत्र च प्रचण्डमार्तण्डमण्डलोद्दामप्रतापपरिशोषितविपक्षजलाशयोऽनेकसमरव्यापारार्जितयशा अवन्तिसेनो नाम



For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



राया अहेसि, जस्स विजयजत्तापत्थियस्स पत्थिवसहस्साणुगम्ममाणमग्गस्स उद्दंडपुंडरीयपंडुरच्छत्तच्छाइयगयणाभोगा नट्ठदिवसावगासव्व सोहंति दस दिसाभागा, जस्स य गज्जंतमत्तकुंजरगंडत्थलगलंतनिरंतरमयजलासारजायदुद्दिणंधयारभीयाभिसारियव्व अणुसरइ कवाडवियडं वच्छत्थलं रायलच्छी, जस्स चउव्विहाउज्जघोरघोसं मेहोहरसियंपिव सोऊण दूरं पलायंति रायहंसा, जस्स समरंगणेसु रोसारुणाओ पडिसुहडेसु पडिबिंबियाओ पप्फुल्लसुकुमारकरवीरकुसुममालाउव्व रेहिंति दिट्ठीओ, तस्स य नियरूवलावन्नजोव्वणगुणावगणियरइप्पवायाओ नीसेसपणइणीपहाणाओ दुवे भारियाओ अहेसि, पत्तलेहा मणोरमा य, पढमाए जाओ अहमेक्को पुत्तो वीरसेणो नाम, बियाए पुण विजयसेणोत्ति, गाहिया दोऽवि अम्हे धणुव्वेयपरमत्थं कुसलीकया चित्तपत्तच्छेयविणोएसु सिक्खविया य खेडयखग्गगुणवणियं जाणाविया महल्लजुद्धं, किं बहुणा ?, मुणाविया सव्व-

राजाऽऽसीत्, यस्य विजययात्राप्रस्थितस्य पार्थिवसहस्रानुगम्यमानमार्गस्य उद्दण्डपुण्डरीकपाण्डुरच्छत्रच्छादितगगनाभोगा नष्टदिवसावकाश इव शोभन्ते दश दिशाभागाः, यस्य च गर्जन्मत्तकुञ्जरगण्डस्थलगलन्निरन्तरमदजलाऽऽसारजातदुर्दिनान्धकारभीताभिसारिका इवानुसरति कपाटविकटं वक्षःस्थलं राजलक्ष्मीः, यस्य चतुर्विधातोद्यघोरघोषं मेघौघरसितमिव श्रुत्वा दूरं पलायन्ते राजहंसाः, यस्य समराङ्गणेषु रोषारुणाः प्रतिसुभटेषु प्रतिबिम्बिताः प्रफुल्लसुकुमारकरवीरकुसुममाला इव राजन्ति दृष्टयः, तस्य च, निजरूपलावण्ययौवनगुणावगणितरतिप्रवादे निःशेषप्रणयिनीप्रधाने द्वे भार्ये आस्ताम् पत्रलेखा मनोरमा च, प्रथमाया जातोऽहमेकः पुत्रो वीरसेनो नाम, द्वितीयायाः पुनर्विजयसेन इति, ग्राहितौ द्वावपि आवां धनुर्वेदपरमार्थं, कुशलीकृतौ चित्रपत्रच्छेदविनोदेषु, शिक्षितौ च खेटकखड्गगुणवर्ंनितं, ज्ञापितौ मल्ल[महा]युद्धं, किं बहुना ज्ञापितौ सर्व-

१ खेटकाद्याघातम् ।

घोरशिवपूर्ववृत्तान्ते-स्वपितुरवन्तिसेन-नृप-स्वरूपम् ॥



For Private and Personal Use Only

कलाकलावं, अन्नया य उचिओत्ति परिचिंतिय ठाविओऽहं ताएण जुवरायपए, दिन्ना य मज्झ लाडचोडमरहट्ठसोरट्ठपमुहा देसा कुमारभुत्तीए, परिपालेमि जुवरायत्तणं, ममंपि अणुमग्गमणुसरइ सुहडाडोवसंकुडा पगलंतगंडत्थला दप्पुद्धुरसिंधुरघडा, ममावि मग्गओ धावंति तरलतरतुरंगपहकरा, मज्झंपि परसुसेल्लचंडगंडीवसरविसरकुंतगयापहरणहत्थाइं वित्थरंति चउदिसिंपि पुरिसबलाइंति, दुइयस्सवि मज्झ सवत्तभाउणो दिन्नाइं ताएण कइवयगामसयाइं, एवं च विसयसुहमणुहवंताणं वच्चंति वासरा ।

अण्णया खणविपरिणामधम्मयाए जीवलोयविलसियाणं पइसमयविणासीलयाए आउयकम्मदलियाणं अप्पडिहयसासण-त्तणओ जममहारायस्स सुरिंदचावचवलयाए पियजणसंपओगसमुब्भवसुहस्स पाविओ अवंतिसेणराया पंचत्तंति, कयंमि य तम्मयकिच्चे मंतिसामंतसरीररक्खप्पामोक्खपहाणलोएण निवेसिओऽहं रायपए, पयट्टियाइं मए तायस्स सग्गंगयस्स कएण

---

कलाकलापम्, अन्यदा च उचित इति परिचिन्त्य स्थापितोऽहं तातेन युवराजपदे, दत्ताश्च मह्यं लाटचौडमहाराष्ट्रसौराष्ट्रप्रमुखा देशाः कुमारभुक्त्यै, परिपालयामि युवराजत्वं, ममापि अनुमार्गमनुसरति सुभटाटोपसङ्कुला प्रगलद्गण्डस्थला दर्पोध्धुरसिन्धुरघटा, ममापि पृष्ठतो धावन्ति तरलतरतुरङ्गपहकराः, ममापि परशुसेल्लचण्डगाण्डीवशरविसरकुन्तगदाप्रहणहस्तानि विस्तरन्ति चतुर्दिक्ष्वपि पुरुषबलानीति, द्वितीयस्यापि मम सपत्नभ्रात्रे दत्ता तातेन कतिपयग्रामशतानि, एवं च विषयसुखमनुभवतो व्रजन्ति वासराः ।

अन्यदा क्षणविपरिणामधर्मत्वेन जीवलोकविलसितानां प्रतिसमयविनाशशीलत्वेन आयुःकर्मदलिकानामप्रतिहतशासनत्वाद् यम-राजस्य, सुरेन्द्रचापचपलत्वेन प्रियजनसम्प्रयोगसमुद्भवसुखस्य प्राप्तोऽवन्तिसेनराजः पञ्चत्वमिति, कृते च तन्मृतकृत्ये मन्त्रिसामन्त-शरीररक्षप्रमुखप्रधानलोकेन निवेशितोऽहं राजपदे, प्रवर्तितानि मया तातस्य स्वर्गङ्गतस्य कृतेन

वीरसेन-युवराज-पदारोपणं नृपस्य परलोक-गमनश्च ॥



For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir





तडियकप्पडियदीणाणाहाणिस्सियविदेसियजणाण महादाणाइं काराविंयाइं उत्तुंगसिंगसुंदराइं देवमंदिराइं निरूवियाइं अवारियसत्ताइं, कालक्कमेण य विगओ मम सोगो, वसीकयं सामंतचक्कं, निव्वासिया नियमंडलविलुंपगा पयट्टिओ पुव्वपुरिसमग्गो । अन्नया य—

सियसिंधुरखंधगओ विलयाजणधुव्वमाणसियचमरो । धरियधवलायवत्तो किंकरनरनियरपरियरिओ ॥ १ ॥

उम्मग्गपयट्टुद्दामतुरयवट्टुक्खउद्धयरओहो । नयराओ निग्गओहं वणलच्छीपेच्छणट्ठाए ॥ २ ॥

जाव य तत्थ पेच्छामि पुप्फफलसमिद्धबंधुरं तरुणतरुगणं परिब्भमामि माहवीलयाहरेसु अवलोएमि कयलीदलाणं रुंदत्तणं निरिक्खामि संपिंडियससिखंडपंडुरं केयइपत्तसंचयं अग्घाएमि अणग्घबउलमालियासुरहिपरिमलं करेमि करतलेण

---

तटिककार्पटिकदीनानाथानिश्रितवैदेशिकजनेभ्यः महादानानि, कारितानि उत्तुङ्गशृङ्गसुन्दराणि देवमन्दिराणि, निरूपितान्यवारितसत्त्वानि, कालक्रमेण च विगतो मम शोकः, वशीकृतं सामन्तचक्रं, निर्वासिता निजमण्डलविलुम्पकाः, प्रवर्तितः पूर्वपुरुषमार्गः । अन्यदा च—

सितसिन्धुरस्कन्धगतो वनिताजनधूयमान सितचामरः । धृतधवलातपत्रः किङ्करनरनिकरपरिकरितः ॥ १ ॥

उन्मार्गप्रवृत्तोद्दामतुरगघटोत्क्षतोद्धृतरजओघः । नगरान्निर्गतोऽहं वनलक्ष्मीप्रेक्षणार्थम् ॥ २ ॥

यावच्च तत्र प्रेक्षे पुष्पफलसमृद्धबन्धुरं तरुणतरुगणं, परिभ्रमामि माधवीलतागृहेषु, अवलोकयामि कदलीदलानां रुन्दत्वं निरीक्षे संपिण्डितशशिखण्डपाण्डुरं केतकीपत्रसञ्चयं, जिघ्रामि अनर्घ्यबहुलमालिकासुरभिपरिमलं, करोमि करतलेन सौरभभरलोभ

For Private and Personal Use Only

सोरभभरलोभमिलंतरणज्झणंतफुल्लंधयरिंछोलिलिहिज्जमाणमयरंदं नवसहयारीमंजरीपुंजं ताव सहसच्चिय सुणेमि नियपरियणकलयलं । कहं ?—

सामी ! पेच्छह गयणंगणंमि कह वट्टए महाजुज्झं ? । सज्झसकरमइभीमं सुराण विज्जाहराणं वा ॥ १ ॥

एवं सोच्चा मएवि उत्ताणीकयानिमेसलोयणेण उड्ढमवलोयमाणेण दिट्ठा विविहप्पयारेहिं जुज्झमाणा गयणंमि विज्जाहरा, ते य एवं जुज्झंति—

सियभल्लयसवलसिल्लसूल अवरोप्परु मेल्लहिं भिंडिमाल । वंचावहि तक्खणि लद्धरक्खु पुण पहरह जय जस सवपक्ख ?

खणु निट्ठुरमुट्ठिहिं उट्ठियंति, खणु पच्छिमभागमणुव्वयंति ।

खणु जणगजणणि गालीउ देंति, खणु नियसोंडीरिम कित्तयंति ॥ २ ॥

---

मिलद्रणज्झणत्पुष्पन्धयरिञ्छोलिलिह्यमानमकरन्दं नवसहकारमञ्जरीपुञ्जं तावत् सहसैव शृणोमि निजपरिजनकलकलम् । कथम् ?

स्वामिन् ! प्रेक्षस्व गगनाङ्गणे कथं वर्तते महायुद्धम् । साध्वसकरमतिभीमं सुराणां विद्याधराणां वा ॥ १ ॥

एवं श्रुत्वा मयाऽपि उत्तानीकृतानिमेषलोचनेन, ऊर्ध्वमवलोकमानेन दृष्टा विविधप्रकारैर्युध्यमाना गगने विद्याधराः, ते चैवं युध्यन्ते—

शितभल्लकसर्वेलसिल्लशूलान् परस्परं मुक्तभिन्दिपालान् । वञ्चयन्ति तत्क्षणं लब्धरक्षाः पुनः प्रहरन्ति जययशः सर्वपक्षाः ॥१॥

क्षणे निष्ठुरमुष्टिभिरुत्तिष्ठन्ति, क्षणे पश्चिमभागमनुव्रजन्ति । क्षणे जनकजननीनां गालीर्ददति क्षणे निजशौण्डीर्यं कीर्तयन्ति ॥२॥



For Private and Personal Use Only

अच्छी निमीलियसुय रहिं चिर साहिय विजयविज्ज, उणु खणे खणे जायहिं जुज्झसज्ज ।
अविगणिय मरण रणरसियचित्त, भुयदंडमहाबलमयविलित्त ॥ ३ ॥
इय तेसिं खयराणं परोप्परं जुज्झिराणमेक्केणं । लद्धूण छलं अन्नो पहओ गुरुमोग्गरेण सिरे ॥ ४ ॥
पडिओ धरणीवट्ठे मम्मंतिए विगयचेयणो सो य । मुच्छानिमीलियच्छो विच्छाओ छिन्नरुक्खोव ॥ ५ ॥

एत्थंतरे तयणुमग्गेण चेव कड्ढियनिसियखग्गो पधाविओ इयरो विज्जाहरो तस्स वहनिमित्तं, मुणिओ य मए जहा एसो एयस्स विणासणकए एतित्ति, तओ मए भणिया सद्दवेहिणो धाणुहिया अंगरक्खा य, जहा—

रे रे रक्खह एयं भूमीतलनिवडियं महाभागं । एयं विणासणुज्जुयमित्तं खयरं पडिक्खलह ॥ १ ॥

---

अक्षिणी निमील्य स्वपन्ति चिरसाधितविजयविद्याः, पुनः क्षणे क्षणे जायन्ते युद्धसज्जाः ।
अविगणय्य मरणं रणरसिकचित्ताः । भुजदण्डमहाबलमदविलिप्ताः ॥ ३ ॥
इति तेषां खेचराणां, परस्परं युद्धमानानामेकेन । लब्ध्वा छलमन्यः प्रहतो गुरुमुद्गरेण शिरसि ॥ ४ ॥
पतितो धरणीपृष्ठे, ममान्तिके विगतचेतनः स च । मूर्च्छानिमीलिताक्षो, विच्छायश्छिन्नवृक्ष इव ॥ ५ ॥

अत्रान्तरे तदनुमार्गेणैव कृष्टनिशितखड्गः प्रधावित इतरो विद्याधरस्तस्य वधनिमित्तं, ज्ञातश्च मया यथैष एतस्य विनाशनकृते एतीति, ततो मया भणिताः शब्दवेधिनो धानुष्का अङ्गरक्षकाश्च, यथा—

रे रे रक्षत एनं भूमितलनिपतितं महाभागम् । एतं विनाशनोद्यतमानं खचरं प्रतिस्खलत ॥ १ ॥



For Private and Personal Use Only

असिखेडयहत्थेहिं तस्संगं छाइयं वरभडेहिं । ओगासमलभमाणो रुद्धो खयरो तओ भणइ ॥ २ ॥
हे भो नरिंद ! मुंचसु एयं खयराहमं मम वहट्ठा । एसो खु मज्झ वइरी विणासियव्वो मएऽवस्सं ॥ ३ ॥
भणिओ य मए खयरो किं पलवसि तं पिसायगहिओव्व । किं एस खत्तधम्मो ? जेणेवमहं करेमित्ति ॥ ४ ॥
किं चावरद्धमिमिणा जेणेयं मारिउं समीहेसि । सो भणइ एस मम दारभोगरसिओत्ति ता हणिमो ॥ ५ ॥
ताहे मए स भणिओ साहू इयरो व होउ नऽप्पेमि । सरणागयरक्खणलक्खणं च राईण खत्तवयं ॥ ६ ॥
उब्बद्धभिउडिभंगो रोसारुणनयणजुयलदुप्पेच्छो । फरुसक्खरेहिं खयरो ताहे मं भणिउमाढत्तो ॥ ७ ॥
रे रे दुट्ठनराहिव ! मा बोहसु केसरिं सुहपसुत्तं । दिट्ठीविसाहितुंडं कंडूयसु मा करग्गेण ॥ ८ ॥

---

असिखेटकहस्तैस्तस्याङ्गं छादितं वरभटैः । अवकाशमलभमानो रुद्धः खचरस्ततो भणति ॥ २ ॥
हे भो नरेन्द्र ! मुञ्च एतं खचराधमं मम वधार्थम् । एष खु मम वैरी विनाशयितव्यो मयाऽवश्यम् ॥ ३ ॥
भणितश्च मया खचरः किं प्रलपसि त्वं पिशाचगृहीत इव । किमेष क्षत्रधर्मो येनैवमहं करोमीति ॥ ४ ॥
किं चापराद्धमनेन येनैतं मारयितुं समीहसे । स भणति एष मम दारभोगरसिक इति तस्माद् हन्मः ॥ ५ ॥
तदा मया स भणितः साधुः, इतरो वा भवतु नार्पयामि । शरणागतरक्षणलक्षणं च राज्ञां क्षत्रव्रतम् ॥ ६ ॥
उद्बद्धभृकुटिभङ्गो रोषारुणनयनयुगलदुष्प्रेक्षः । परुषाक्षरैः खचरस्तदा मां भणितुमारब्धः ॥ ७ ॥
रे रे दुष्टनराधिप ! मा बोधय केसरिणं सुखप्रसुप्तम् । दृष्टिविषाहितुण्डं कण्डूयस्व मा कराग्रेण ॥ ८ ॥



For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir





जालालिभीममग्गिं अवक्कमसु य मा तुमं पयंगोव्व । जइ वंछसि चिरकालं रज्जं काउं महियलंमि । ९ ॥
भणिओ य मए एसो किं रे वाहरसि मुक्कमज्जाय ! । सप्पुरिसमग्गलग्गस्स मज्झ जं होइ तं होउ ॥ १० ॥
चिरकालजीविएणवि पेरंतेऽवस्समेव मरियव्वं । ता अवसर दिट्ठिपहाओ कुणसु जं तुज्झ पडिहाइ ॥ ११ ॥
जइ एवं ता विहिणो मा दाहिसि दूसणं तुमं राय ! इय भणिऊण सरोसो खयरो सो गयणमुप्पइओ ॥ १२ ॥

तयणंतरं मए निरूविओ सो भूमितलनिवडिओ विज्जाहरो जाव अज्जवि सजीवो ताहे काराविया चंदणरसच्छडापहाणा सिसिरोवयारा संवाहियाइं सरीरसंवाहणनिउणेहिं पुरिसेहिं सव्वंगाइं, खणंतरेण लद्धा तेण चेयणा उम्मीलियं नयणनलिणं अवलोइयं दिसिमंडलं आलविओ पासवत्ती परियणो–भो भो महायस ! कहमहमिह महीवट्ठे निवडिओ ?, कत्थ वा वेरिविज्जाहरो !,

---

ज्वालालिभीममग्निमवक्राम च मा त्वं पतङ्ग इव । यदि वाञ्छसि चिरकालं राज्यं कर्तुं महीतले ॥ ९ ॥
भणितश्च मयैष किं रे व्याहरसि मुक्तमर्याद: । सत्पुरुषमार्गलग्नस्य मम यद्भवति तद्भवतु ॥ १० ॥
चिरकालजीवितेनापि पर्यन्तेऽवश्यमेव मर्तव्यम् । तस्मादपसर दृष्टिपथात् कुरुष्व यत्तुभ्यं प्रतिभाति ॥ ११ ॥
यद्येवं तर्हि विधेर्मा दास्यसि दूषणं त्वं राजन् ! । इति भणित्वा सरोषः खचरः स गगनमुत्पतितः ॥ १२ ॥

तदनन्तरं मया निरूपितः स भूमितलनिपतितो विद्याधरो यावदद्यापि सजीवस्तदा कारिताश्चन्दनच्छटाप्रधानाः शिशिरोपचाराः, संवाहितानि शरीरसंवाहननिपुणैः पुरुषैः सर्वाङ्गानि, क्षणान्तरेण लब्धा तेन चेतना, उन्मीलितं नयननलिनम्, अवलोकितं दिङ्मण्डलम्, आलपितः पार्श्ववर्ती परिजनः–भो भो महायशः ! कथमहमिह महीपृष्ठे निपतितः ? कुत्र वा वैरीविद्याधरः ?,



For Private and Personal Use Only

को वा एस देसो ?, किंणामं इमं नयरं ? को वा एसो छत्तच्छायानिवारियरविकरपसरो परिचलंतधवलचामरजुयलो मज्झकए नरनियरं वावारिंतो पुरो संठिओ चिट्ठइ महायसो नराहिवइत्ति ?, इमं च सोच्चा निवेइयं से परियणेण गयणपडणाओ आरब्भ सव्वं जहाविचत्तंति । तओ सो खयरो दीहं नीससिय मम पच्चासन्ने ठाऊण जोडिय करसंपुडं विन्नविउ-माढत्तो–महाभाग ! धन्ना सा महिमहिला जीसे तं पई, कयलक्खणा इमे भिच्चा सेवंति जे तुह चरणकमलं, धन्ना ते सुहडा जे तुह कज्जे तणं व नवि गणंति नियजीवियं, अहो ते परोवयारित्तणं अहो सप्पुरिसकम्माणुवत्तित्तणं अहो नियकज्जनिरवेक्खया अहो सरणागयवच्छलत्तणं, न सव्वहा मम मणागंपि पीडमुप्पाएइ सत्तुपराभवो जं तुमं सयमेव पुरिसरयणभूओ दिट्ठोसि, मए भणियं–महाभाग ! अणवेक्खियजुत्ताजुत्तवियारो हयविही जं तुम्हारिसाणवि निवडंति एरिसीओ आवयाओ, अणणु-

को वा एष देशः ? किं नाम इदं नगरं ? को वैष छत्रच्छायानिवारितरविकरप्रसरः परिचलद्धवलचामरयुगलो मम कृते नरनिकरं व्यापारयन् पुरः संस्थितस्तिष्ठति महायशा नराधिप इति । इदं च श्रुत्वा निवेदितं तस्य परिजनेन गगनपतनादारभ्य सर्वं यथावृत्तमिति । ततः स खचरो दीर्घं निःश्वस्य मम प्रत्यासन्ने स्थित्वा योजयित्वा करसम्पुटं विज्ञपयितुमारब्धः–महाभाग ! धन्या सा महीमहिला यस्यास्त्वं पतिः, कृतलक्षणा इमे भृत्याः सेवन्ते ये तव चरणकमलं, धन्यास्ते सुभटा ये तव कार्ये तृणमिव नापि गणयन्ति निजजीवितम्, अहो तव परोपकारित्वम्, अहो सत्पुरुषानुवर्तित्वम्, अहो निजकार्यनिरपेक्षता, अहो शरणागतवत्सलत्वं, न सर्वथा मम मनागपि पीडामुत्पादयति शत्रुपराभवो यत्त्वं स्वयमेव पुरुषरत्नभूतो दृष्टोऽसि, मया भणितं–महाभाग ! अनपेक्षितयुक्तायुक्तविचारो हतविधिर्यद् युष्मादृशानपि निपतन्ति ईदृश्य आपदः, अननु-

भूमितल-पतित विद्याधरस्य इतस्ततोऽवलोकनं तथा-स्वजना-ख्यातं पूर्व-वृत्तम् ॥



For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir





भूयपुव्वमवि पावंति विसमं दसाविवागं, सव्वहा असरिसमिमं जेण न कयाइं रंभाथंभो सहइ मत्तमायंगगंडयलकंडूवुच्छेयं, (न रेहइ जुज्झमाणो मुणालतंतू) पासंमि, को पुण साहेसु एत्थ वइयरो ?, खयरेण भणियं-किमेत्थ कहियव्वं ?, पच्चक्खमेव दिट्ठं महाणुभागेणं, मए भणियं-सम्मं निवेएसु, खयरेण भणियं-जइ कोऊहलं ता निसामेसु—

कलहोयकूलकोडीविराइओ रयणकोडिविच्छुरिओ । वेयड्ढगिरी तुमएवि निसुणिओ भरहखेत्तंमि ॥ १ ॥
सुरसिद्धजक्खरक्खसकिंनरकिंपुरिसमिहुणरमणिज्जो । सुरहिवरकुसुमतरुसंडमंडिउद्दामदिसिनिवहो ॥ २ ॥
विज्जाहररमणीजणरमणीयं विजियसव्वपुरसोहं । तत्थऽत्थि गयणवल्लभनयरं नामेण सुपसिद्धं ॥ ३ ॥
तत्थ य राया निवसइ समग्गविज्जासहस्सबलकलिओ । पणमंतखयरमणिमउडकिरीडटिविडिक्कियग्गकमो ॥ ४ ॥

---

भूतपूर्वमपि प्राप्नुवन्ति विषमं दशाविपाकं, सर्वथाऽसदृशमिदं येन न कदाचिद् रम्भास्तम्भः सहते मत्तमातङ्गगण्डस्थलकण्डू-व्युच्छेदं [ न राजते युध्यमानो मृणालतन्तुः ] पार्श्वे कः पुनः कथयात्र व्यतिकरः ? खचरेण भणितम्-किमत्र कथयितव्यम् ? प्रत्यक्षमेव दृष्टं महानुभागेन, मया भणितम्-सम्यग् निवेदय खचरेण भणितं-यदि कुतूहलं तर्हि निशमय—

कलधौतकुलकोटिविराजितो रत्नकोटिविच्छुरितः । वैताढ्यगिरिस्त्वयाऽपि निश्रुतो भरतक्षेत्रे ॥ १ ॥
सुरसिद्धयक्षराक्षसकिन्नरकिंपुरुषमिथुनरमणीयः । सुरभिवरकुसुमतरुषण्डमण्डितोद्दामदिग्निवहः ॥ २ ॥
विद्याधररमणीजनरमणीयं विजितसर्वपुरशोभम् । तत्रास्ति गगनवल्लभनगरं नाम्ना सुप्रसिद्धम् ॥ ३ ॥
तत्र च राजा निवसति समग्रविद्यासहस्रबलकलितः । प्रणमत्खचरमणिमुकुटकिरीटमण्डिताग्रक्रमः ॥ ४ ॥





For Private and Personal Use Only

नियबलतुलियाखंडलपरक्कमो गुरुपयावहयसत्तू । तिहुयणविक्खायजसो नामेणं विजयराओत्ति ॥ ५ ॥
रूवाइगुणसमिद्धाए तस्स भज्जाए हिययदइयाएँ । कंतिमईए पुत्तत्तणेण जाओ अहं एक्को ॥ ६ ॥
पकओ पुरे पमोओ मह जम्मे तत्थ खयरराएणं । करिणो मोत्तूण परे विमोइया बंधणेहिंतो ॥ ७ ॥
अह सुपसत्थंमि दिणे सम्माणिय पणइसयणगुरुवग्गं । जयसेहरोत्ति नामं ठवियं मम गुरुजणेणंति ॥ ८ ॥
गयणंगणपरिसक्कणपमोक्खविज्जाओ ँ गाहिओ अहयं । अह तरुणभावपत्तो गुरूहिं परिणाविओ भज्जं ॥ ९ ॥
पउमावइत्ति नामेण पवरविज्जाहरिंदकुलजायं । रूवाइगुणगणेणं विजयपडायंव कामस्स ॥ १० ॥ जुम्मं ।
एस पुण वइरिखयरो रहनेउरचक्कवालपुरपहुणो । सिरिसमरसिंहनामस्स अत्तओ अमरतेओत्ति ॥ ११ ॥

---

निजबलतुलिताखण्डलपराक्रमो गुरुप्रतापहतशत्रुः । त्रिभुवनविख्यातयशा नाम्ना विजयराज इति ॥ ५ ॥
रूपादिगुणसमृद्धयास्तस्य भार्याया हृदयदयितायाः । कान्तिमत्याः पुत्रत्वेन जातोऽहमेकः ॥ ६ ॥
प्रकृतः पुरे प्रमोदो मम जन्मनि तत्र खचरराजेन । करिणो मुक्त्वा परे विमोचिता बन्धनेभ्यः ॥ ७ ॥
अथ सुप्रशस्ते दिने संमान्य प्रणयिस्वजनगुरुवर्गम् । जयशेखर इति नाम स्थापितं मम गुरुजनेनेति ॥ ८ ॥
गगनाङ्गणपरिभ्रमणप्रमुखविद्या ग्राहितोऽहम् । अथ तरुणभावप्राप्तो गुरुभिः परिणायितो भार्याम् ॥ ९ ॥
पद्मावतीति नाम्ना प्रवरविद्याधरेन्द्रकुलजाताम् । रूपादिगुणगणेन विजयपताकामिव कामस्य ॥ १० ॥ [युग्मम्]
एष पुनर्वैरी खचरो रथनूपुरचक्रवालपुरप्रभोः । श्रीसमरसिंहनाम्न आत्मजोऽमरतेज इति ॥ ११ ॥



For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir





वालवयस्सो मम गाढरूढपेमाणुबंधसव्वस्सो । विस्सासपयं सव्वेसु पुच्छणिज्जो य कज्जेसु ॥ १२ ॥
सहसयणपाणभोयणचंकमणट्ठाणकरणनिरयाणं । अम्हं दोण्हवि कालो वोलइ दढमेक्कचित्ताणं ॥ १३ ॥
अह परियणेण मज्झं निवेइयं एगया रहट्ठाणे । जह एस तुज्झ मित्तो विरूवचारी कलत्तंमि ॥ १४ ॥
असद्दहणाओ मए स परियणो वारिओ खरगिराहिं । अघडंतमेवमन्नं न भासियव्वं मह पुरोत्ति ॥ १५ ॥
सयमवि दिट्ठं जं जुत्तिसंगयं तं वयंति सप्पुरिसा । सहसत्ति भासियाइं पच्छाऽपत्थंव बाहिंति ॥ १६ ॥
रविकरपसरोव्व जणे घणपडलच्छाइओऽवि विप्फुरिओ । अह एस वइयरो गोविओऽवि पणयाणुरोहेण ॥ १७ ॥
रायभवणाओ सगिहंमि एगया आगओऽम्हि पेच्छामि । सयमेव तं कुमित्तं अणज्जकज्जंमि आसत्तं ॥ १८ ॥

---

बालवयस्यो मम गाढरूढप्रेमानुबन्धसर्वस्वः । विश्वासपदं सर्वेषु प्रच्छनीयश्च कार्येषु ॥ १२ ॥
सहशयनपानभोजनचङ्क्रमणस्थानकरणनिरतयोः । आवयोर्द्वयोरपि कालोऽतिक्रामति दृढमेकचित्तयोः ॥ १३ ॥
अथ परिजनेन मम निवेदितमेकदा रहस्स्थाने । यथैष तव मित्रं विरूपचारि कलत्रे ॥ १४ ॥
अश्रद्दधानेन मया स परिजनो वारितः खरगीर्भिः । अघटमानमेवमन्यन्न भाषितव्यं मम पुर इति ॥ १५ ॥
स्वयमपि दृष्टं यद् युक्तिसंगतं तद्वदन्ति सत्पुरुषाः । सहसेति भाषितानि पश्चादपथ्यमिव बाधन्ते ॥ १६ ॥
रविकरप्रसर इव जने घनपटलाऽऽच्छादितोऽपि विस्फुरितः । अथैष व्यतिकरो गोपितोऽपि प्रणयानुरोधेन ॥ १७ ॥
राजभवनात् स्वगृहे एकदाऽऽगतोऽस्मि प्रेक्षे । स्वयमेव तत्कुमित्रमनार्यकार्ये आसक्तम् ॥ १८ ॥



For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir





दट्ठूण तं तहट्ठियमेगंते जाव चिंतिउं लग्गो । नियपरियणपरियरिओ तावेस पलाइओ झत्ति ॥ १९ ॥
अहमवि पहरणसहिओ नियथोवपहाणपुरिसपरियरिओ । तस्साणुपहे लग्गो सोऽवि य अद्दंसणं पत्तो ॥ २० ॥
मणपवणजइणवेगेण जाव पत्तोऽम्हि एत्थ ठाणंमि । ता एस महापावो मम पडिओ चक्खुमग्गंमि ॥ २१ ॥
परियणपुरिसावि मए सयलासु दिसासु पेसिया पुव्वं । एयस्स विणासकए अहमेक्को एत्थ संपत्तो ॥ २२ ॥
असहायं मं दट्ठुं एसो सहसत्ति जुज्झिउं लग्गो । एत्तो अन्नं सव्वं जायं तुम्हंपि पच्चक्खं ॥ २३ ॥
एत्थंतरंमि सन्नाहकरणदढगूढकायदुद्धरिसा । भूमियलं पेक्खंता खयरा तत्थागया तुरियं ॥ २४ ॥
पुट्ठा य मए साहह किं भो तुज्झं समागमणकज्जं ? । तेहिं कहियं सामी इह सुव्वइ निवडिओ अम्हं ॥ २५ ॥

---

दृष्ट्वा तं तथास्थितमेकान्ते यावच्चिन्तयितुं लग्नः । निजपरिजनपरिकरितस्तावदेष पलायितो झटिति ॥ १९ ॥
अहमपि प्रहरणसहितो निजस्तोकप्रधानपुरुषपरिकरितः । तस्यानुपथे लग्नः सोऽपि चादर्शनं प्राप्तः ॥ २० ॥
मनः पवनजयिवेगेन यावत्प्राप्तोऽस्मि अत्र स्थाने । तावदेष महापापो मम पतितश्चक्षुर्मार्गे ॥ २१ ॥
परिजनपुरुषा अपि मया सकलासु दिक्षु प्रेषिताः पूर्वम् । एतस्य विनाशकृते अहमेकोऽत्र सम्प्राप्तः ॥ २२ ॥
असहायं मां दृष्ट्वा एष सहसेति योद्धुं लग्नः । इतोऽन्यत् सर्वं जातं तवापि प्रत्यक्षम् ॥ २३ ॥
अत्रान्तरे सन्नाहकरणदृढगूढकायदुर्धर्षाः । भूमितलं प्रेक्षमाणाः खचरास्तत्राऽऽगतास्त्वरितम् ॥ २४ ॥
पृष्टाश्च मया कथयत किं भो युष्माकं समागमनकार्यम् ? । तैः कथितं स्वामिन् ! इह श्रूयते निपतितोऽस्माकम् ॥ २५ ॥



For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir





सो दंसिओ य तेसिं तो ते दट्ठूण तस्स पडियरणं । अच्चंतहरिसियमणा मं पइ भणिउं समाढत्ता ॥ २६ ॥
संमं कयं नराहिव ! जमेवमेयस्स पालणा विहिया । जं एयकए बाढं परितप्पइ खयरनरनाहो ॥ २७ ॥
एयस्स मग्गणकए सव्वत्थवि पेसिया खयरसुहडा । जं एक्को च्चिय पुत्तो एसो सिरिखयरनाहस्स ॥ २८ ॥
ता जयसेहरकुमरं पेसह एयं जहा समप्पेमो । सुहिसयणजणणिजणयाण दंसणुक्कंठियमणाणं ॥ २९ ॥
भणिओ मए स खयरो कुमार ! तुह परियणो भणइ किंपि । ता साह तुमं च्चिय किं पुणेसि पच्चुत्तरं देमो ॥ ३० ॥
कुमरेण तओ भणियं एगत्तो तुज्झ असरिसो पणओ । एगत्तो गुरुविरहो दोन्निऽवि दोलंति मह हिययं ॥ ३१ ॥
ताहे विसिट्ठभोयणदिव्वंसुयरयणभायणाईहिं । सम्माणिऊण कुमरो सट्ठाणं पेसिओ स मए ॥ ३२ ॥

---

स दर्शितश्च तेषां ततस्ते दृष्ट्वा तस्य प्रतिचरणम् । अत्यन्तहर्षितमनसो मां प्रति भणितुं समारब्धाः ॥ २६ ॥
सम्यक्कृतं नराधिप ! यदेवमेतस्य पालना विहिता । यदेतत्कृते बाढं परितप्यते खचरनरनाथः ॥ २७ ॥
एतस्य मार्गणकृते सर्वत्रापि प्रेषिताः खचरसुभटाः । यदेक एव पुत्र एष श्रीखचरनाथस्य ॥ २८ ॥
तस्माज्जयशेखरकुमारं प्रेषयतैतं यथा समर्पयामः । सुहृत्स्वजननीजनकानां दर्शनोत्कण्ठितमनसाम् ॥ २९ ॥
भणितो मया स खचरः कुमार ! तव परिजनो भणति किमपि । तस्मात् कथय त्वमेव किं पुनरेषां प्रत्युत्तरं दद्मः ॥ ३० ॥
कुमारेण ततो भणितमेकतस्तवासदृशः प्रणयः । एकतो गुरुविरहो द्वावपि दोलयतो मम हृदयम् ॥ ३१ ॥
तदा विशिष्टभोजनदिव्यांशुकरत्नभाजनादिभिः । संमान्य कुमारः स्वस्थानं प्रेषितः स मया ॥ ३२ ॥

For Private and Personal Use Only

तेणावि भणियमेयं नरिंद ! काएण एस वच्चिस्सं । हिययं तु निगडजडियं व तुम्ह पासे परिव्वसिही ॥ ३३ ॥
वरमत्थखओ वरमन्नदेसगमणं वरं मरणदुक्खं । सज्जणविरहो पुण तिक्खदुक्खलक्खंपि अक्खिवइ ॥ ३४ ॥
इय भणिउं सोगगलंतनयणजलबिंदुधोयगंडयलो । काऊण मम पणामं सपरियणो अइगओ गयणं ॥ ३५ ॥

अहंपि तेसिं गयणुप्पयणसामत्थमवलोइंतो पुव्वदिट्ठसमरवावारसंरंभमणुचिंतयंतो चिंतयंतो केत्तियंपि वेलं विलंबि नियरज्जकज्जाइं अणुचिंतिउं पवत्तो, विसुमरियं च मम भोगपमुहकज्जकोडिकरणपसत्तस्स तं गयणनिवडियविज्जाहरमारणउज्जुयदुट्ठखयरस्स सामरिसं वयणं । एगया य रयणीए जाव कइवयपहाणजणपरियरिओ नियदेससुत्थासुत्थपरिभावभावणेण य रायंतररहस्सायन्नणेण य गयतुरयगुणवन्नणेण य किन्नराणुकारिगायणजणपारद्धकागलीगीयसवणेण य सायरपणच्चिरवारविला-

---

तेनापि भणितमेतद् नरेन्द्र ! कायेनैव व्रजिष्यामि । हृदयं तु निगडजडितमिव तव पार्श्वे परिवत्स्यति ॥ ३३ ॥
वरमर्थक्षयो वरमन्यदेशगमनं वरं मरणदुःखम् । सज्जनविरहः पुनस्तीक्ष्णदुःखलक्षमपि आक्षिपति ॥ ३४ ॥
एवं भणित्वा शोकगलन्नयनजलबिन्दुधौतगण्डस्थलः । कृत्वा मम प्रणामं सपरिजनोऽतिगतो गगनम् ॥ ३५ ॥

अहमपि तेषां गगनोत्पतनसामर्थ्यमवलोकयन् पूर्वदृष्टसमरव्यापारसंरम्भमनुचिन्तयन् चिन्तयन् कियतीमपि वेलां विलम्ब्य निजराज्यकार्याणि अनुचिन्तयितुं प्रवृत्तः, विस्मृतं च मम भोगप्रमुखकार्यकोटिकरणप्रसक्तस्य तद्गमननिपतितविद्याधरमारणोद्युक्तदुष्टखचरस्य सामर्षं वचनम्, एकदा च रजन्यां यावत् कतिपयप्रधानपरिजनपरिकरितो निजदेशस्वस्थास्वस्थपरिभावभावनेन च राजान्तररहस्याऽऽकर्णनेन च गजतुरगगुणवर्णनेन च किन्नरानुकारिगायकजनप्रारब्धकाकलीगीतश्रवणेन च सादरप्रनृत्यद्वारविलासिनी—

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



सिणीचित्तपयक्खेवनिरिक्खणेण य नम्मालावकरणेण य बिंदुचुयपहेलियापण्हुत्तरजाणणेण य विणोयंतो चिट्ठामि ताव अयं-डविहडियबंभंडभंडड्डामरो जुगंतपणच्चिरभेरवपहयडमडमेंतडमरुयनिनायनिट्ठुरो खरनहरनिद्दारियमयगलगलगज्जियदारुणो पासपरिवत्तिभवणभित्तिपरिफालणसमुच्छलंतपडिसद्दयसहस्सदुव्विसहो समुट्ठिओ हलबोलोत्ति, तं च सोऊण विप्फारियनयण-जुयलो सयलदिसिमंडलमहमवलोयमाणो पेच्छामि तडिदंडपयंडकरवालवावडकरे भवणंगणमभिसरंते हणहणहणत्ति भणंते विज्जाहरे, ते य दट्ठूण मम परियणो भयभरथरहरंतसरीरो करुणाइं दीणाइं वयणाइं समुल्लवितो सयलदिसासु सिग्घं पला-ओत्ति, ताहे पहरणरहिओ एगागीवि ठाऊणाहं तेसिं संमुहं जंपिउमेवं पवत्तो य–रे रे किं गलगहियव्व निरत्थयं विरसमार-सह ? के तुब्भे ? केण पेसिया ? किं वा आगमणकज्जं ?, तेहिं भणियं–रे रे नरिंदाहम ! तइया अम्ह पहुणो सत्तुरक्खणेण

---

चित्रपदक्षेपनिरीक्षणेन च नर्माऽऽलापकरणेन च बिन्दुच्युतप्रहेलिकाप्रश्नोत्तरज्ञानेन च विनोदयंस्तिष्ठामि, तावदकाण्डविघटित-ब्रह्माण्डभाण्डोड्डारो युगान्तप्रनृत्यद्भैरवप्रहतडमडमड्डुमरुकनिनादनिष्ठुरः खरनखरनिर्दारितमदगलगलगर्जितदारुणः पार्श्वपरिवर्ति-भवनभित्तिपरिस्फालनसमुच्छलत्प्रतिशब्दकसहस्रदुर्विषहः समुत्थितः कोलाहल इति, तं च श्रुत्वा विस्फारितनयनयुगलः सकल-दिङ्मण्डलमहमवलोकमानः प्रेक्षे तडिद्दण्डप्रचण्डकरवालव्यापृतकरान् भवनाङ्गणमभिसरतो 'जहि जहि जही' ति भणतो विद्याधरान्, तांश्च दृष्ट्वा मम परिजनो भयभरकम्पमानशरीरः करुणानि दीनानि वचनानि समुल्लपन् सकलदिक्षु शीघ्रं पलायित इति, तदा प्रहरण-रहित एकाक्यपि स्थित्वाऽहं तेषां संमुखं जल्पितुमेवं प्रवृत्तश्च–रे रे किं गलगृहीता इव निरर्थकं विरसमारसत ? के यूयम् ? केन प्रेषिताः ? किंवाऽऽगमनकार्यम् ?, तैर्भणितं रे रे नरेन्द्राधम ! तदाऽस्माकं प्रभोः ! शत्रुरक्षणेन





For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir





वयणमवगणिय संपयं धिट्ठयाए अयाणमाणो इव के तुब्भे केण पेसिया किं वा आगमणकज्जंति पुच्छसि, जइ पुण विसेसकहणेण तूससि ता निसामेहि, अम्हे विज्जाहरा रहनेउरचक्कवालपुरविज्जाहरनरिंदसिरिसमरसिंघनंदणेण वेरिखयरासमप्पणपरूढगाढकोवानलेन सिरिअमरतेयकुमरेण तुह दुव्विणयतरुफलदंसणत्थं पेसियत्ति, मए भणियं-जइ एवं ता जहाइट्ठं उवचिट्ठहत्ति, तओ अक्खयसरीरं चेव मं गहिऊण उप्पइया ते गयणमग्गेण, गया य दूरदेसं, मुक्को य अहं एगत्थ भुयंगभीमे गिरिनिगुंजे, भणियं च मए-किं रे ! एवं मुंचह ? जं नेव पहरह, तेहिं भणियं-एत्तिया चेव पहुणो आणा, पहुचित्ताणुवत्तणं हि सेवगस्स धम्मो, एवं भणिय उप्पइया ते तओ ठाणाओ। अहंपि कोइलकुलगवलगुलियसामलासु सयलदिसासु केसरिकिसोरनिद्दयनिद्दारियसारंगपमुक्कविरसारावभीसणेसु काणणेसु वणमहिसावगाहिज्जंतपल्ललसमुच्छलंतपंकपडलदुग्गेसु मग्गेसु तरुवरसाहासंहरिसवसनि-

---

वचनमवगणय्य साम्प्रतं धृष्टतया अजानान इव के यूयं केन प्रेषिताः किंवाऽऽगमनकार्यमिति पृच्छसि, यदि पुनर्विशेषकथनेन तुष्यसि तदा निशमय-वयं विद्याधरा रथनूपुरचक्रवालपुरविद्याधरनरेन्द्रश्रीसमरसिंहनन्दनेन वैरिखेचरासमर्पणप्ररूढगाढकोपानलेन श्रीअमरतेजकुमारेण तव दुर्विनयतरुफलदर्शनार्थं प्रेषिता इति, मया भणितं-यद्येवं तदा यदादिष्टमुपतिष्ठत इति, ततोऽक्षतशरीरमेव मां गृहीत्वोत्पतितास्ते गगनमार्गेण, गताश्च दूरदेशं, मुक्तश्चाहमेकत्र भुजङ्गभीमे गिरिनिकुञ्जे, भणितं च मया-किं रे एवं मुञ्चत ? यन्नैव प्रहरत, तैर्भणितम्-एतावत्येव प्रभोराज्ञा, प्रभुचित्तानुवर्तनं हि सेवकस्य धर्मः, एवं भणित्वा उत्पतितास्ते ततः स्थानात् ! अहमपि कोकिलकुलगवलगुलितश्यामलासु सकलदिक्षु केसरिकिशोरनिर्दयनिर्दारितसारङ्गप्रमुक्तविरसाऽऽरावभीषणेषु काननेषु वनमहिषावगाह्यमानपल्वलसमुच्छलत्पङ्कपटलदुर्गेषु मार्गेषु तरुवरशाखासंघर्षवशनि-



For Private and Personal Use Only

वडंतदहणनिदज्झमाणेसु वेणुगहणेसु पज्जलंतपईवसिहाभीसणविप्फुरंतरत्तलोयणेसु इओ तओ वियरंतेसु निसायरगणेसु वराह-तिक्खदाढुक्किण्णलेट्ठुनियरुच्चावच्चासु वणत्थलीसु अमुणियमग्गुम्मग्गो विमूढदिसाभागो असोढपयप्पयारो एक्कंमि गुरुतरुवरे समारुहिउं साहाए पसुतोम्हि, दुट्ठमहिलव्व कट्ठेण समागया निद्दा, पच्छिमरयणिसमए य जामकरिघडव्व पासमल्लीणा चित्ता पबोहमंगलतूरेहिं पिव रसियं पुराणसियालेहिं मागहेहिं व पढियं सुयगणेहिं, अह उइयंमि सयलतिहुयणभुवणप्पईवंमि दिवायरंमि उट्ठिऊण कयपाभाइयकिच्चो ओयरिऊण तरुवराओ एक्कदिसाए पयट्टो गंतुं, खणंतरेण य तरुणतरुचक्कवालबद्ध-परियरो कोदंडकंडवावडकरो नियपणइणीए अणुगम्ममाणो गुंजाफलमालियामेत्तकयाभरणो भुयंगकंचुयनिव्वत्तियकेसकला-वसंजमणो तक्खणविणिवाइयसिहंडिससिहमुहविरइयकन्नपूरो दिट्ठो एक्को पुलिंदो, सो य पुच्छिओ मए–भो महाणुभाग ! का

पतद्दहननिर्दह्यमानेषु वेणुगहनेषु प्रज्वलत्प्रदीपशिखाभीषणविस्फुरद्रक्तलोचनेषु इतस्ततो विचरत्सु निशाचरगणेषु वराहतीक्ष्ण-दंष्ट्रोत्कीर्णलेष्ठुनिकरोच्चावचासु वनस्थलीषु अज्ञातमार्गोन्मार्गो विमूढदिग्भागोऽसोढपदप्रचार एकस्मिन् गुरुतरुवरे समारुह्य शाखायां प्रसुप्तोऽहं, दुष्टमहिलेव कष्टेन समागता निद्रा, पश्चिमरजनीसमये च यामकरिघटा इव पार्श्वमालीनाश्चित्रकाः प्रबोधमङ्गलतूर्यैरिव रसितं पुराणशृगालैः मागधैरिव पठितं शुकगणैः; अथोदिते सकलत्रिभुवनभवनप्रदीपे दिवाकरे उत्थाय कृतप्राभातिककृत्योऽवतीर्य तरुवरादेकदिशि प्रवृत्तो गन्तुं, क्षणान्तरे च तरुणतरुचक्रवालबद्धपरिकरः कोदण्डकाण्डव्यापृतकरो निजप्रणयिन्याऽनुगम्यमानो गुञ्जाफलमालिकामात्रकृताऽऽभरणो भुजङ्गकञ्चुकनिवर्तितकेशकलापसंयमनस्तत्क्षणविनिपातितशिखण्डिसशिखमुखविरचितकर्णपूरो दृष्ट एकः पुलिन्दः, स च पृष्टो मया–भो महानुभाग ! कैषाऽटवी ?



For Private and Personal Use Only

एसा अडवी ? को वा नियसिहरग्गभग्गरविरहतुरयमग्गो एस गिरिवरो ? का वा नयरगामिणी वत्तिणित्ति ?, पुलिंदेण भणियं-अणामिया नाम एसा एडवी, सज्झाभिहाणो य एस गिरिवरो, एसावि वत्तिणी कंचणपुरनयरमणुसरएत्ति । तओ लग्गोऽहं तीए वत्तणीए तावसतवस्सीव कंदमूलफलेहिं पाणवित्तिं करिंतो पत्तो कइवयवासरेहिं कंचणपुरं, तत्थ य मुणिवरो इव निप्पडिबद्धो वीयरागो इव सव्वसंगरहिओ ठाऊण कइवयदिणाणि पेच्छंतो पुव्वट्ठाणाइं अवलोएंतो गामागरे निरूविंतो धम्मियजणकारावियाइं समुत्तुंगसुंदरागाराइं सुरमंदिराइं कप्पडिओ इव दाणसालासु पाणवित्तिं कुणमाणो अणवरयपयाणएहिं पत्तो सरज्जसीमासन्निवेसं, तत्थ य कइवयदिणाणि वीसमिय पुणरवि चलिओ नियनयराभिमुहं । इंतेण य सुणिऊण नियलहुभाउणो विजयसेणस्स संपत्तरज्जस्स विभववित्थरं चिंतियं मए-नूणं विजयसेणेणाहिट्ठियंमि रज्जे न जुत्तं तत्थ मे गमणं । जेण-

को वा निजशिखराग्रभग्नरविरथतुरगमार्ग एष गिरिवरः ? का वा नगरगामिनी वर्तनीति ?, पुलिन्देन भणितम्-अनामिका नामैषाऽटवी, सह्याभिधानश्चैष गिरिवरः, एषाऽपि वर्तनी काञ्चनपुरनगरमनुसरतीति । ततो लग्नोऽहं तया वर्तन्या तापसतपस्वीव कन्दमूलफलैः प्राणवृत्तिं कुर्वन् प्राप्तः कतिपयवासरैः काञ्चनपुरं, तत्र च मुनिवर इव निष्प्रतिबन्धो वीतराग इव सर्वसङ्गरहितः स्थित्वा कतिपयदिनानि प्रेक्षमाणः पूर्वस्थानान्यवलोकयन् ग्रामाकरान् निरूपयन् धार्मिकजनकारितानि समुत्तुङ्गसुन्दराऽऽकाराणि सुरमन्दिराणि, कार्पटिक इव दानशालासु प्राणवृत्तिं कुर्वाणोऽनवरतप्रयाणकैः प्राप्तः स्वराज्यसीमासन्निवेशं, तत्र च कतिपयदिनानि विश्रम्य पुनरपि चलितो निजनगराभिमुखम्, आगच्छता च श्रुत्वा निजलघुभ्रातुर्विजयसेनस्य सम्प्राप्तराज्यस्य विभवविस्तारं, चिन्तितं च मया-नूनं विजयसेनेनाधिष्ठिते राज्ये न युक्तं तत्र मे गमनम् । येन-



For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



पुव्वकयधम्मकम्माणुभावओ पाविऊण रज्जसिरिं । चिंतामणिव्व दाउं को वंछइ वल्लहस्सावि ? ॥ १ ॥
पिच्छामि तहाविय मित्तमंतिसामंतवयणविन्नासं । जं नट्ठं नणु रज्जं तं दिट्ठं हरणकालेऽवि ॥ २ ॥
इह चिंतयंतो पत्तो कमेण सिरिभवणनयरं, अलक्खिज्जमाणो पुरजणेण पविट्ठो सहपंसुकीलियस्स सोमदत्ताभिहाणस्स वयंसस्स गिहे, सो य ममं दट्ठूण झडत्ति जायपच्चभिन्नाणो सहरिसं पाएसु निवडिय गाढं परुन्नो, भणिउमाढत्तो—
तुह विरहे मम नरवर ! वरिसं व दिणं न जाइ पज्जंतं । हिमहारचंदचंदणरसावि दूरं तविंति तणुं ॥ १ ॥
भवणं पेयवणं पिव पणइणिवग्गो य डाइणिगणोव्व । सयणावि भुयंगा इव न मणंपि मणा सुहाविंति ॥ २ ॥
एत्तियदिणाइं लोएण धारिओ कहवि गुरुनिरोहेण । जंतो इण्हिं विदेसे जइ नाह ! तुमं न इंतोऽसि ॥ ३ ॥

---

पूर्वकृतधर्मकर्मानुभावतः प्राप्य राज्यश्रियम् । चिन्तामणिरिव दातुं को वाञ्छति वल्लभस्यापि ॥ १ ॥
प्रेक्षे तथापि च मित्रमन्त्रिसामन्तवचनविन्यासम् । यन्नष्टं ननु राज्यं तद् दृष्टं हरणकालेऽपि ॥ २ ॥
इह चिन्तयन् प्राप्तः क्रमेण श्रीभवननगरम् अलक्ष्यमाणः पुरजनेन प्रविष्टः सहपांशुक्रीडितस्य सोमदत्ताभिधानस्य वयस्यस्य गृहे, स च मां दृष्ट्वा झटिति जातप्रत्यभिज्ञानः सहर्षं पादयोर्निपत्य गाढं भणितुमारब्धः—
तव विरहे मम नरवर ! वर्षमिव दिनं न याति पर्यन्तम् । हिमहारचन्द्रचन्दनरसा अपि दूरं तापयन्ति तनुम् ॥ १ ॥
भवनं प्रेतवनमिव प्रणयिनीवर्गश्च डाकिनीगण इव । स्वजना अपि भुजङ्गा इव न मनोऽपि मनाक् सुखयन्ति ॥ २ ॥
इयद्दिनानि लोकेन धारितः कथमपि गुरुनिरोधेन । यात इदानीं विदेशे यदि नाथ ! त्वं नाऽऽयातोऽसि ॥ ३ ॥

निजदेशे-सोमदत्त-मित्रसदने गमनम् ॥



For Private and Personal Use Only

तो एयं वरभवणं एसो धणवित्थरो इमे तुरया । एसो किंकरवग्गो पडिवज्जसु तं महीनाह ! ॥ ४ ॥

एमाइं पणयसाराइं वयणाइं भासंतो भणिओ मए सोमदत्तो-पियवयंस ! किं सोयविहुरो हवसि ? किं वा नियभवण-धणाइयं समप्पेसि ? किमेवं तुह पणयसारो पयडीभविस्सइ ? को वा अन्नो ममाओवि तुह पाणप्पिओ ? किं वा तुह दंसणा-ओऽवि अन्नं ममेहागमणप्पओयणं ? ता धीरो भव, अच्छउ सव्वस्ससमप्पणं, तुह जीवियंपि ममायत्तं चेव, तओ काराविओऽहं ण्हाणविलेवणभोयणपमुहं कायव्वं, खणंतरेण पुच्छिओ मए-पियवयंस ! साहेसु किमियाणिं कायव्वं ? सोमदत्तेण भणियं-देव ! किं निवेदेमि ?, मं एक्कं पमोत्तूणं अन्ने सव्वेऽवि मंतिसामंता दढपक्खवाया विजयसेणे, नेच्छंति नाममवि तुह संतियं भणिउं, जइ सो कहवि आगमिस्सइ तहावि एयस्स चेव रज्जं, जओ एयस्स मुद्धा मती अम्ह दढं वसवत्ती थेवंपि वयणं न विलंघेइत्ति,

---

तत एतद् वरभवनमेष धनविस्तार इमे तुरगाः । एष किङ्करवर्गः प्रतिपद्यस्व तं महीनाथ ! ॥ ४ ॥

एवमादीनि प्रणयसाराणि वचनानि भाषमाणो भणितो मया सोमदत्तः-प्रियवयस्य ! किं शोकविधुरो भवसि ? किं वा निज-भवनधनादिकं समर्पयसि ? किमेवं तव प्रणयसारः प्रकटीभविष्यति ? को वाऽन्यो मत्तोऽपि तव प्राणप्रियः ? किं वा तव दर्शना-दपि अन्यन्ममेहाऽऽगमनप्रयोजनम् ? तस्माद्धीरो भव, आस्तां सर्वस्वसमर्पणं, तव जीवितमपि ममाऽऽयत्तमेव, ततः कारितोऽहं स्नानविलेपनभोजनप्रमुखं कर्तव्यम्, क्षणान्तरेण पृष्टो मया-प्रियवयस्य ! कथय किमिदानीं कर्तव्यम् ?, सोमदत्तेन भणितम्-देव ! किं निवेदयामि ? मामेकं प्रमुच्य अन्ये सर्वेऽपि मन्त्रि सामन्ताः दृढपक्षपाता विजयसेने, नेच्छन्ति नामापि तव सत्कं भणितुम्, यदि स कथमपि आगमिष्यति तथापि एतस्य चैव राज्यं, यत एतस्य मुग्धा मतिरस्माकं दृढं वशवर्ती स्तोकमपि वचनं न विल-



For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



मन्त्री-सामन्तादिभिः कथितं वीरसेनस्य मरणम् ॥

विजयसेणो पुण नियसरीरमेत्तेण तुम्ह विरहे बाढं परितम्मइ, भणइ य-जइ एइ जेट्ठभाया ता धुवं समप्पेमि रज्जधुरं, जहा-जेट्ठरज्जपालणमेव अम्ह कुलधम्मोत्ति, एवं ठिए किंपि न जाणिज्जइ जुत्ताजुत्तं, ता एत्थेव अलक्खिज्जमाणो तुमं चिट्ठसु कइवय-दिणाणि जाव उवलक्खेमि नरिंदाईण चित्तं, मए भणियं-एवं हवउत्ति, तओ सोमदत्तेण सामेण य दंडेण य भेएण य उव-प्पयाणेण य आढत्ता मंतिसामंतादओ भेइउं, निट्ठुरवज्जगंठिंपिव न य केणवि भिज्जंति उवाएणं, नाओ य तेहिं समागमणव-इयरो, निवारिया य रायदुवारपाला जहा न सोमदत्तस्स रायभवणे पवेसो दायव्वोत्ति, विजयसेणस्सवि सिट्ठं जहा तुम्ह जेट्ठ-भाया पंचत्तं गओत्ति निसामिज्जइत्ति, तेणावि एवं निसामिय कओ महासोगो, पयट्टियाइं मयकिच्चाइंति, एवंति—

मह रज्जकज्जविसयं जं जमुवायं घडेइ सो निउणो । दइवो पडिकूलो इव तं तं विहडेइ निक्करुणो ॥ १ ॥

---

क्ष्यतीति, विजयसेनः पुनर्निजशरीरमात्रेण तव विरहे बाढं परिताम्यति, भणति च यद्येति ज्येष्ठभ्राता तदा ध्रुवं समर्पयामि राज्यधुरं, यथा ज्येष्ठराज्यपालनमेवास्माकं कुलधर्म इति, एवं स्थिते किमपि न ज्ञायते युक्तायुक्तम्, तस्मादत्रैवालक्ष्यमाणस्त्वं तिष्ठ कतिपयदिनानि यावदुपलक्षयामि नरेन्द्रादीनां चित्तं, मया भणितम्-एवं भवत्विति, ततः सोमदत्तेन साम्ना च दण्डेन च भेदेन च उपप्रदानेन चाऽऽरब्धा मन्त्रिसामन्तादयो भेदयितुं, निष्ठुरवज्रग्रन्थिमिव न च केनापि भिद्यन्ते उपायेन, ज्ञातश्च तैः समागमनव्यतिकरः, निवारिताश्च राजद्वारपाला यथा न सोमदत्तस्य राजभवने प्रवेशो दातव्य इति, विजयसेनस्यापि शिष्टं यथा तव ज्येष्ठभ्राता पञ्चत्वं गत इति निशम्यत इति, तेनापि एवं निशम्य कृतो महाशोकः, प्रवर्तितानि मृतकृत्यानीति, एवमिति—

मम राज्यकार्यविषयं यं यमुपायं घटयति स निपुणः । दैवः प्रतिकूल इव तं तं विघटयति निष्करुणः ॥ १ ॥

५



For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir





अन्नया य गाढविसायवसविसंठुलेण मुणियपरमत्थेण भणियं सोमदत्तेण-देव! निम्मज्जाएहिं मंतिसामंताईहिं तुम्ह पंचत्तगमणवत्ता निवत्तिया राइणो पुरो, ता जइ कहंपि रायवाडियाए निग्गयस्स विजयसेणस्स दंसणपहे ठाऊण नियदंसणं ठावेसि ता जुत्तं होइत्ति, जओ तुम्ह दंसणं बाढमभिकंखइ एसो, पडिवन्नं च मए एयं तदणुरोहेण, अन्नया य पवरकरेणुगा-खंधगओ निग्गओ विहारजत्ताए विजयसेणो, पासायसिहरमारुहिऊण य ठिओ अहं से चक्खुगोयरे, झडत्ति दिट्ठोऽहमणेण, सागयं २ चिरागयबंधवस्सत्ति हरिसुप्फुल्ललोयणो य जाव सो वाहरिउं पवत्तो ताव तक्खणा चेव मंतिसामंतपमुहेहिं रइया अंबरे अंतरवडा, कओ हलबोलो, नियत्तिओ विहारजत्ताओ राया । भणियं च—

असिवं तुह किंपि इमं जं देव ! पिसायदंसणं जायं । किं पंचत्तगयजणो दीसइ य कयावि पच्चक्खो ? ॥ १ ॥

---

अन्यदा च गाढविषादवशविसंस्थूलेन ज्ञातपरमार्थेन भणितं सोमदत्तेन देव ! निर्मर्यादैर्मन्त्रिसामन्तादिभिस्तव पञ्चत्वगमन-वार्ता निवर्तिता राज्ञः पुरः, तस्माद् यदि कथमपि राजपाटिकायां निर्गतस्य विजयसेनस्य दर्शनपथे स्थित्वा निजदर्शनं स्थापयसि तदा युक्तं भवतीति, यतस्तव दर्शनं बाढमभिकाङ्क्षत्येषः, प्रतिपन्नं च मयैतत् तदनुरोधेन ।

अन्यदा च प्रवरकरेणुकास्कन्धगतो निर्गतो विहारयात्रायै विजयसेनः, प्रासादशिखरमारुह्य च स्थितोऽहं तस्य चक्षुर्गोचरे, झटिति दृष्टोऽहमनेन, स्वागतं स्वागतं चिरागतबान्धवस्येति हर्षोत्फुल्ललोचनश्च यावत् स व्याहर्तुं प्रवृत्तस्तावत्क्षणं चैव मन्त्रिसाम-न्तप्रमुखै रचिता अम्बरेऽन्तरपटाः, कृतः कोलाहलः, निवर्तितो विहारयात्राया राजा । भणितं च—

अशिवं तव किमपि इदं यद्देव ! पिशाचदर्शनं जातम् । किं पञ्चत्वगतजनो दृश्यते च कदापि प्रत्यक्षः ॥ १ ॥



For Private and Personal Use Only

ता लहु गच्छह भवणं संतिं कारेह देह भूयबलिं । पारंभह होमविहिं सुमरह मच्चुंजयं मंतं ॥ २ ॥
वियरसु सुवण्णदाणं माहणसमणाण तक्कुयजणाणं । एवं कहिए सिग्घं मिंठेणं चोइया करिणी ॥ ३ ॥
भवणंमि तओ गंतुं जं जह भणियं तहेव नीसेसं । अइमुद्धबुद्धिभावा कराविय विजयसेणेण ॥ ४ ॥

अहं पुण निरुच्छाहो निराणंदो ववगयधीरिमभावो अवयरिय तओ ठाणाओ सोमदत्तस्स अकहमाणो चेव पच्छन्नदेसे ठाऊण चिंतिउमाढत्तो, कहं ?—

अणवरयकणयवियरणपरितोसियमाणसावि कह पावा । सामंता मत्ता इव पुरट्ठियंपिहु मुणंति न मं ? ॥ १ ॥
कह वाऽवराहमणेण (सहणेण) भूरिसोगु (मई) सपयंमि ठवियावि । न गणंति मंतिणो मं तणं व पम्मुक्कमज्जाया ? ॥२॥

---

तस्माल्लघु गच्छत भवनं शान्तिं कारयत दत्त भूतबलिम् । प्रारभध्वं होमविधिं स्मरत मृत्युञ्जयं मन्त्रम् ॥ २ ॥
वितरत सुवर्णदानं ब्राह्मणश्रमणानां तर्कुकजनानाम् । एवं कथिते शीघ्रं मिण्ठेन चोदिता करिणी ॥ ३ ॥
भवने ततो गत्वा यद् यथा भणितं तथैव निःशेषम् । अतिमुग्धबुद्धिभावात् कारितं विजयसेनेन ॥ ४ ॥

अहं पुनर्निरुत्साहो निरानन्दो व्यपगतधैर्यभावोऽवतीर्य ततः स्थानात् सोमदत्तस्याकथयन्नेव प्रच्छन्नदेशे स्थित्वा चिन्तयितुमारब्धः—कथम् ?—

अनवरतकनकवितरणपरितोषितमानसा अपि कथं पापाः । सामन्ता मत्ता इव पुरःस्थितमपि हु जानन्ति न माम् ॥ १ ॥
कथं वाऽपराधसहनेन भूरिशो मया स्वपदे स्थापिता अपि । न गणयन्ति मन्त्रिणो मां तृणमिव प्रमुक्तमर्यादाः ॥ २ ॥



For Private and Personal Use Only

कह नयरमहत्तरया उवयरिया णेगसोऽवि कज्जेसु । माणंति न मं सप्पणयवयणमेत्तेण विहयासा ? ॥ ३ ॥
जयसेहरकुमरो सो विज्जाहररायसुकुलजाओऽवि । तह उवयरिओऽवि कहं उवेहए मं तदियरोव्व ? ॥ ४ ॥

होउ वा, किं एएण विगप्पिएण ?, अत्तहियमियाणिं कीरइ मुच्चइ इमं नयरं गम्मइ अन्नत्थ देसे ओलग्गिज्जइ अन्नो गरुओ नरवइत्ति, अहवा सयलजयपयडपरक्कमस्स सिरिअवंतिसेणमहानराहिवस्स सुओ होऊण कइवयदिणाइं रज्जरिद्धिमुद्धुरमणुभविय कहमियाणिं अन्नस्स हेट्ठा ठाइस्सामित्ति सव्वहा न जुत्तं परिचिंतिउं, भेरवपडणेण अत्तपरिच्चाओ चेव संपयं मे सव्वोवाहिविसुद्धोत्ति निच्छिऊण निग्गओ नयराओ लग्गो भेरवपडणाभिमुहं, वत्तिणीए अखंडपयाणेहिं पवच्चंतो संपत्तो तरुणतरुसंडमंडियं उब्भडसिहंडितंडवाडंबररमणिज्जं हंससारसकपिंजलकोकिलकुलकलकलरवमुहलं पुंनागनागजंबुजंबिरनिंबब-

---

कथं नगरमहत्तरका उपचरिता अनेकशोऽपि कार्येषु । मानयन्ति न मां सप्रणयवचनमात्रेण विहताशाः ॥ ३ ॥
जयशेखरकुमारः स विद्याधरराजसुकुलजातोऽपि । तथोपचरितोऽपि कथमुपेक्षते मां तदितर इव ॥ ४ ॥

भवतु वा, किमेतेन विकल्पितेन ? आत्महितमिदानीं क्रियते, मुच्यत इदं नगरं, गम्यतेऽन्यत्र देशे, अवलग्यते अन्यो गुरुको नरपतिरिति, अथवा सकलजगत्प्रकटपराक्रमस्य श्रीअवन्तिसेनमहानराधिपस्य सुतो भूत्वा कतिपयदिनानि राज्यर्द्धिमुद्धुरामनुभूय कथमिदानीमन्यस्याधः स्थास्यामीति, सर्वथा न युक्तं परिचिन्तयितुम्, भैरवपतनेन आत्मपरित्याग एव साम्प्रतं मम सर्वोपाधिविशुद्ध इति निश्चित्य निर्गतो नगरात् लग्नो भैरवपतनाभिमुखं वर्तन्यामखण्डप्रयाणैः प्रव्रजन् सम्प्राप्तस्तरुणतरुषण्डमण्डितमुद्भटशिखण्डि-ताण्डवाडम्बररमणीयं हंससारसकपिञ्जलकोकिलकुलकलकलरवमुखरं पुन्नागनागजम्बूजम्बीरनिम्बाम्रचम्पकाशोकशोभितपरिसरोद्देशं-

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir





चंपयासोयसोहियपरिसरुद्देसं भेरवपडणपच्चासन्नं एक्कमुववणं, दिट्ठो य तत्थ अणेगजणनमंसिज्जमाणचरणो सल्लक्खणनरसिर-कवालमेत्तपरियरो मंतज्झाणपरायणो करकमलकलियजोगदंडो समत्थनाणविन्नाणपरमपगरिसपत्तो ससाहसपरितोसियवेयालो महाकालो नाम जोगायरिओ, पणमिओ य मए सव्वायरेणं दिन्नासीसो य निविट्ठो संनिहियधरणिवट्ठे, अवलोइओऽहं तेण सिणिद्धाए दिट्ठीए, खणंतरे संभासिओ य भद्द ! उव्विग्गचित्तो इव लक्खीयसि, ता किं भट्ठलच्छीविच्छड्डोत्ति उयाहु विदेसागओत्ति, अन्नं वा किंपि कारणं ?, मए भणियं-भयवं ! अम्हारिसा पुन्नरहिया पाणिणो पए पए उव्विग्गचित्ता चेव, कित्तियाइं कारणाइं साहिज्जंति ?, तेण जंपियं-तहावि विसेसयरं सोउमिच्छामि, मए भणियं-भयवं ! किं एएण झाणविग्घकारएण नियवइयरसाहणेण ?, महाकालेण भणियं-किं तुज्झ झाणचिंताए ?, जहाइट्ठं कुणसु, तओ मए विज्जाहरावलोयणं

---

भैरवपतनप्रत्यासन्नमेकमुपवनम्, दृष्टश्च तत्रानेकजननमस्यमानचरणः सल्लक्षणनरशिरःकपालमात्रपरिकरो मन्त्रध्यानपरायणः कर-कमलकलितयोगदण्डः समस्तज्ञानविज्ञानपरमप्रकर्षप्राप्तः स्वसाहसपरितोषितवैतालो महाकालो नाम योगाचार्यः प्रणतश्च मया सर्वादरेण दत्ताशीश्च निविष्ट संनिहितधरणीपृष्ठे, अवलोकितोऽहं तेन स्निग्धया दृष्ट्या, क्षणान्तरे संभाषितश्च-भद्र ! उद्विग्नचित्त इव लक्ष्यसे, ततः किं भ्रष्टलक्ष्मीविच्छर्द इति उताहो विदेशादागत इति, अन्यद् वा किमपि कारणं ? मया भणितं-भगवन् ! अस्मादृशाः पुण्यरहिताः प्राणिनः पदे पदे उद्विग्नचित्ता एव, कियन्ति कारणानि कथ्यन्ते, तेन जल्पितं-तथापि विशेषतरं श्रोतुमिच्छामि, मया भणितं-भगवन् ! किमेतेन ध्यानविघ्नकारकेण निजव्यतिकरकथनेन ? महाकालेन भणितं-किं तव ध्यानचिन्तया ? यथादिष्टं कुरु ? ततो मया विद्याधरावलोकनं



For Private and Personal Use Only

च जुज्झनिवडियखयररक्खणं च महाडविनिवाडणं च नियनगरागमणं च मंतिसामंतपमुहजणावमाणणं च रज्जावहारदुक्खं च उवयरियविज्जाहरोवेक्खणं च नयरनिग्गमणं च भेरवपडणं पडुच्च समागमणं च सिट्ठमेयस्स, अह महाकालेण भणियं-अहो विरुद्धकारित्तणं हयविहिणो जमेरिसे असममाहसधणे जणे विणिम्मिय एरिसतिक्खदुक्खभायणं करेइ, अहवा—

साहसधणाण हियय दुक्खं गरुयंपि सहइ निवडंतं । इयराण दुहलवेणवि विहडइ जरसिप्पिणिपुडं व ॥ १ ॥

जइ निवडइ गुरुदुक्खं तहेव सोक्खंपि संभवइ तेसिं । इयराण तुल्लसुहदुक्खसंभवो निच्चकालंपि ॥ २ ॥

कस्स व निरंतरायं सोक्खं ? कस्सेव नावया इंति ? । को दूसिओ खलेहिं नो ? कस्स व संठिया लच्छी ? ॥ ३ ॥

इय नाउं चय सोयं पुणोऽवि तुह वंछियाइं होहिंति । सूरोऽवि रयणितमनियरविगमओ पावए उदयं ॥ ४ ॥

---

च युद्धनिपतितखचररक्षणं च महाटवीनिपातनं च निजनगरागमनं च मन्त्रिसामन्तप्रमुखजनापमाननं च राज्यापहारदुःखं चोपकृतविद्याधरोपेक्षणं च नगरनिर्गमनं च भैरवपतनं प्रतीत्य समागमनं शिष्टमेतस्य, अथ महाकालेन भणितम्—अहो विरुद्धकारित्वं हतविधेः यदीदृशानसमसाहसधनाञ्जनान् विनिर्माय ईदृशतीक्ष्णदुःखभाजनं करोति, अथवा—

साहसधनानां हृदयं दुःखं गुरुकमपि सहते निपतत् । इतरेषां दुःखलवेनापि विघटयति जरच्छुक्तिपुटमिव ॥ १ ॥

यथा निपतति गुरुदुःखं तथैव सुखमपि संभवति तेषाम् । इतरेषां तुल्यसुखदुःखसंभवो नित्यकालमपि ॥ २ ॥

कस्य वा निरन्तरायं सुखं कस्यैव नापद आयन्ति । को दूषितः खलैर्न ? कस्य वा संस्थिता लक्ष्मीः ॥ ३ ॥

इति ज्ञात्वा त्यज शोकं पुनरपि तव वाञ्छितानि भविष्यन्ति । सूर्योऽपि रजनीतमोनिकरविगमतः प्राप्नोत्युदयम् ॥ ४ ॥

जं पुण तुमए भणियं भेरवपडणं करेमि मरणट्ठं । तं बुहजणपडिसिद्धं खत्तियधम्मे विरुद्धं च ॥ ५ ॥
जेण–बंभणसमणच्चिय मरणकज्जमब्भुज्जमंति नो धीरा । विहिविहडियंपि कज्जं घडंति ते बुद्धिविहवेणं ॥ ६ ॥
तहा–चत्तविसायपिसायं अणलसमविमुक्कमेक्करसं । अणुसरइ सिरी दूरं गयावि पुरिसं हरिसियव्व ॥ ७ ॥

तओ मए भणियं–भयवं ! विमूढचित्तलक्खो म्हि संपयं, न जाणामि जुत्ताजुत्तं न मुणामि उवायं न समीहेमि खत्तधम्मं न वियारेमि जणनिंदं न लक्खेमि सुहदुक्खं, सव्वहा कुलालदढदंडचालियचक्काधिरूढं व मम मणो न मणागंपि कत्थवि अवत्थाणं पावइ, तो भयवं ! तुमं चेव साहेहि, किं कायव्वं ? को वा उवाओ समीहियत्थसिद्धीए ?, महाकालेण भणियं–वच्छ ! पव्वज्जसु मम पव्वज्जं, आराहेसु चरणकमलं, अब्भस्सेसु जोगमग्गं, होहिंति गुरुभत्तीए मणोरहसिद्धीओ, तओ भय-

---

यत्पुनस्त्वया भणितं भैरवपतनं करोमि मरणार्थम् । तद्बुधजनप्रतिषिद्धं क्षत्रियधर्मे विरुद्धं च ॥ ५ ॥
येन—ब्राह्मणश्रमणा एव मरणकार्यमभ्युद्यच्छन्ति नो धीराः । विधिविघटितमपि कार्यं घटयन्ति ते बुद्धिविभवेन ॥ ६ ॥
तथा—त्यक्तविषादपिशाचमनलसमविमुक्तविक्रमैकरसम् । अनुसरति श्रीर्दूरं गताऽपि पुरुषं हर्षितेव ॥ ७ ॥

ततो मया भणितं–भगवन् ! विमूढचित्तलक्ष्योऽस्मि साम्प्रतं, न जानामि युक्तायुक्तं न जानामि उपायं न समीहे क्षत्रधर्मं न विचारयामि जननिन्दां न लक्षयामि सुखदुःखं, सर्वथा कुलालदृढदण्डचालितचक्राधिरूढमिव मम मनो न मनागपि कुत्राप्यवस्थानं प्राप्नोति, ततो भगवन् ! त्वमेव कथय किं कर्तव्यम् ? को वोपायः समीहितार्थसिद्धयै ?, महाकालेन भणितं–वत्स ! प्रपद्यस्व मम प्रव्रज्याम्, आराधय चरणकमलम्, (त्वं)अधीष्व योगमार्गं, भविष्यति गुरुभक्त्या मनोरथसिद्धयः, ततो भयसम्भ्रान्त इव शरणागत-



For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir





संमंतो इव मरणागयवच्छलं दालिद्दाभिभूओ इव कप्पपायवं महारोगपीडिओ इव परमवेज्जं पहीणचक्खुबलो इव पहदेसगं सव्वायरेण तमाराहिउं पवत्तो, दूरमागरिसियं च विणएण मए तस्स चित्तं, निउत्तोऽहमेक्को तेण नियरहस्सठाणेसु सिक्खाविओ निस्सेसाइं आगिट्ठिपमुहाइं कोऊहलाइं, अन्नया य पसत्थेसु तिहिनक्खत्तमुहुत्तेसु परमपमोयमुव्वहंतेण तेण एगंते उवइट्ठो मम तइलोक्कविजओ मंतो, कहिओ साहणविही जहा–अट्ठोत्तरसयपहाणखत्तिएहिं मसाणहुयासणो तप्पणिज्जो, कायव्वं दिसिदेवयाबलिवियरणं, पव्वहियव्वं अणवरयमंतसुमरणं, तओ एस सिज्झिहिई, काही य एगच्छत्तधरणियलरज्जदाणं, पडिवन्नो य मए विणयपणएण, समाढत्तो य साहिउं, गओ कलिंगपमुहेसु देसेसु, आरद्धो य जहालाभं खत्तियनरुत्तमेहिं होमो जाव एत्तियं कालंति ।

---

वत्सलं दारिद्र्याभिभूत इव कल्पपादपं महारोगपीडित इव परमवैद्यं प्रहीणचक्षुर्बल इव पथदेशकं सर्वादरेण तमाराधयितुं प्रवृत्तः, दूरमाकर्षितं च विनयेन मया तस्य चित्तं, नियुक्तोऽहमेकस्तेन निजरहस्यस्थानेषु शिक्षितो निःशेषाणि आकृष्टिप्रमुखानि कुतूहलानि, अन्यदा च प्रशस्तेषु तिथिनक्षत्रमुहूर्तेषु परमप्रमोदमुद्वहता तेन एकान्ते उपदिष्टो मम त्रैलोक्यविजयो मन्त्रः, कथितः साधनविधिः यथा–अष्टोत्तरशतप्रधानक्षत्रियैः श्मशानहुताशनस्तर्पणीयः, कर्तव्यं दिशिदेवताबलिवितरणं प्रवोढव्यमनवरतमन्त्रस्मरणं, तत एष सेत्स्यति, करिष्यति च एकच्छत्रधरणीतलराज्यदानं, प्रतिपन्नश्च मया विनयप्रणयेन, समारब्धश्च साधयितुम्, ततः कलिङ्गप्रमुखेषु देशेषु आरब्धश्च यथालाभं क्षत्रियनरोत्तमै र्होमो यावदियत्कालमिति ।



For Private and Personal Use Only

ता नरसेहर ! नरसिंघ जं तए पुच्छियं पुरा आसि । किं अप्पाणं निंदसि इणमो नणु कारणं तत्थ ॥ १ ॥
भयवसविसंठुलंगा सारंगा इव विचित्तकूडेहिं । जं सत्ता विद्दविया तमियाणिं दहइ मह हियं ॥ २ ॥
दुज्झाणकलुसबुद्धित्तणेण पुव्वं न याणियं एयं । तुह दंसणेण इण्हिं विवेयरयणं समुल्लसियं ॥ ३ ॥
नरसिंहेणं भणियं सच्चं पावं कयं तए भूरि । जं कीडियाणवि वहे पावं गुरु किमु नरिंदाणं ? ॥ ४ ॥
तेसिं विणासे जम्हा धम्मब्भंसो य सीमविगमो य । अवरोप्परं च जुज्झं विलयाजणसीलविलओ य ॥ ५ ॥
ता ठाणे तुह दुच्चरियगरिहणं धम्मगोयरा बुद्धी । एवं ठिएऽवि जलणप्पवेसणं तुज्झ नो जुत्तं ॥ ६ ॥
तित्थेसु वच्च कुरु देवपूयणं मुंच निंदियं भावं । पायच्छित्तं पडिवज्ज सुगुरुसयासे पयत्तेण ॥ ७ ॥

---

ततो नरशेखर ! नरसिंह ! यत्त्वया पृष्टं पुराऽऽसीत् । किमात्मानं निन्दसि ! इदं ननु कारणं तत्र ॥ १ ॥
भयवशविसंस्थूलाङ्गाः सारङ्गा इव विचित्रकूटैः । यत् सत्त्वानि विद्रवितानि तदिदानीं दहति मम हृदयम् ॥ २ ॥
दुर्ध्यानकलुषबुद्धित्वेन पूर्वं न ज्ञातमेतत् । तव दर्शनेनेदानीं विवेकरत्नं समुल्लसितम् ॥ ३ ॥
नरसिंहेन भणितं सत्यं पापं कृतं त्वया भूरि । यत्कीटिकानामपि वधे पापं गुरु किमु नरेन्द्राणाम् ? ॥ ४ ॥
तेषां विनाशे यस्माद्धर्मभ्रंशश्च सीमविगमश्च । परस्परं च युद्धं वनिताजनशीलविलयश्च ॥ ५ ॥
ततः स्थाने तव दुश्चरित्रगर्हणं धर्मगोचरा बुद्धिः । एवं स्थितेऽपि ज्वलनप्रवेशनं तव न युक्तम् ॥ ६ ॥
तीर्थेषु व्रज कुरु देवपूजनं मुञ्च निन्दितं भावम् । प्रायश्चित्तं प्रतिपद्यस्व सुगुरुसकाशे प्रयत्नेन ॥ ७ ॥



For Private and Personal Use Only

निंदसु पइक्खणं दुक्कयाइं निसुणेसु धम्मसत्थाइं । उत्तमसंसग्गिं कुणसु चयसु तिव्वं कसायं च ॥ ८ ॥
ईसाविसायमुच्छिद भिंद विसमविसयतरुनियरं । नियजीयनिव्विसेसं नीसेसं पेच्छ पाणिगणं ॥ ९ ॥
पसमरसं पिबसु सया दूरं परिहरसु खुद्दचरियाइं । जुत्ताजुत्तं वियारसु सव्वकज्जेसु जत्तेणं ॥ १० ॥
खणपरिणइधम्मत्तं चिंतेसु भवंमि सव्ववत्थूणं । नियसुकयदुकयसचिवत्तणं च लक्खेसु परजम्मे ॥ ११ ॥
इय जयमाणस्स सया सुद्धी तुज्झं भविस्सइ अवस्सं । जलणपवेसं सलभा कुणंति कुसला उ न कयावि ॥ १२ ॥

एवं संठविऊण मरणदुरज्झवसायाओ घोरसिवं जाव विरओ नरिंदो ताव पहयपडहमुरवपमुहतूरनिनायबहिरियदियंतरा विचित्तमणिभूसणकिरणकब्बुरियमसाणंगणा गयणाओ ओयरिया विज्जाहरा, परमपमोयमुव्वहंता निवडिया घोरसिवचरणेसु,

---

निन्द प्रतिक्षणं दुष्कृतानि निशृणु धर्मशास्त्राणि । उत्तमसंसर्गं कुरु त्यज तीव्रं कषायं च ॥ ८ ॥
ईर्ष्याविषादमुच्छिन्धि भिन्धि विषमविषयतरुनिकरम् । निजजीवनिर्विशेषं निःशेषं पश्य प्राणिगणम् ॥ ९ ॥
प्रशमरसं पिब सदा दूरं परिहर क्षुद्रचरितानि । युक्तायुक्तं विचारय सर्वकार्येषु यत्नेन ॥ १० ॥
क्षणपरिणतिधर्मत्वं चिन्तय भवे सर्ववस्तूनाम् । निजसुकृतदुष्कृतसचिवत्वं च लक्षय परजन्मनि ॥ ११ ॥
इति यतमानस्य सदा शुद्धिस्तव भविष्यति अवश्यम् । ज्वलनप्रवेशं शलभाः कुर्वन्ति कुशलास्तु न कदापि ॥ १२ ॥

एवं संस्थाप्य मरणदुरध्यवसायाद् घोरशिवं यावद् विरतो नरेन्द्रस्तावत् प्रहतपटहमुरजप्रमुखतूर्यनिनादबधिरितदिगन्तरा विचित्रमणिभूषणकिरणकर्बुरितश्मशानाङ्गना गगनादवतीर्णा विद्याधराः परमप्रमोदमुद्वहन्तो निपतिता घोरशिवचरणयोः, भणितुमारब्धाश्च–



For Private and Personal Use Only

भणिउमाढत्ता य-देव ! अम्हे गयणवल्लहपुराहिवविजयरायविज्जाहरिंदसुएण सिरिजयसेहररायकुमारेण पेसिया तुम्ह आणयणनिमित्तं, ता कुणह पसायं, आरुहह इमं समुद्धुयविजयवेजयंतीसहस्साभिरामं डज्झंतकसिणागरुकप्पूरपूरसुरहिधूवधूमंधयारियदिसाभोगं मणिकणगरयणरइयविचित्तविच्छित्तिभित्तिभागं कुसुमावयंसाभिहाणं वरविमाणं, घोरसिवेण भणियं-भो विज्जाहरा ! मुयह मम विसए पडिबंधं, अन्नोऽहमियाणिं विगयभोगपिवासो, विजणविहारेसु रण्णेसु जाया निवासबुद्धी बद्धा मिगकुलेसु सयणसंबंधसद्धा पलीणो मायामोहो जलणजालाकलावकवलियमिव पेच्छामि जीवलोयं, ता जहागयं गच्छह तुब्भे, जहादिट्ठं च से निवेएज्जहत्ति, विज्जाहरेहिं भणियं-मा भणह एयं, जओ जद्दिणाओ तुम्ह पासाओ गओ जयसेहरकुमारो तद्दिणादारब्भ जाओ रहनेउरचक्कवालपुरनाहेण सिरिसमरसिंघखेयराहिवइणा सह महासमरसंरंभो निवडिया अणेग-

देव ! वयं गगनवल्लभपुराधिपविजयराजविद्याधरेन्द्रसुतेन श्रीजयशेखरराजकुमारेण प्रेषितास्तवाऽऽनयननिमित्तं, तस्मात्कुरु प्रसादम्, आरोहत इदं समुद्धूतविजयवैजयन्तीसहस्राभिरामं दह्यमानकृष्णागुरुकर्पूरपूरसुरभिधूपधूमान्धकारितदिशाभोगं मणिकनकरत्नरचितविचित्रविच्छित्तिभित्तिभागं कुसुमावतंसाभिधानं वरविमानम्, घोरशिवेन भणितं-भो विद्याधराः ! मुञ्चत मम विषये प्रतिबन्धम्, अन्योऽहमिदानीं विगतभोगपिपासः, विजनविहारेष्वरण्येषु जाता निवासबुद्धिः बद्धा मृगकुलेषु स्वजनसम्बन्धश्रद्धा, प्रलीनो मायामोहो, ज्वलनज्वालाकलापकवलितमिव प्रेक्षे जीवलोकं, तस्माद्यथागतं गच्छत यूयं यथादिष्टं च तस्मै निवेदयतेति । विद्याधरैर्भणितं-मा भणतैतद् यतो यद्दिनात् तव पार्श्वाद् गतो जयशेखरकुमारस्तद्दिनादारभ्य जातो रथनूपुरचक्रवालपुरनाथेन श्रीसमरसिंहखेचराधिपतिना सह महासमरसंरम्भो निपतिता अनेक-

घोरशिवं प्रति जयशेखरस्य निमन्त्रणम् ॥



For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir





सुहडा कहमवि महाकट्ठेण निप्पिट्ठो सो अमरतेयाभिहाणो दुट्ठमित्तो, घडिया इयाणिं परोप्परं संधी, कयाइं अन्नोऽन्नघरेसु भोयणवत्थदाणाइं, अओ एत्तियकालं नियकज्जकोडिवावडत्तणेण संपयमेव नाओ तुम्ह अडविनिवाडणपामोक्खो वइयरो, कुमारेण तओ अच्चंतजायतिव्वसोगसंदब्भेण विसज्जिया अम्हे सव्वासु दिसासु तुम्हावलोयणत्थं, भणिया य-अरे सिग्घं जत्थ पेच्छह तं महाणुभावं तत्तो सव्वहा आणेज्जह, नन्नहा भोयणमहं करिस्सामि, तओ सव्वत्थ निउणं निउणं निरूवंता पत्ता एत्तियं भूमिभागं, एत्थ आगएहिं य निसामिओ तुम्ह सद्दो, को पुण भीसणे मसाणे एत्तियवेलं होहित्ति कोऊहलेण सुणंतेहिं कुमारपच्चाणयणकालागएहिं पुरा तुम्ह निसुयसद्दाणुमाणेण पच्चभिन्नायत्ति, ता कुणह पसायं जयसेहरकुमारजीवियदाणेण एत्थंतरे विण्णायपरमत्थेण भणियं पत्थिवेण-भो महासत्त ! परिचय फरुसभावं, पणयभंगभीरूणि भवंति सप्पुरिसहिययाणि

---

सुभटाः, कथमपि महाकष्टेन निष्पिष्टः सोऽमरतेजोऽभिधानो दुष्टमित्रः, घटिता इदानीं परस्परं सन्धिः, कृतानि अन्योऽन्यगृहेषु भोजनवस्त्रदानानि, अत इयत्कालं निजकार्यकोटिव्यापृतत्वेन साम्प्रतमेव ज्ञातस्तवाटवीनिपातनप्रमुखो व्यतिकरः, कुमारेण ततोऽत्यन्तजाततीव्रशोकसंदर्भेण विसर्जिता वयं सर्वासु दिक्षु तवावलोकनार्थं, भणिताश्च-अरे ! शीघ्रं यत्र प्रेक्षध्वं तं महानुभावं तस्मात् सर्वथाऽऽनयत, नान्यथा भोजनमहं करिष्यामि, ततः सर्वत्र निपुणं २ निरूपयन्तः प्राप्ता इयन्तं भूमिभागम्, अत्राऽऽगतैश्च निशमितस्तव शब्दः, कः पुनर्भीषणे श्मशाने इयद्वेलां भविष्यतीति कुतूहलेन शृण्वद्भिः कुमारप्रत्यानयनकालागतैः पुरा तव निश्रुतशब्दानुमानेन प्रत्यभिज्ञात इति, तस्मात् कुरुत प्रसादं जयशेखरकुमारजीवितदानेन । अत्रान्तरे विज्ञातपरमार्थेन भणितं पार्थिवेन-भो महासत्त्व ! परित्यज परुषभावं, प्रणयभङ्गभीरूणि भवन्ति सत्पुरुषहृदयानि



For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir





ता अंगीकरेसु एएसिं पत्थणं, घोरसिवेण भणियं-महाराय ! बाढं विरत्तं मम रज्जादीहिंतो चित्तं, गाढपावनिबंधणं ख एयं, रण्णा भणियं-मा मेवं जंपेसु, जओ—

सज्झायं दिसओ विसिट्ठमुणिणो पालितयस्साणिसं, सासितस्स विसिट्ठनीइ मणुए दाणाइं दिंतस्स य ।
धम्मो होइ निवस्स वस्समइणो रज्जेऽवि संचिट्ठओ, नो साहुस्स स सत्थवज्जियविहीजुत्तस्स गुत्तस्सवि ॥ १ ॥

घोरसिवेण भणियं- महाराय ! एवमेवं, राइणा भणियं-जइ एवं ता गच्छह तुब्भे, पडिच्छह [वि]जयसेहरकुमारपूयापडिवत्तिं, घोरसिवेण भणियं-महाराओ निवेयइ तं कीरइत्ति, तओ पहरिसिया विज्जाहरा, सायरं पणमिउं तेहिं राया विन्नतो-अहो महायस ! परमत्थेण तुब्भेहिं दिन्नं अम्ह पहुणो जीवियं, अह पमुक्ककवालपमुहकुलिंगोवगरणो विओगवेयणावसविस·

---

ततोऽङ्गीकुरु एतेषां प्रार्थनाम्, घोरशिवेन भणितं-महाराज ! बाढं विरक्तं मम राज्यादिभिश्चित्तं, गाढपापनिबन्धनं खलु एतत्, राज्ञा भणितं-मा मैवं जल्प, यतः—

सज्झायं दिशतो विशिष्टमुनीन् पालयतोऽनिशं, शासतो विशिष्टनीत्या मनुजान् दानानि ददतश्च ॥
धर्मो भवति नृपस्य वश्यते राज्येऽपि संतिष्ठतः, नो साधोः स शास्त्रवर्जितविधियुक्तस्य गुप्तस्यापि ॥ १ ॥

घोरशिवेन भणितं-महाराज ! एवमेवं, राज्ञा भणितं-यद्येवं तदा गच्छत यूयं, प्रतिपद्यस्व [वि]जयशेखरकुमारपूजाप्रतिपत्तिं, घोरशिवेन भणितं-महाराजो निवेदयति तत् क्रियते इति । ततः प्रहर्षिता विद्याधराः, सादरं प्रणम्य तै राजा विज्ञप्तः-अहो महायशः ! परमार्थेन युष्माभिर्दत्तमस्माकं प्रभोर्जीवितम्, अथ प्रमुक्तकपालप्रमुखकुलिङ्गोपकरणो वियोगवेदनावशविसर्पन्नयनाश्रु-



For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir





प्पमाणनयणंसुधाराधोयवयणो घोरसिवो गाढमालिंगिय नरवइं सगग्गयगिरं भणिउमाढत्तो-

कुब्भमतिमिरुब्भामियलोयणपसरेण तुज्झ अवरद्धं । जं किंपि पावमइणा तमियाणिं खमसु मम सव्वं ॥ १ ॥

सीसो इव दासो इव रिणिओ इव किंकरो इव तुहाहं । ता साहसु किं करणीयमुत्तरं राय नरसिंह ! ॥ २ ॥

रन्ना भणियं जइया नियरज्जसिरिं समग्गमणुहवसि । मम संतोसनिमित्तं तइया साहिज्जसु सवत्तं ॥ ३ ॥

एवं काहंति पयंपिऊण विज्जाहरेहिं परियरिओ । दिव्वविमाणारूढो सो झत्ति गओ जहाभिमयं ॥ ४ ॥

रायावि पत्ततिहुयणरायसिरिवित्थरं पिव सयलसुकयसंचयपत्तोवचयंपिव समत्थपसत्थतित्थदंसणपूयं पिव अप्पाणं मन्नंतो पाणिपइट्ठियखग्गरयणो गओ नियभवणं, निसण्णो सेज्जाए सुत्तो खणंतरं समागआ निद्दा, निसावसाणे य रणज्झणंतमणिने-

---

धाराधौतवदनो घोरशिवो गाढमालिङ्ग्य नरपतिं सगद्गदगिरं भणितुमारब्धः—

कुभ्रमतिमिरोद्भ्रामितलोचनप्रसरेण तवापराद्धम् । यत्किमपि पापमतिना तदिदानीं क्षमस्व मम सर्वम् ॥ १ ॥

शिष्य इव दास इव ऋणित इव किङ्कर इव तवाहम् । ततः कथय किं करणीयमुत्तरं राजन् ! नरसिंह ! ॥ २ ॥

राज्ञा भणितं यदा निजराज्यश्रियं समग्रमनुभविष्यसि । मम संतोषनिमित्तं तदा कथय स्ववृत्तम् ॥ ३ ॥

एवं करिष्यामीति प्रजल्प्य विद्याधरैः परिकरितः । दिव्यविमानारूढः स झगिति गतो यथाऽभिमतम् ॥ ४ ॥

राजाऽपि प्राप्तत्रिभुवनराज्यश्रीविस्तारमिव सकलसुकृतसंचयप्राप्तोपचयमिव समस्तप्रशस्ततीर्थदर्शनपूतमिव आत्मानं मन्यमानः पाणिप्रतिष्ठितखड्गरत्नो गतो निजभवनं, निषण्णः शय्यायां सुप्तः क्षणान्तरं समागता निद्रा, निशाऽवसाने च रणझणन्मणिनूपुर-



For Private and Personal Use Only

उरखाणुमग्गलग्गचक्कंगखलियचंकमणा अणायरसट्ठाणणिउत्तलट्ठकंचीकलावप्पमुहाभरणा सहरिसपधावियखुज्जिवामणिपुलिंदिपमोक्खचेडीयाचक्कवालपरिवुडा पविट्ठा चंपयमाला देवी, दिट्ठो राया निद्दावसनिस्सहसेज्जाविमुक्कसव्वंगोवंगो, भणियं चऽणाए–परिणीयपुत्तिओ इव हयसत्तू इव विढत्तदविणोव्व परिपढियसव्वसत्थोव्व निब्भयं सुयइ नरनाहो, अह खणंतरे पवज्जियाइं पाभाइयमंगलतूराइं पयडीहूयाइं दिसिमुहाइं, पढियं मागहेण–

लंघेउं विसमंपि दोसजलहिं गंजित्तु दोसायरं, गोत्तं पायडिउं सवीरियवसा चंकमिउं भीसणे ।
आसाअंगसमुब्भवेण महसा सारेण संपूरिउं, सूरो देव ! तुमं पिवोदयसिरिं पावेइ सोहावहं ॥ १ ॥

एवं च निसामित्ता पवुद्धो राया, चिंतिउमाढत्तो य–अहो सारस्सयंपिव वयणं जहावित्तवत्थुगब्भं कहं पढियं मागहेण ?,

---

रवानुमार्गलग्नचक्राङ्गस्खलितचङ्क्रमणा अनादरस्वस्थाननियुक्तलष्टकाञ्चीकलापप्रमुखाभरणा सहर्षप्रधावितकुब्जावामनापुलिन्द्रीप्रमुखचेटिकाचक्रवालपरिवृता प्रविष्टा चम्पकमाला देवी, दृष्टो राजा निद्रावशनिस्सहशय्याविमुक्तसर्वाङ्गोपाङ्गः, भणितं चानया–परिणीतपुत्रिक इव हतशत्रुरिव अर्जितद्रविण इव परिपठितसर्वशास्त्र इव निर्भयं स्वपिति नरनाथः, अथ क्षणान्तरे प्रवादितानि प्राभातिकमङ्गलतूर्याणि प्रकटीभूतानि दिङ्मुखानि, पठितं मागधेन—

लङ्घयित्वा विषममपि दोषजलधिं गञ्जित्वा दोषाकरम्, गोत्रं प्रकटय्य स्ववीर्यवशात् चङ्क्रमित्वा भीषणे ॥
आशाअङ्गसमुद्भवेन महसा सारेण संपूरयितुम्, सूर्यो[ रो ]देव ! त्वमिवोदयश्रियं प्राप्नोति शोभावहम् ॥ १ ॥

एवं च निशम्य प्रबुद्धो राजा, चिन्तयितुमारब्धश्च–अहो सारस्वतमिव वचनं यथावृत्तवस्तुगर्भं कथं पठितं मागधेन ? एवमेव

एवमेव पुणो पुणो परिभावेमाणो उट्ठिओ सयणाओ, अवलोइया य हरिसवसवियसंतनयणसहस्सपत्ता देवी चंपयमाला, पुट्ठा य सा आगमणपओयणं, भणियं च तीए-देव ! अज्ज पच्छिमद्धजामे सेसरयणीए सुहपसुत्ताए सुमिणयंमि सहसच्चिय वयणंमि पविसमाणो मए अनणुप्पमाणो मणिरयणमालालंकिओ पवणसमुद्धुयंचलाभिरामो फलिहमयडिंडिरपंडुरडंडोवसोहिओ महज्झओ दिट्ठो, एवंविहं च अदिट्ठपुव्वं सुमिणं पासिऊण पडिबुद्धा समाणी समागया तुम्ह पासंसि सुमिणसुभासुभफलजाणणत्थं, ता साहिउमरिहइ देवो एयस्स फलंति, रन्ना भणियं-देवि ! विसिट्ठो तए सुमिणो दिट्ठो, ता निच्छियं होही तुह चउसमुद्दमेहलावलयमहिमहिलापइस्स कुलकेउस्स पुत्तस्स लाभो, जं तुब्भे वयह अवितहमेयंति पडिवज्जिय निबद्धा देवीए उत्तरीयंमि निठ्ठुरा सउणगंठी, खणंतरं च मिहोकहाहिं विगमिय गया देवी नियभवणं, रायावि कयपाभाइयकायव्वो निस-

---

पुनः पुनः परिभावयन् उत्थितः शयनात्, अवलोकिता च हर्षवशविकसन्नयनसहस्रपत्रा देवी चम्पकमाला पृष्टा च साऽऽगमनप्रयोजनं, भणितं च तया-देव ! अद्य पश्चिमार्धयामे शेषरजन्यां सुखप्रसुप्तया स्वप्ने सहसैव वदने प्रविशन् मया अनणुप्रमाणो मणिरत्नमालाऽलङ्कृतः पवनसमुध्धूताञ्चलाभिरामः स्फटिकमयडिण्डिरपाण्डुरदंडोपशोभितो महाध्वजो दृष्टः, एवविधं चादृष्टपूर्वं स्वप्नं दृष्ट्वा प्रतिबुद्धा सती समागता तव पार्श्वे स्वप्नशुभाशुभफलज्ञानार्थं, तस्मात्कथयितुमर्हति देव एतस्य फलमिति, राज्ञा भणितं-देवि ! विशिष्टस्त्वया स्वप्नो दृष्टः, तस्मान्निश्चितं भविष्यति तव चतुःसमुद्रमेखलावलयमहीमहिलापतेः कुलकेतोः पुत्रस्य लाभः, यद् यूयं वदथ अवितथमेतदिति प्रतिपद्य निबद्धा देव्या उत्तरीये निष्ठुरा शकुनग्रन्थिः, क्षणान्तरं च मिथः कथाभिर्विगम्य गता देवी निजभवनं, राजाऽपि कृतप्राभातिककर्तव्यो निषण्णः



For Private and Personal Use Only

ण्णो सभामंडवंमि अह पढममेव गाढकोउहलाउलिज्जमाणमाणसा समागया बुद्धिसागरपमुहा मंतिणो, भूमितलविलुलियम-उलिमंडला निवडिया चरणेसु, दिन्नासणा निविट्ठा सट्ठाणेसु, विन्नविउमाढत्ता य-देव ! अज्ज चउजामावि सहस्सजामव्व कहमवि पभाया अम्ह रयणी घोरसिवमुणिवइयरोवलंभसमूसुगत्तणेणं, जइवि किंपि पसंतवयणावलोयणाइलिंगोवगया कज्ज-सिद्धी वट्टइ तहावि विसेसेण तुम्भेहिं साहिज्जमाणिं सोउमिच्छामो, ता पसियउ देवो रयणिवइयरनिवेयणेणंति, ताहे तेसिं वयणाणुरोहओ ईसिं विहसियं काउं जहा घोरसिवेण समं मसाणदेसंमि संपत्तो जह विन्नाओ छोभमायरमाणो जहा य सो भणिओ गिण्हसु सत्थं जह तेण कत्तिया वाहिया कंठे जह पडिरुद्धो बाहू सकत्तिओ जह महीयले निहओ जह उट्ठिओ पुणोऽविहु निप्फंदो जह हओ पच्छा सुरसुंदरीहिं खित्तो जह कुसुमभरो समागया देवी जह दिन्नो तीए वरो जह सा

---

सभामण्डपे, अथ प्रथममेव गाढकुतूहलाऽऽकुलायमानमानसाः समागता बुद्धिसारप्रमुखा मन्त्रिणः, भूमितलविलुठितमौलि-मण्डला निपतिताश्चरणयोः, दत्ताऽऽसना निविष्टाः स्वस्थानेषु, विज्ञपयितुमारब्धाश्च-देव ! अद्य चतुर्यामाऽपि सहस्रयामेव कथमपि प्रभाताऽस्माकं रजनी घोरशिवमुनिव्यतिकरोपलम्भसमुत्सुकत्वेन, यद्यपि किमपि प्रशान्तवदनावलोकनादिलिङ्गोपगता कार्यसिद्धिर्वर्तते तथाऽपि विशेषेण युष्माभिः कथ्यमानां श्रोतुमिच्छामः, तस्मात्प्रसीदतु देवो रजनीव्यतिकरनिवेदनेनेति, तदा तेषां वचनानुरोधाद् ईषद् विहसितं कृत्वा यथा घोरशिवेन समं श्मशानदेशे संप्राप्तो यथा विज्ञातः क्षोम[स्तम्भ]माचरन् यथा च स भणितो गृहाण शस्त्रं यथा तेन कर्त्रिका वाहिता कण्ठे यथा प्रतिरुद्धो बाहुः सकर्त्रिको यथा महीतले निहतो यथा उत्थितः पुनरपि हु निष्पन्दो यथा हतः पश्चात् सुरसुन्दरीभिः क्षिप्तो यथा कुसुमभरः समागता देवी यथा दत्तस्तया



For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir





अदंसणं पत्ता जहा घोरसिवो निव्वेयमुवगओ पट्ठिओ य मरणत्थं जह पुव्ववइयरो तेण संठिओ (निवेइओ) जह व संठविओ जह परिचियविज्जाहरविमाणमारुहिय सो गओ नमिउं संखेवेणं तह नरवरेण सिट्ठं समत्थंपि, सोच्चेमं हरिसिओ मंतिवग्गो, पयट्टिओ य नयरीए महंतूमवोत्ति ।

अह अन्नया कयाई चंपयमालाएँ रायमहिलाए । दुहिसत्तरक्खणंमी दीणाणाहाण दाणे य ॥ १ ॥

देवगुरुपूयणंमी पणईणं चिंतियत्थदाणे य । उप्पण्णो दोहलओ विसिट्ठगब्भाणुभावेण ॥ २ ॥ जुम्मं ।

चिंतेइ य सा एवं ताओ धन्नाओ अम्मयाउ इहं । इय पुन्नदोहलाओ जाओ गब्भं वहंति सुहं ॥ ३ ॥

एवं च अपुज्जंतदोहलयसंकप्पवसेण कसिणपक्खमयलंछणमुत्तिव्व किसत्तणमणुभविउं पवत्ता देवी । अन्नया य पुट्ठा नर-

---

वरो यथा साऽदर्शनं प्राप्ता यथा घोरशिवो निर्वेदमुपगतः प्रस्थितश्च मरणार्थं यथा पूर्वव्यतिकरस्तेन संस्थितः [निवेदितः] यथा वा संस्थापितो यथा परिचितविद्याधरविमानमारुह्य स गतो नत्वा संक्षेपेण तथा नरवरेण शिष्टं समस्तमपि, श्रुत्वेदं हर्षितो मन्त्रिवर्गः, प्रवर्तितश्च नगर्यां महोत्सव इति ।

अथान्यदा कदाचित् चम्पकमालाया राजमहिलायाः । दुःखिसत्त्वरक्षणे दीनानाथानां दाने च ॥ १ ॥

देवगुरुपूजने प्रणयिनां चिन्तितार्थदाने च । उत्पन्नो दोहदको विशिष्टगर्भानुभावेन ॥ २ ॥ [युग्मम्]

चिन्तयति च सैवं ता धन्या अम्बका इह । इति पूर्णदोहदा या गर्भं वहन्ति सुखम् ॥ ३ ॥

एवं च अपूर्यमाणदोहदकसंकल्पवशेन कृष्णपक्षमृगलाञ्छनमूर्तिरिव कृशत्वमनुभवितुं प्रवृत्ता देवी । अन्यदा च पृष्टा नरपतिना—



For Private and Personal Use Only

वइणा–देवि ! किमेवं पइदिणं किसत्तणं पावेसि ?, साहेसु एयकारणं, गाढनिबंधे सिट्ठं तीए नियमणवंछियं, ताहे परं पमोयमुव्वहंतेण विसेसयरं पूरियं नरिंदेण, माणियडोहला य धरणिव्व निहाणसंचयं दिसव्व नलिणीनाहं सुहंसुहेणं गब्भं वहमाणी देवी कालं गमेइ, अण्णया य पडिपुण्णेसु नवसु मासेसु अद्धट्ठमराइंदिएसु सुभेसु तिहिकरणनक्खत्तमुहुत्तेसु पुरंदरदिसिव्व दिणयरं कोमलपाडलकरपडिपुण्णसव्वंगोवंगसुंदरं पुत्तं पसूया । तओ सहरिसं गयाओ नरिंदभवणंमि चेडीयाओ, दिट्ठो राया भणिओ य देव ! बद्धाविज्जसि जएण विजएण य तुमं, जओ इयाणिं चेव पसूया देवी चंपयमाला, जाओ य समुज्जोतियसयलदिसामंडलो तेयरासिव्व पुत्तोत्ति, इमं च सोच्चा नरिंदेण दिन्नं तासिं भूरि पारिओसियं, कओ दासित्तविगमो, आहूया पहाणपुरिसा, समादिट्ठा य जहा पयट्टेह नीसेसनयरीए तियचउक्कचच्चरेसु खंदमुगुंदसुरिंदगयमुहमंदिरेसु य परममहूसवं,

---

देवि ! किमेवं प्रतिदिनं कृशत्वं प्राप्नोषि ? कथयैतत्कारण, गाढनिर्बन्धे शिष्टं तया निजमनोवाञ्छितम्, तदा परं प्रमोदमुद्वहता विशेषतरं पूरितं नरेन्द्रेण, मानितदोहदा च धरणिरिव निधानसंचयं दिगिव नलिनीनाथं सुखंसुखेन गर्भं वहन्ती देवी कालं गमयति, अन्यदा च प्रतिपूर्णेषु नवसु मासेषु अर्धाष्टमरात्रिन्दिवेषु शुभेषु तिथिकरणनक्षत्रमुहूर्तेषु पुरन्दरदिगिव दिनकरं कोमलपाटलकरप्रतिपूर्णसर्वाङ्गोपाङ्गसुन्दरं पुत्रं प्रसूता । ततः सहर्षं गता नरेन्द्रभवने चेटिकाः, दृष्टो राजा भणितश्च–देव ! वर्ध्यसे जयेन विजयेन च त्वम्, यत इदानीमेव प्रसूता देवी चम्पकमाला, जातश्च समुद्योतितसकलदिङ्मण्डलस्तेजोराशिरिव पुत्र इति, इदं च श्रुत्वा नरेन्द्रेण दत्तं ताभ्यो भूरि पारितोषिकं, कृतो दासीत्वविगमः, आहूताः प्रधानपुरुषाः, समादिष्टाश्च यथा प्रवर्तयध्वं निःशेषनगर्यां त्रिकचतुष्कचत्वरेषु स्कन्दमुकुन्दसुरेन्द्रगजमुखमन्दिरेषु च परममहोत्सवं,

वियरह अणिवारियपसरं कणयदाणं मुयह चारगाहिंतो जणंति वुत्ते जं देवो आणवेइत्ति भणिऊण पुरीए पारद्धं तेहिं वद्धावणयं ।

कहं चिय ?,—पंचप्पयारवन्नयविरइयसुपसत्थसत्थियसमूहं । विक्खित्तक्खयदोवापवालसोहंतमहिवीढं ॥ १ ॥

रहसपणच्चिरतरुणिगणवच्छत्थलतुट्टहारसिरिनियरं । अन्नोन्नावहरियपुण्णपत्तवट्टंतहलबोलं ॥ २ ॥

पडिभवणदारविरइयवंदणमालासहस्सरमणिज्जं । कमलपिहाणामलपुन्नकलसरेहंतगेहमुहं ॥ ३ ॥

वज्जंताउज्जसमुच्छलंतघणघोरघोसभरियदिसं । चिन्ताइरित्तदिज्जंतदविणसंतोसियत्थिगणं ॥ ४ ॥

पमुइयनीसेसजणं कुलथेरीकीरमाणमंगल्लं । इय नरवइकयतोसं वद्धावणयं कयं तत्थ ॥ ५ ॥

---

वितरताऽनिवारितप्रसरं कनकदानं, मुञ्चत चारकेभ्यो जनमिति उक्ते यद् देव आज्ञापयतीति भणित्वा पुर्यां प्रारब्धं तैर्वर्धनकम् (वर्धापनकम्) ।

कथमेव ? पञ्चप्रकारवर्णकविरचितसुप्रशस्तस्वस्तिकसमूहम् । विक्षिप्ताक्षतदूर्वाप्रवालशोभमानमहीपीठम् ॥ १ ॥

रभसप्रनृत्यत्तरुणीगणवक्षःस्थलत्रुटितहारश्रीनिकरम् । अन्योऽन्यापहृतपूर्णपात्रवर्तमानकोलाहलम् ॥ २ ॥

प्रतिभवनद्वारविरचितवन्दनमालासहस्ररमणीयम् । कमलपिधानामलपूर्णकलशराजद्गेहमुखम् ॥ ३ ॥

वाद्यमानातोद्यसमुच्छलद्घनघोरघोषभरितदिशम् । चिन्तातिरिक्तदीयमानद्रविणसन्तोषितार्थिगणम् ॥ ४ ॥

प्रमुदितनिःशेषजनं कुलस्थविराक्रियमाणमाङ्गल्यम् । इति नरपतिकृततोषं वर्धनकम् (वर्धापनकं) कृतं तत्र ॥ ५ ॥



For Private and Personal Use Only

एत्थंतरे मंतिसामंतसेणावइसत्थवाहपमुहा पहाणलोया गहियविविहतुरयरयणसंदणपमोक्खविसिट्ठवत्थुवित्थरा गंतूण नरवइं वद्धाविंसु ।

इओ य सो घोरसिवो विज्जाहरेहिं नेऊण समप्पिओ जयसेहरस्स कुमारस्स, तेणावि पिउणोव्व गुरुणोव्व तदागमणे कओ परममहूसवो, पुट्ठो य एसो पढमदंसणाओ आरब्भ सव्ववुत्तंतं, धरिओ ण्हाणविलेवणभोयणदिव्वंसुयदाणपुरस्सरं कइयवि वासराइं, अन्नदियहे चाउरंगसेणासण्णाहेण जयसेहरकुमारेण गंतूण सिरिभवणंमि नगरे विजयसेणरण्णो दंसिऊण जहावित्तं संसिऊण य दुद्दंतमंतिसामंतुस्सिखलदलणपुव्वं सो घोरसिवो सहत्थेण निवेसिओ रायपए, विजयसेणोऽवि ठविओ जुवरायत्ते, एवं कयकायव्वो जहागयं पडिगओ जयसेहरो, घोरसिवोऽवि पुव्वंपिव भुंजिउं पवत्तो नियरज्जंति । अन्नया तेण सुमरिऊण नर-

---

अत्रान्तरे मन्त्रिसामन्तसेनापतिसार्थवाहप्रमुखाः प्रधानलोका ! गृहीतविविधतुरगरत्नस्यन्दनप्रमुखविशिष्टवस्तुविस्तारा गत्वा नरपतिमवर्धयन् ।

इतश्च स घोरशिवो विद्याधरैर्नीत्वा समर्पितो जयशेखरस्य कुमारस्य, तेनापि पितुरिव गुरोरिव तदागमने कृतः परममहोत्सवः, पृष्टश्चैष प्रथमदर्शनादारभ्य सर्ववृत्तान्तं, धृतः स्नानविलेपनभोजनदिव्यांशुकदानपुरस्सरं कत्यपि वासराणि, अन्यदिवसे चातुरङ्गसेनासन्नाहेन[सनाथेन] जयशेखरकुमारेण गत्वा श्रीभवने नगरे विजयसेनराजस्य दर्शयित्वा यथावृत्तं शंसयित्वा च दुर्दान्तमन्त्रिसामन्तोच्छृङ्खलदलनपूर्वं स घोरशिवः स्वहस्तेन निवेशितो राजपदे, विजयसेनोऽपि स्थापितो युवराजत्वे, एवं कृतकर्तव्यो यथागतं प्रतिगतो जयशेखरः, घोरशिवोऽपि पूर्वमिव भोक्तुं प्रवृत्तो निजराज्यमिति । अन्यदा तेन स्मृत्वा नरसिंहनरपते राज्यसम्प्राप्ति-

श्री जयशेखर-साहाय्येन पुनः स्वराज्य-प्राप्तिः ॥



For Private and Personal Use Only

सिंहनरवइणो रज्जसंपत्तिवुत्तंतनिवेयणं पुव्वकालपडिवन्नं तक्खणंचिय विसज्जिया पहाणपुरिसा विसिट्ठपाहुडसमेया नरसिंघ-नरवइणो समीवे नियवइयरनिवेयणत्थं, पत्ता य ते अणवरयपयाणएहिं जयंतीनयरिपरिसरुद्देसं, निसुणिया य रन्ना, पवेसिया य महाविभूईए, समप्पियाइं रन्नो तेहिं पाहुडाइं, साहिओ घोरसिवनरवइसमाइट्ठवुत्तंतो, हरिसिओ राया, सम्माणिया उचि-यपडिवत्तीए, पेसिया य सट्ठाणंमि ।

अन्नदिवसे य समारद्धो कुमारस्स नामकरणमहूसवो, समाहूओ कुलथेरीजणो, तओ वज्जंतेसु चउव्विहाउज्जेसु नच्चंतेसु तरुणीसत्थेसु मंगलमुहलेसु वारविलयाजणेसु पढंतेसु मागहेसु पइट्ठियं कुमारस्स पुव्वपुरिसक्कमागयं नरविक्कमोत्ति नामं, कालक्कमेण य विइक्कंतबालभावो नीसेसविज्जापारयस्स लेहायरियस्स चेडयचक्कवालपरिवुडो महाविभूईए पढणत्थमुवणीओ,

---

वृत्तान्तनिवेदनं पूर्वकालप्रतिपन्नं तत्क्षणमेव विसर्जिताः प्रधानपुरुषा ! विशिष्टप्राभृतसमेता नरसिंहनरपतेः समीपे निजव्यतिकर-निवेदनार्थं, प्राप्ताश्च तेऽनवरतप्रयाणकैर्जयन्तीनगरीपरिसरोद्देशं, निश्रुताश्च राज्ञा, प्रवेशिताश्च महाविभूत्या, समर्पितानि राज्ञे तैः प्राभृतानि, कथितो घोरशिवनरपतिसमादिष्टवृत्तान्तः, हर्षितो राजा, संमानिता उचितप्रतिपत्त्या, प्रेषिताश्च स्वस्थाने ।

अन्यदिवसे च समारब्धः कुमारस्य नामकरणमहोत्सवः, समाहूतः कुलस्थविराजनः, ततो वाद्यमानेषु चतुर्विधाऽऽतोद्येषु नृत्यत्सु तरुणीसार्थेषु मङ्गलमुखरेषु वारवनिताजनेषु पठत्सु मागधेषु प्रतिष्ठितं कुमारस्य पूर्वपुरुषक्रमागतं नरविक्रम इति नाम, कालक्रमेण च व्यतिक्रान्तबालभावो निःशेषविद्यापारगस्य लेखाचार्यस्य चेटकचक्रवालपरिवृतो महाविभूत्या पठनार्थमुपनीतः,



For Private and Personal Use Only

अकालक्खेवेण य बुद्धिपगरिसेण जाओ एसो कलासु कुसलो, कहं चिय ?–

पत्तट्ठो धणुवेए कुसलो नीसेसमल्लविज्जासु । कयकिच्चो करणेसुं विचित्तचित्तेसु निउणमई ॥ १ ॥

परभावलक्खणम्मी वियक्खणो जाणओ समयसत्थे । पत्तच्छेये छेओ निम्माओ सद्दमग्गेसु ॥ २ ॥

निउणो मंतवियारे तंतपओगेसु कुसलबुद्धी य । पुरिसकरितुरयनारीगिहलक्खणबोहनिउणो य ॥ ३ ॥

आउज्जनट्टजूयप्पओगबहुभेयगेयचउरो य । किं बहुणा ?, सव्वत्थवि गुरुव्व सो पगरिसं पत्तो ॥ ४ ॥

एवं च गहियकलाकलावं कुमरं घेत्तूण गओ कलायरिओ नरवइसमीवं, अब्भुट्ठिओ परमायरेणं नरवइणा, दवावियासणो उवविट्ठो पुट्ठो य–किमागमणकारणंति, कलायरिएण भणियं–देव ! एस तुम्ह कुमारो गाहिओ नीसेसकलाओ सुरगुरुव्व पत्तो

---

अकालक्षेपेण च बुद्धिप्रकर्षेण जात एष कलासु कुशलः, कथमेव ?—

प्राप्तार्थो धनुर्वेदे कुशलो निःशेषमल्लविद्यासु । कृतकृत्यः करणेषु विचित्रचित्रेषु निपुणमतिः ॥ १ ॥

परभावलक्षणे विचक्षणो ज्ञातकः समयशास्त्रे । पत्रच्छेदे छेको निर्मातः शब्दमार्गेषु ॥ २ ॥

निपुणो मन्त्रविचारे तन्त्रप्रयोगेषु कुशलबुद्धिश्च । पुरुषकरितुरगनारीगृहलक्षणबोधनिपुणश्च ॥ ३ ॥

आतोद्यनृत्यद्यूतप्रयोगबहुभेदगेयचतुरश्च । किं बहुना सर्वत्रापि गुरुरिव स प्रकर्षं प्राप्तः ॥ ४ ॥

एवं च गृहीतकलाकलापं कुमारं गृहीत्वा गतः कलाचार्यो नरपतिसमीपम्, अभ्युत्थितः परमादरेण नरपतिना, दापितासन, उपविष्टः पृष्टश्च–किमागमनकारणमिति, कलाचार्येण भणितम्–देव ! एष युष्माकं कुमारो ग्राहितो निःशेषकलाः सुरगुरुरिव प्राप्तः



For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir





परमपगरिसं, न एत्तो उत्तरेण गाहियव्वमत्थि, ता अणुजाणेउ देवो अम्हे सट्ठाणगमणायत्ति, अह अकालक्खेवसिक्खियकुमार-कलाकोसलसवणपवड्ढमाणहरिसभरनिब्भरेण नरवइणा आचंदकालियसासणनिबद्धदसग्गहारदाणेण पवरचामीयररयणरासिविय-रणेण विसिट्ठवत्थफुल्लतंबोलसहत्थसमप्पणेण य सम्माणिऊण परमायरेणं पेसिओ कलायरिओ सट्ठाणं, कुमारोऽवि निउत्तो गयतु-रयवाहीयालीसु समकरणत्थं, सो य दढासणबंधधीरयाए महाबलेण य जाममेत्तेणवि समप्पुवणेइ सत्त मत्तसिंधुरे पवण--जवणवेगे परमजच्चे चउद्दस तुरंगमे अट्ठ महामल्ले य, एवं च राया असमबाहुबलेण य मइपगरिसेण य कलाकोसल्लेण य नयपालणेण य विणयपवत्तणेण य समओचियजाणणेण य असरिससाहसत्तणेण य मयणाइरेयरूवविभवेण य जणवच्छलत्तणेण य बाढमक्खित्त चित्तो कुमारमेक्कमेव पढावेइ मंगलपाढेसु लेहेइ चित्तभित्तिसु निसामेइ कित्तीसु गायावेइ गीएसु अभिणच्चावेइ नट्टेसु, अवि य—

---

परमप्रकर्षं, नैतस्मादुत्तरेण ग्राहयितव्यमस्ति, तस्मादनुजानातु देवोऽस्मान् स्वस्थानगमनायेति, अथाकालक्षेपशिक्षितकुमारकलाकौशल-श्रवणप्रवर्धमानहर्षभरनिर्भरेण नरपतिना आचन्द्रकालिकशासननिबद्धदशाग्रहारदानेन प्रवरचामीकररत्नराशिवितरणेन विशिष्टवस्त्रपुष्प-ताम्बूलस्वहस्तसमर्पणेन च संमान्य परमादरेण प्रेषितः कलाचार्यः स्वस्थानं, कुमारोऽपि नियुक्तो गजतुरगवाहीकालीषु समकरणार्थं, स च दृढासनबन्धधीरतया महाबलेन च याममात्रेणापि समुपनयति सप्तमत्तसिन्धुरान्, पवनजवनवेगान् परमजात्यान् चतुर्दश-तुरङ्गमान् अष्टमहामल्लान् च, एवं च राजा असमबाहुबलेन च मतिप्रकर्षेण च कलाकौशल्येन च नयपालनेन च विनयप्रवर्त-नेन च समयोचितज्ञानेन च असदृशसाहसत्वेन च मदनातिरेकरूपविभवेन च जनवात्सल्यत्वेन च बाढमाक्षिप्तचित्तः कुमारमेकमेव पाठयति मङ्गलपाठकेषु लेखयति चित्रभित्तिषु निशमयति कीर्तिषु गापयति गीतेषु अभिनर्तयति नृत्येषु, अपि च—



For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir





रूद्देवि दुट्ठसीलेऽवि रूवरहिएऽवि गुणविहीणेऽवि । लोओ पुत्ते पणयं किंपि अपुव्वं पयासेइ ॥ १ ॥
किं पुण चिरकालसमुब्भवंमि नीसेसगुणमणिनिहिंमि । सकुलब्भुद्धरणखमे न होज्ज नेहो नरवइस्स ? ॥ २ ॥

एगया य अत्थाणमंडवनिसन्नंमि नरवईमि पायपीढासीणे कुमारे नियनियट्ठाणनिविट्ठेसु मंतिसामंतेसु समारद्धंमि गायणजणे मणोहारिसरेण गेए पणच्चिरंमि चित्तपयक्खेवनट्टविहिवियक्खणे वारविलासिणीजणे पच्चासन्नमागंतूण विन्नत्तियं पडिहारेण–देव ! हरिसपुरनयराहिवइस्स देवसेणभूवइस्स दूओ दुवारे देवदरिसणं समीहेइ, राइणा भणियं–भद्द ! सिग्घं पवेसेहि, जं देवो आणवेइत्ति भणिऊण पवेसिओ अणेण, कया से उचियपडिवत्ती, पुट्ठो य आगमणप्पओयणं, दूएण जंपियं–देव ! हरिसपुरपहुणा देवसेणनरिंदेण रूवजोव्वणगुणोवहसियनागकन्नगाए नियसुयाए सीलवइनामाए वरनिरूवणत्थं पेसिओऽम्हि

---

रौद्रेऽपि दुष्टशीलेऽपि रूपरहितेऽपि गुणविहीनेऽपि । लोकः पुत्रे प्रणयं किमपि अपूर्वं प्रकाशयति ॥ १ ॥
किं पुनश्चिरकालसमुद्भवे निःशेषगुणमणिनिधौ । स्वकुलाभ्युद्धरणक्षमे न भवेत् स्नेहो नरपतेः ॥ २ ॥

एकदा च आस्थानमण्डपनिषण्णे नरपतौ पादपीठासीने कुमारे निजनिजस्थाननिविष्टेषु मन्त्रिसामन्तेषु समारब्धे गायनजने मनोहारिस्वरेण गेये प्रनृत्यति चित्रपदक्षेपनाट्यविधिविचक्षणे वारविलासिनीजने प्रत्यासन्नमागत्य विज्ञपितं प्रतिहारेण—देव ! हर्षपुरनगराधिपतेः देवसेनभूपतेर्दूतो द्वारे देवदर्शनं समीहते, राज्ञा भणितं–भद्र ! शीघ्रं प्रवेशय, यद्देव आज्ञापयतीति भणित्वा प्रवेशितोऽनेन, कृता तस्योचितप्रतिपत्तिः, पृष्टश्च आगमनप्रयोजनं, दूतेन भणितं–देव ! हर्षपुरप्रभुणा देवसेननरेन्द्रेण रूपयौवनगुणोपहसितनागकन्यकाया निजसुतायाः शीलवतीनाम्न्या वरनिरूपणार्थं प्रेषितोऽस्मि

७



For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir





तुम्ह पासे, रण्णा जंपियं-भद्द! पेच्छसु पायपीढासीणं कुमारं, परिभावेसु य किमणुरूवो वरो न वत्ति, दूएण भणियं-देव! विन्नवणीयं अत्थि किंची, रन्ना भणियं-विन्नवेसु, दूएण जंपियं-जइ एवं ता निसामेसु, अत्थि अम्ह नराहिवस्स देवसेणस्स समग्गवीरवग्गपहाणो कालमेहो नाम महामल्लो, तस्स य किं वन्निज्जइ बलपगरिसंमि ?, तथाहि-

दढकढिणकायवणमहिसजूहनाहेण सह सरोसेणं । सीसेण संपलग्गइ जुज्झेउं सो बलमएणं ॥ १ ॥

सुंडादंडे घेत्तूण पाणिणा मत्तदंतिनाहंपि । तद्दिणपसूयसुरहीसुयं व कड्ढेइ लीलाए ॥ २ ॥

भारसयसंकलंपि हु तोडइ हेलाएँ जुण्णरज्जुं व । नियमुट्ठिपहारेण य सिलंपि सो जज्जरं कुणइ ॥ ३ ॥

मंसस्स विरुद्धं किर लोहं एयंपि तत्थ विवरियं । जं नाराया खित्तावि तस्स बाहिंपि न छिबंति ॥ ४ ॥

---

युष्माकं पार्श्वे, राज्ञा जल्पितं-भद्र! पेक्षस्व पादपीठासीनं कुमारं, परिभावय च किमनुरूपो वरो नवेति ?, दूतेन भणितं-देव! विज्ञपनीयमस्ति किञ्चित्, राज्ञा भणितं-विज्ञपय, दूतेन जल्पितं-यद्येवं तर्हि निशमय-अस्ति अस्माकं नराधिपस्य देवसेनस्य समग्रवीरवर्गप्रधानः कालमेघो नाम महामल्लः, तस्य च किं वर्ण्यते बलप्रकर्षे ?, तथाहि—

दृढकठिनकायवनमहिषयूथनाथेन सह सरोषेण । शीर्षेण सम्प्रलगति योद्धुं स बलमदेन ॥ १ ॥

शुण्डादण्डे गृहीत्वा पाणिना मत्तदन्तिनाथमपि । तद्दिनप्रसूतसुरभिसुतमिव कृषति लीलया ॥ २ ॥

भारशतशृङ्खलामपि हु त्रोटयति हेलया जीर्णरज्जुमिव । निजमुष्टिप्रहारेण च शिलामपि स जर्जरां करोति ॥ ३ ॥

मांसस्य विरुद्धं किल लोहमेतदपि तत्र विपरीतम् । यन्नाराचाः क्षिप्ता अपि तस्य बहिरपि न स्पृशन्ति ॥ ४ ॥



For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



देशान्तरागतमल्लानां पराजयः कालमेघमल्लस्य सन्मानश्च॥

इय सो नियगाढबलावलेवओ तिहुयणं जरतणं व । मन्नंतो भमइ पुरे निरंकुसो मत्तहत्थिव्व ॥ ५ ॥

अन्नया य तस्स पसिद्धिमसहमाणा समागया देसंतराओ मल्ला, दिट्ठो तेहिं राया, साहियं आगमणपओयणं, समाहूओ य रण्णा कालमेहमल्लो, निवेइओ से तव्वइयरो, अब्भुवगयं तेण तेहिं समं जुज्झं, सज्जीहूया दोवि पक्खा, कओ अक्खाडओ, विरइया उभयपासेसु मंचा, निविट्ठो अवलोयणकोऊहलेण नीसेसअंतेउरसमेओ नरवई पुरपहाणपुरिसवग्गो य, समाढत्तं च भुयाहि य अड्डपायइयाहिं च बंधेहि य विसमकरणपओगेहिं मल्लेहिं सह तेण जुज्झिउं, खणंतरेण य दढमुट्ठिप्पहारेहिं निहया कालमेहेण देसंतरागया मल्ला, कओ लोगेण जयजयसद्दो, दिन्नं से नरिंदेण विजयपत्तं, सम्माणिओ विचित्तवत्थाभरणेहिं, गओ नियनियट्ठाणेसु नयरजणो, रायावि अंतेउरपरियरिओ संपत्तो नियमंदिरं, बीयदिवसे य सव्वालंकारविभूसिया काऊण देवीए

---

इति स निजगाढबलावलेपतस्त्रिभुवनं जरतृणमिव । मन्यमानो भ्राम्यति पुरे निरङ्कुशो मत्तहस्तीव ॥ ५ ॥

अन्यदा च तस्य प्रसिद्धिमसहमाना समागता देशान्तरान्मल्लाः, दृष्टस्तै राजा, कथितमागमनप्रयोजनम्, समाहूतश्च राज्ञा कालमेघमल्लः, निवेदितस्तस्य तद्व्यतिकरः, अभ्युपगतं तेन तैः समं युद्धं, सज्जीभूतौ द्वावपि पक्षौ, कृतोऽक्षाटकः, विरचिता उभयपार्श्वेषु मञ्चाः, निविष्टोऽवलोकनकुतूहलेन निःशेषान्तःपुरसमेतो नरपतिः पुरप्रधानपुरुषवर्गश्च, समारब्धं च भुजाभ्यां च अड्डप्राकृतिकाभिश्च बन्धैश्च विषमकरणप्रयोगैर्मल्लैः सह तेना योद्धुं, क्षणान्तरेण च दृढमुष्टिप्रहारैर्निहताः कालमेघेन देशान्तरागता मल्लाः, कृतो लोकेन जयजयशब्दः, दत्तं तस्मै नरेन्द्रेण विजयपत्रं, संमानितो विचित्रवस्त्राऽऽभरणैः, गतो निजनिजस्थानेषु नगरजनः, राजाऽपि अन्तःपुरपरिकरितः सम्प्राप्तो निजमन्दिरं, द्वितीयदिवसे च सर्वालङ्कारभूषिता कृत्वा देव्या



For Private and Personal Use Only

पउमावईए पेसिया सीलवई कण्णगा पिउणो पायवडणत्थं, चेडीचक्कवालपरिवुडा य सा पत्ता नरिंदसगासे, निवडिया चरणेसु, निवेसिया रण्णा उच्छंगे, पुच्छिया य–पुत्ति ! केण कारणेण आगयाऽसि ?, तीए भणियं–ताय ! तुम्ह पायपडण-निमित्तं अम्मगाय पेसियम्हि, राइणा चिंतियं--अहो वरजोगत्ति कलिऊणं नूणं देवीए पेसिया, ता किमियाणिं कायव्वं ?–

एक्कं चिय मह तणया परूढपणयाएँ अग्गमहिसीए । एसा वरस्स जोग्गा को पुण एयाएँ होज्ज वरो ? ॥ १ ॥

एयाए चित्तविर्त्ति अवियाणिय जइ वरेज्ज निवपुत्तो । जो वा सो वा आजम्म दुक्खिया होज्ज ता एसा ॥ २ ॥

इति परिभाविऊण पुच्छिया सा नरवइणा--पुत्ति ! को तुज्झ वरो दिज्जइ ? किं सुरूवो उयाहु समरंगणसवडंमुहसुहड-पडिक्खलणपयंडपरक्कमो किं वा समरभीरुओत्ति, तओ ईसिं विहसिऊण भणियं तीए--ताओ जाणइ, राइणा भणियं--पुत्ति !

---

पश्चात्तया प्रेषिता शीलवती कन्यका पितुः पादपतनार्थं, चेटीचक्रवालपरिवृता च सा प्राप्ता नरेन्द्रसकाशे निपतिता चरणयोः, निवेशिता राज्ञा उत्सङ्गे, पृष्टा च–पुत्रि ! केन कारणेनाऽऽगताऽसि ?, तया भणितं–तात ! युष्माकं पादपतननिमित्तमम्बया प्रेषिताऽस्मि, राज्ञा चिन्तितम्–अहो ! वरयोग्येति कलयित्वा नूनं देव्या प्रेषिता, तस्मात् किमिदानीं कर्तव्यम् ?

एकमेव मम तनया प्ररूढप्रणयाया अग्र्यमहिष्याः । एषा वरस्य योग्या कः पुनरेतस्या भवेद्वरः ॥ १ ॥

एतस्याश्चित्तवृत्तिमविज्ञाय यदि वृणुयान्नृपपुत्रः । यो वा स वा आजन्म दुःखिता भवेत् तदैषा ॥ २ ॥

इति परिभाव्य पृष्टा सा नरपतिना–पुत्रि ! कस्तव वरो दीयते ? किं सुरूप उताहो समराङ्गणसंमुखसुभटप्रतिस्खलनप्रचण्ड-पराक्रमः किं वा समरभीरुक इति ?, तत ईषद् विहस्य भणितं तया–तातो जानाति, राज्ञा भणितं पुत्रि !



For Private and Personal Use Only

अवरोहकयकज्जाइं न सुहावहाइं हौंति ता सम्ममणुचिंतिय भणसु, तीए भणियं–ताय ! जइ एवं ता जो एयं कालमेहमल्लं नियभुयबलेण महियपरक्कमं करेज्जा सो मम वरो होज्जत्ति, राइणा चिंतियं--अहो बलाणुरागिणी मम तणया, को पुण समत्थो एयस्स वइयरस्स ?, भणिया य सा–पुत्ति ! मा कुणसु एवं, अतुलमल्लो खु एसो, ता अन्नं वरं पत्थेसु, तीए भणियं--ताय ! जइ परं हुयासणो अन्नोत्ति, इय तीए निच्छयमुवलब्भ रन्ना पेसिया सव्वनरवईणं दूया, निवेयाविओ एस वुत्तंतो, एयं च अणब्भुवगच्छमाणा नरवइकुमारा एवं पयंपंति--

को बोहेज्ज कयंतं ? को वा हालाहलं विसं भक्खे ? । को कालमेहमल्लेण जुज्झिउं सह पवज्जेज्जा ? ॥ १ ॥
तेण न कज्जं रज्जेण किंपि न कज्जं च तीएँ भज्जाए । जा लब्भइ खित्तसंसयजीवियव्वेहिं कट्ठेण ॥ २ ॥

---

अवरोधकृतकार्याणि न सुखावहानि भवन्ति तस्मात् सम्यक् अनुचिन्त्य भण, तया भणितं–तात ! यद्येवं तर्हि य एनं कालमेघमल्लं निजभुजबलेन मथितपराक्रमं कुर्यात् स मम वरो भवेदिति, राज्ञा चिन्तितम्–अहो बलानुरागिणी मम तनया, कः पुनः समर्थ एतस्य व्यतिकरस्य ? भणिता च सा–पुत्रि ! मा कुरु एवम्, अतुलमल्लः खलु एषः, तस्मादन्यं वरं प्रार्थय, तया भणितं–तात ! यदि परं हुताशनोऽन्य इति, इति तस्या निश्चयमुपलभ्य राज्ञा प्रेषिताः सर्वनरपतीनां दूताः, निवेदित एष वृत्तान्तः, एतत् चानभ्युपगच्छन्तो नरपतिकुमारा एवं प्रजल्पन्ति—

को बोधयेत् कृतान्तं ? को वा हालाहलं विषं भक्षेत् । कः कालमेघमल्लेन योद्धुं सह प्रपद्येत ॥ १ ॥
तेन न कार्यं राज्येन किमपि न कार्यं च तया भार्यया । या लभ्यते क्षिप्तसंशयजीवितव्यैः कष्टेन ॥ २ ॥



For Private and Personal Use Only

एवं च निब्भग्गजणमणोरहेहिं असिद्धकज्जेहिं चेव पडिनियत्तिऊण दूएहिं रण्णो कहिओ मल्लजुज्झाणब्भुवगमगब्भो नीसेसनरेसरकुमारवुत्तंतो, तं च सोऊण गाढसोगाउलो जाओ देवसेणनरवई, एत्थंतरे विन्नत्तो मंतिसामंतेहिं-देव ! किमेवं उच्छन्नुच्छाहा होह, अज्जवि देवेण अनिरूविओ चिट्ठइ कुरुदेसाहिवनरवइसुओ नरविक्कमकुमारो, राइणा भणियं-सोऽवि एवं चेव परंमुहो हविस्सइ, मंतिसामंतेहिं वुत्तं-देव ! मा एवं जंपह, जओ अपोरिसे(परिमे)ओ तस्स बलपगरिसो असंभावणिज्जो निजुद्धपरिस्समो अणाइक्खणिज्जा मल्लविज्जाए कोसल्लया, किं बहुणा ?, नरसिंहनरवइसाहसतोसियाए भगवईए जो दिण्णो तस्स किं वन्नियव्वं ?, सरीरमेत्तेण चेव सो नररूवो सेसगुणेहिं निच्छियं देवोत्ति, एयं च समायण्णिऊण संजायहरिसेण देवेण पेसिओऽहं तुम्ह समीवे, ता देव ! एयं तं विण्णवणिज्जंति, राइणा भणियं-भद्द ! वररयणपुन्नकेसरिगुहव्व सेसाहिमत्थय-

---

एवं च निर्भाग्यजनमनोरथैरसिद्धकार्यैरेव प्रतिनिवृत्य दूतै राज्ञः कथितो मल्लयुद्धानभ्युपगमगर्भो निःशेषनरेश्वरकुमारवृत्तान्तः, तं च श्रुत्वा गाढशोकाकुलो जातो देवसेननरपतिः, अत्रान्तरे विज्ञप्तो मन्त्रिसामन्तैः-देव ! किमेवमुच्छन्नोत्साहा भवथ, अद्यापि देवेनानिरूपितस्तिष्ठति कुरुदेशाधिपनरपतिसुतो नरविक्रमकुमारः, राज्ञा भणितं-सोऽप्येवमेव पराङ्मुखो भविष्यति, मन्त्रिसामन्तै-रुक्तं-देव ! मैवं जल्पत यतोऽपौरुषेय[अपरिमेय]स्तस्य बलप्रकर्षोऽसंभावनीयो नियुद्धपरिश्रमोऽनाख्येय मल्लविद्यायां कौशल्यता, किं बहुना ? नरसिंहनरपतिसाहसतोषितया भगवत्या यो दत्तस्तस्य किं वर्णयितव्यं ? शरीरमात्रेणैव स नररूपः शेषगुणैर्निश्चितं देव इति, एतत् च समाकर्ण्य संजातहर्षेण देवेन प्रेषितोऽहं युष्माकं समीपे, तस्माद् देव ! एतत् तद् विज्ञापनीयमिति, राज्ञा भणितं-भद्र ! वररत्नपूर्णकेसरिगुहेव शेषाहिमस्तक-



For Private and Personal Use Only

मणिव्व समगं चिय भयहरिसे जणेइ विण्णत्तिया तुज्झ, दूएण कहियं–देव ! एवमेयं, तओ राइणा अद्धच्छीए पेच्छियं कुमारवयणं, कुमारोऽवि तक्खणं चिय उट्ठिओ निवडिओ रण्णो चरणेसु, भणिउमाढत्तो य–ताय ! समाइसह किं कीरउत्ति ?, राइणा भणियं–कुमार ! निसुणियं तए दूयवयणं ?, केरिसो वा तुह भुयदंडपरक्कमो ?, कुमारेण भणियं–ताओ जाणइ, तओ राइणा जोग्गयमुवलब्भ अब्भुवगयं मल्लजुज्झं, सम्माणिऊण सट्ठाणं पेसिओ दूओ, गओ जहागयं, निवेइयं च तेण जहावित्तं देवसेणरण्णो, जाओ से परमो पमोओ, निरूवियं परिणयणजोग्गं लग्गं, पेसिया य वरागरिसगा पहाणपुरिसा, अणवरयपयाणएहिं पत्ता जयंतीनयरिं, विरइओ आवासो, अणुरूवसमए दिट्ठो राया, सिट्ठं नियकज्जं, तओ पउरकरितुरगसुहडकोडिपरिवुडो पेसिओ तेहिं समं कुमारो, पत्तो कालक्कमेण हरिसपुरनगरसमीवे,

---

मणिरिव समकमेव भयहर्षौ जनयति विज्ञप्तिका तव, दूतेन कथितं–देव ! एवमेतत्, ततो राज्ञाऽर्धाक्ष्णा प्रेक्षितं कुमारवदनं, कुमारोऽपि तत्क्षणमेवोत्थितो निपतितो राज्ञश्चरणयोः, भणितुमारब्धश्च–तात ! समादिशत किं क्रियतामिति ?, राज्ञा भणितं–कुमार ! निश्रुतं त्वया दूतवचनम् ? कीदृशो वा तव भुजदण्डपराक्रमः ? कुमारेण भणितं–तातो जानाति, ततो राज्ञा योग्यतामुपलभ्याभ्युपगतं मल्लयुद्धं, संमान्य स्वस्थानं प्रेषितो दूतः, गतो यथागतं, निवेदितं च तेन यथावृत्तं देवसेनराजस्य, जातस्तस्य परमः प्रमोदः, निरूपितं परिणयनयोग्यं लग्नं, प्रेषिताश्च वराकर्षकाः प्रधानपुरुषाः, अनवरतप्रयाणकैः प्राप्ता जयन्तीनगरीं, विरचित आवासः, अनुरूपसमये दृष्टो राजा, शिष्टं निजकार्यं, ततः प्रचुरकरितुरगसुभटकोटिपरिवृतः प्रेषितस्तैः समं कुमारः, प्राप्तः कालक्रमेण हर्षपुरनगरसमीपे,



For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir





तो तं इंतं नाउं, रन्ना काराविओ पयत्तेणं । वंसग्गबद्धधयचिंधबंधुरो झत्ति नयरमहो ॥ १ ॥
विहिया नरेहिं कुसलेहि कुसुमछडाडोवसुंदरा मग्गा । खित्ता य कुसुमपयरा रणज्झणिरभमंतभमरउला ॥ २ ॥
नच्चंतनाडइज्जा तालायरकहगपवररमणिज्जा । जाया चउक्कच्चरचउम्मुहप्पमुहदेसावि ॥ ३ ॥
ठाणे ठाणे रइया दसद्धवण्णेहिं सुरभिकुसुमेहिं । विच्छित्तिविचित्ताओ लंबंतुद्दामदामाओ ॥ ४ ॥
भवणंपि तस्स जोग्गं निरूवियं सत्तभूमियं रम्मं । चंदणरसलिहियपसत्थसत्थियं थंभसयकलियं ॥ ५ ॥
तं नत्थि जं न विहियं कुमरागमणे पुरंमि नरवइणा । अहवा हरिसुक्करिसा पुरिसा किं किं न कुव्वंति ? ॥ ६ ॥
एत्थंतरे समागया पहाणपुरिसा, पणमिऊण भणियं तेहिं–देव ! वद्धाविज्जह तुब्भे पुरसमीवसमागयकुमारकुसलोदंत-

---

ततस्तमायन्तं ज्ञात्वा राज्ञा कारितः प्रयत्नेन । वंशाग्रबद्धध्वजचिंह्नबन्धुरो झटिति नगरमहः ॥ १ ॥
विहिता नरैः कुशलैः कुसुमच्छटाटोपसुन्दरा मार्गाः । क्षिप्ताश्च कुसुमप्रकरा रणद्ध्वनद्भ्रमद्भ्रमरकुलाः ॥ २ ॥
नृत्यन्नाटकीयाः तालाचरकथकप्रवररमणीयाः । जाताश्चतुष्कचत्वरचतुर्मुखप्रमुखदेशा अपि ॥ ३ ॥
स्थाने स्थाने रचिता दशार्धवर्णैः सुरभिकुसुमैः । व्युच्छितिविचित्रा लम्बमानोद्दामदामाः ॥ ४ ॥
भवनमपि तस्य योग्यं, निरूपितं सप्तभूमिकं रम्यम् । चन्दनरसलिखितप्रशस्तस्वस्तिकं स्तम्भशतकलितम् ॥ ५ ॥
तन्नास्ति यन्न विहितं कुमाराऽऽगमने पुरे नरपतिना । अथवा हर्षोत्कर्षाः पुरुषा किं किं न कुर्वन्ति ? ॥ ६ ॥
अत्रान्तरे समागताः प्रधानपुरुषाः, प्रणम्य भणितं तैः–देव ! वर्ध्यध्वे(वर्धाप्यध्वे) यूयं पुरसमीपसमागतकुमारकुशलोदन्त-



For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir





सवणेण, तओ समुद्धुयविजयवेजयंतीसहस्साभिरामाए चाउरंगिणीए सेणाए समेओ सियसिंधुरखंधाधिरूढो पडिपुण्णचंदमंडलाणुकारिणा छत्तेण धरिज्जमाणेणं निग्गओ राया कुमाराभिमुहं, खणंतरेण दिट्ठो कुमारो समालिंगिओ गाढपणयं पुट्ठो य सरीरारोग्गयं, दट्ठूण कुमारसरीरसंठाणसिरिं चिंतियं रण्णा–निच्छियं इयाणिं विणस्सइ कालमेहमल्लस्स बाहुबलमडप्फरोत्ति, अह मुहुत्तमेत्तमणुगच्छिय पुव्वनिउत्तनियनियट्ठाणेसु पेसिओ कुमारपरियरो, कुमारोऽवि विमुक्को तंमि चेव पासाए, दवावियाइं करितुरयाईणं जोग्गासणाइं, कुमारस्सवि कए पेसिया पउरवंजणभक्खभोयणसमिद्धा रसवई, कयं च अन्नंपि तक्कालोचियं करणिज्जं, आहूया य अवरण्हसमए पहाणपुरिसा, भणिया य–भो गंतूण निवेयह कुमारस्स जहा एसा अम्ह सुया बलाणुरागिणी, ता दंसेह कालमेहमल्लस्स विजएण नियसामत्थंति, जं देवो आणवेइत्ति भणिऊण ते गया कुमारसमीवे,

श्रवणेन, ततः समुध्धूतविजयवैजयन्तीसहस्राभिरामया चतुरङ्गिण्या सेनया समेतः सितसिन्धुरस्कन्धाधिरूढः प्रतिपूर्णचन्द्रमण्डलानुकारिणा छत्रेण धार्यमाणेन निर्गतो राजा कुमाराभिमुखं, क्षणान्तरेण दृष्टः कुमारः समालिङ्गितो गाढप्रणयं पृष्टश्च शरीरारोग्यताम्, दृष्ट्वा कुमारशरीरसंस्थानश्रियं चिन्तितं राज्ञा–निश्चितमिदानीं विनश्यति कालमेघमल्लस्य बाहुबलाभिमानमिति, अथ मुहूर्तमात्रमनुगम्य पूर्वनियुक्तनिजनिजस्थानेषु प्रेषितः कुमारपरिकरः, कुमारोऽपि विमुक्तस्तस्मिन्नेव प्रासादे, दापितानि करितुरगादीनां योग्याशनानि, कुमारस्यापि कृते प्रेषिता प्रचुरव्यञ्जनभक्ष्यभोजनसमृद्धा रसवती, कृतं च अन्यदपि तत्कालोचितं करणीयम्, आहूताश्चापराह्णसमये प्रधानपुरुषा भणिताश्च–भो गत्वा निवेदयत कुमारस्य यथा एषाऽस्माकं सुता बलानुरागिणी, तस्माद्दर्शयत कालमेघमल्लस्य विजयेन निजसामर्थ्यमिति, यद्देव आज्ञापयतीति भणित्वा ते गताः कुमारसमीपे,



For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir





निवेइओ तस्स नीसेसवइयरो, अब्भुवगओ कुमारेण, ततो बीयदिवसे आढत्तो अक्खाडयपरिक्खेवो निबद्धा मंचा परमकोऊहलाउलिज्जमाणमाणसो मिलिओ नयरजणो, ठिओ मंचंमि संतेउरो नरवई, आरूढा य एक्कदेसंमि चेडीचक्कवालपरिवुडा पाणिपइट्ठियलट्ठपप्फुल्लफुल्लमाला सीलम(व)ई रायसुया, पडिक्खलिओ सव्वत्थ जणसंचारो, कओ अंगरक्खेहिं परिक्खेवो, वज्जियं पलयकालगज्जंतपक्खुहियपुक्खलावत्तपगज्जिररवगंभीरं चउव्विहमाउज्जं, जाओ अवसरो, मंचाओ तओ कुमारो गाढुप्पीडियनियंसियकडिल्लो दढबद्धकेसपासो पमुक्काभरणसंभारो कुलथेरीकयरक्खो जलणुब्भडगुरुपयावदुप्पेक्खो संनिहियपाडिहेरोव्व भासुरो झत्ति अवयरिओ तहा—

कंठतडुब्भडपरिहियपयतलविलुलंतविमलवणमालो । आबद्धमल्लवलओ गज्जंतो पलयमेहोव्व ॥ १ ॥

---

निवेदितस्तस्य निःशेषव्यतिकरः, अभ्युपगतः कुमारेण, ततो द्वितीयदिवसे आरब्धोऽक्षाटकपरिक्षेपो निबद्धा मञ्चाः परमकुतूहलाकुलायमानमानसो मिलितो नगरजनः, स्थितो मञ्चे सान्तःपुरो नरपतिः, आरूढा चैकदेशे चेटीचक्रवालपरिवृता पाणिप्रतिष्ठितलष्टप्रफुल्लपुष्पमाला शीलवती राजसुता, प्रतिस्खलितः सर्वत्र जनसञ्चारः, कृतोऽङ्गरक्षकैः परिक्षेपः, वर्जितं (वादितं) प्रलयकालगर्जत्प्रक्षुभितपुष्करावर्तप्रगार्जितरवगम्भीरं चतुर्विधाऽऽतोद्यं, जातोऽवसरः, मञ्चात् ततः कुमारो गाढोत्पीडितपरिहितकटिवस्त्रो(वान्) दृढबद्धकेशपाशः प्रमुक्ताऽऽभरणसंभारः कुलस्थविराकृतरक्षो ज्वलनोद्भटगुरुप्रतापदुष्प्रेक्ष्यः सन्निहितप्रातिहार्य इव भासुरो झटिति अवतरितः, तथा—

कण्ठतटोद्भटपरिहितपदतलविलुठद्विमलवनमालः । आबद्धमल्लवलयो गर्जन् प्रलयमेघ इव ॥ १ ॥



For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



मयभिंभलरत्तच्छो गव्वुद्धुरकंधरो तुरियचवलं । पेच्छयजणपरियरिओ संपत्तो कालमेहोवि ॥ २ ॥
रे मल्ल ! मेल्लसु लहुं पुव्वज्जियविजयगव्वमेत्ताहे । अणुसरसु मम्मं सिग्घं अह भणिओ सो कुमारेण ॥ ३ ॥
सोउं कुमारवयणं जरोव्व गव्वो झडत्ति तस्स गओ । अणुचिंतिउं च लग्गो जुत्ताजुत्तं सबुद्धीए ॥ ४ ॥
कहं ?—जइ एस मए विजिओ एयजणाओ तहावि नो कुसलं । अह एएण जिओऽहं वित्तिच्छेओ तओऽवस्सं ॥ ५ ॥
अतुलबलविक्कमस्स उ इमस्स विजएऽवि मज्झ संदेहो । ता उभयपासरज्जुव्व संकडं एयमावडियं ॥ ६ ॥
इय बहुभेयविकप्पणवसाउलिज्जंतचित्तवित्तिस्स । फुट्टं तडत्ति हियं तस्स कुमित्तस्स व रहस्सं ॥ ७ ॥
तओ जाओ कलयलो, उग्घोसियं च जणेण—अहो महप्पभावं दंसणं कुमारस्स, जेणावलोयणमेत्तेणवि वज्जगंठिव्व निट्ठुरं

---

मदविह्वलरक्ताक्षो गर्वोद्धुरकन्धरस्त्वरितचपलम् । प्रेक्षकजनपरिकरितः सम्प्राप्तः कालमेघोऽपि ॥ २ ॥
रे मल्ल ! मुञ्च लघु पूर्वार्जितविजयगर्वम् एतस्मात् । अनुसर मम शीघ्रमथ भणितः स कुमारेण ॥ ३ ॥
श्रुत्वा कुमारवचनं ज्वर इव गर्वो झटिति तस्य गतः । अनुचिन्तयितुं च लग्नो युक्तायुक्तं स्वबुद्ध्या ॥ ४ ॥
कथम् ?—यद्येष मया विजित एतज्जनात् तथापि न कुशलम् । अथैतेन जितोऽहं वृत्तिच्छेदस्ततोऽवश्यम् ॥ ५ ॥
अतुलबलविक्रमस्य तु अस्य विजयेऽपि मम संदेहः । तस्मादुभयपार्श्वरज्जुरिव सङ्कटमेतदापतितम् ॥ ६ ॥
इति बहुभेदविकल्पनवशाऽऽकुलायमानचित्तवृत्तेः । स्फुटितं तडेति हृदयं तस्य कुमित्रस्येव रहस्यम् ॥ ७ ॥
ततो जातः कलकलः, उद्घोषितं च जनेन—अहो महाप्रभावं दर्शनं कुमारस्य, येनावलोकनमात्रेणापि वज्रग्रन्थिरिव निष्ठुरं

श्री· नरविक्रम- दर्शनेमात्रेण कालमेघ-महामल्लस्य पञ्चत्व-गमनम् ॥



For Private and Personal Use Only

फुट्टं तडत्ति हिययमेयस्स, ता जयइ सव्वहा कुमारो, एत्थंतरे ओयरिऊण मंचाओ चेडीजणपरिवुडाए सीलमईए खित्ता कुमारकंठदेसे समं नियचित्तवित्तीए वरमाला, पवज्जियाइं असंखघोससंखोभियभवणाइं मंगलतूराइं, जाओ णयरे पमोओ, तुट्ठो राया सह मंतिसामंतेहिं, पारद्धो विवाहो महाविभूईए उभयपक्खपरितोसेणं, निव्वत्तिए य तंमि—

पगलंतमयजलुब्भडकरडतडुद्दामभमिरभमराणं । सुहलक्खणंकियाणं पंचसयाइं गइंदाणं ॥ १ ॥

मणपवणजविणवेगाण जच्चतुरंगाण वंकगीवाणं । बारस चेव सहस्सा रहाण दो तुंगसिंगाणं ॥ २ ॥

कणगस्स तीस कोडी चीणंसुयपमुहवत्थरासीओ । दिन्नाओ कुमारस्स पाणिस्स विमोयणे रन्ना ॥ ३ ॥

कयमन्नंपि सविसेसं कायव्वं, जाओ अवरोप्परं पणयभावो । अवरवासरे य पेसिया कुमारेण पहाणपुरिसा देवसेणनर-

---

स्फुटितं तडेति हृदयमेतस्य, तस्माज्जयति सर्वथा कुमारः, अत्रान्तरे अवतीर्य मञ्चाच्चेटीजनपरिवृतया शीलवत्या क्षिप्ता कुमारकण्ठदेशे समं निजचित्तवृत्त्या वरमाला, प्रवादितानि असंख्यघोषसंक्षोभितभवनानि मङ्गलतूर्याणि, जातो नगरे प्रमोदः, तुष्टो राजा सह मन्त्रिसामन्तैः, प्रारब्धो विवाहो महाविभूत्या उभयपक्षपरितोषेण, निवर्तिते च तस्मिन्—

प्रगलन्मदजलोद्भटकरटतटोद्दामभ्रमद्भ्रमराणाम् । शुभलक्षणाङ्कितानां पञ्चशतानि गजेन्द्राणाम् ॥ १ ॥

मनपवनजविनवेगानां जात्यतुरङ्गाणां वङ्कग्रीवाणाम् । द्वादश एव सहस्रा रथानां द्वौ तुङ्गशृङ्गाणाम् ॥ २ ॥

कनकस्य त्रिंशत्कोटिः चीनांशुकप्रमुखवस्त्रराशयः । दत्ताः कुमारस्य पाणेर्विमोचने राजा ॥ ३ ॥

कृतमन्यदपि सविशेषं कर्तव्यम्, जातः परस्परं प्रणयभावः । अपरवासरे च प्रेषिताः कुमारेण प्रधानपुरुषा, देवसेननरपतेः

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir





वइस्स पासे नियट्ठाणगमणाणुन्नागहणनिमित्तं, गंतूण निवेइयं तेहिं नरवइस्स, तओ देवसेणेण पुणरवि सम्माणिओ पहाण-वत्थुसमप्पणेण कुमारो, निरूवियं गमणजोग्गं दिणं, निउत्ता दंडनायगा अणुगमणत्थं, अह पसत्थवासरे ससुरप्पभिईण कयमुचियकायव्वो पत्थिओ कुमारो हरिकरिनरनियरसमेओ सनयराभिमुहं । एत्थंतरे—

सव्वालंकारधरिं सीलवइं चेडियाजणसमेयं । लच्छिंव कुमारपुरो काउं रन्ना भणियमेयं ॥ १ ॥
पुत्ति ! पवित्तं सीलं पालेज्जसु मा करेज्जसु कुसंगं । अणुवत्तिज्जसु गुरुजणमवणिज्जसु दुव्विणयभावं ॥ २ ॥
सेविज्जसु नयमग्गं मियमहुरक्खरगिरं वएज्जासि । आराहेज्जसु सपियं "देवो भत्ता कुलवहूणं" ॥ ३ ॥
कुमरोऽवि इमं वुत्तो एसा एक्का सुया ममं इट्ठा । छायव्व सहयरी जह हवइ सया तह तए किच्चं ॥ ४ ॥

---

पार्श्वे निजस्थानगमनानुज्ञाग्रहणनिमित्तं, गत्वा निवेदितं तैर्नरपतेः, ततो देवसेनेन पुनरपि संमानितः प्रधानवस्तुसमर्पणेन कुमारः, निरूपितं गमनयोग्यं दिनं, नियुक्ता दण्डनायका अनुगमनार्थम्, अथ प्रशस्तवासरे श्वशुरप्रभृतीनां कृतोचितकर्तव्यः प्रस्थितः कुमारो हरिकरिनरनिकरसमेतः स्वनगराभिमुखम् । अत्रान्तरे—

सर्वालङ्कारधारीं शीलवतीं चेटिकाजनसमेताम् । लक्ष्मीमिव कुमारपुरः कृत्वा राज्ञा भणितमेतत् ॥ १ ॥
पुत्रि ! पवित्रं शीलं पालयेः मा कुर्याः [कार्षीः] कुसङ्गम् । अनुवर्तेथा गुरुजनमपनयेर्दुर्विनयभावम् ॥ २ ॥
सेवस्व नयमार्गं मितमधुराक्षरगिरं वदेः । आराधयेः स्वप्रियं "देवो भर्ता कुलवधूनाम्" ॥ ३ ॥
कुमारोऽपि इदमुक्तः एषा एका सुता ममेष्टा । छायेव सहचरी यथा भवति सदा तथा त्वया कृत्यम् ॥ ४ ॥

८



For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir





इय सिक्खविउं राया धूयं विरहग्गिदूमियसरीरो । अणुगमिऊण कुमारं नियनयराभिमुहमह चलिओ ॥ ५ ॥

कुमारोऽवि पेच्छंतो नगनगरागरगामकाणणरमणिज्जं मेइणिं साहिंतो विसमपल्लीनिलीणे भिल्लाहिवइणो पयट्टंतो पुव-नीईओ अवलोयंतो तावसजणनिसेविए अणवरयडज्झंतघयमहुसमिहमहोसहिसमुच्छलंतबहलधूमपडलकयमेहसंकसिहंडितं-डवाडंबररमणिज्जे आसमपए, पइदिणपयाणएहिं संपत्तो जयंतीए नयरीए बाहिरुज्जाणे, वद्धाविओ नरसिंघनरवई, कारा-विया नयरसोहा, जाया समुद्धुयविचित्तचीणंसुयचिंधबंधुरा रायमग्गा, अह पसत्थंमि मुहुत्ते अंतेउरपुरप्पहाणजणपरियरिएण नरिंदेण अणुगम्ममाणो नरविक्कमो नयरिं पविसिउमारद्धो, ठिया य रायमग्गोभयपासपासायमालासु तदवलोयणकोऊहलाउला कुसुमुम्मिस्सक्खयहत्था लोयसत्था, जाया य कुमाररूवपलोयणपाउब्भवंतविविहवियाराण जुवईजणाण विब्भमा । कहं चिय ?—

---

इति शिक्षयित्वा राजा दुहितरं विरहाग्निदूनशरीरः । अनुगम्य कुमारं निजनगराभिमुखमथ चलितः ॥ ५ ॥

कुमारोऽपि प्रेक्षमाणो नगनगराकरग्रामकाननरमणीयां मेदिनीं साधयन् विषमपल्लीनिलीनान् भिल्लाधिपतीन् प्रवर्तयमानः पूर्व-नीतीरवलोकयन् तापसजननिषेवितान् अनवरतदह्यमानघृतमधुसमिन्महौषधिसमुच्छलद्बहुलधूमपटलकृतमेघशङ्काशिखण्डिताण्डवाड-म्बररमणीयान् आश्रमपदान् प्रतिदिनप्रयाणकैः सम्प्राप्तो जयन्त्याः नगर्याः बहिरुद्याने, वर्धितः ( वर्धापितः ). नरसिंहनरपतिः, कारिता नगरशोभा, जाता समुद्धूतविचित्रचीनांशुकचिह्नबन्धुरा राजमार्गाः, अथ प्रशस्ते मुहूर्त्ते अन्तःपुरपुरप्रधानजनपरिकरितेन नरेन्द्रेण अनुगम्यमानो नरविक्रमो नगरीं प्रवेष्टुमारब्धः, स्थिताश्च राजमार्गोभयपार्श्वप्रासादमालासु तदवलोकनकुतूहलाकुलाः, कुसुमोन्मिश्राक्षतहस्ता लोकसार्थाः, जाताश्च कुमाररूपप्रलोकनप्रादुर्भवद्विविधविकाराणां युवतिजनानां विभ्रमाः । कथमेव ?—



For Private and Personal Use Only

नगर-नारीणां विस्मय-पूर्वकमव-लोकनम् ॥

दट्ठूण कावि पडिजुवइकंतगंडत्थलंतसंकंतं । कुसुमक्खएहिं ताडइ ईसाइंतिव्व रायसुयं ॥ १ ॥
पवियंभियकुसुमाउहवसवियसियलोयणा पलोयंती । न मुणइ सकडिल्लंपिहु पवणेणायट्टियं अवरा ॥ २ ॥
कुमरपलोयणवामूढमाणसा निच्चला गिहग्गगया । अनिलचलंचलचूडा काविहु रेहइ पडायव्व ॥ ३ ॥
अम्मे ! जामि पलोइदुं(उं) दसदिसं कोलाहलो सुव्वए । सामा गच्छ मयच्छि ! निच्छियमिमो सो एइ रण्णो सुओ ॥४॥
दिट्ठे जम्मि पणट्ठनिव्वुइमणा मुद्धावरा मग्ग(ङ्ग)णा । वट्टंती विव सासुयाऍ पुरओ अन्ना इमं जंपइ ॥ ५ ॥
इय एवं सविलासाहिं नयरनारीहिं सच्चविज्जंतो । कुमरो वहूसमेओ संपत्तो निययभवणंमि ॥ ६ ॥
तहिं गएण य कया सविसेसं गुरुजणाण पणामाइपडिवत्ती, समप्पिओ य रण्णा अंबरतलमणुलिहंतो नियyभवणनि-

---

दृष्ट्वा कापि प्रतियुवतिकान्तगण्डस्थलांतसंक्रान्तम् । कुसुमाक्षतैस्ताडयति ईर्ष्यन्तीव राजसुतम् ॥ १ ॥
प्रविजृम्भितकुसुमायुधवशविकसितलोचना प्रलोकयन्ती । न जानाति स्वकटिल्लमपि हु पवनेनावर्तितमपरा ॥ २ ॥
कुमारप्रलोकनव्यामूढमानसा निश्चला गृहाग्रगता । अनिलचलाञ्चलचूडा काऽपि हु राजते पताकेव ॥ ३ ॥
अम्ब ! यामि प्रलोकयितुं दशदिक्षु कोलाहलः श्रूयते । सामा गच्छ मृगाक्षि ! निश्चितमयं स ऐति राज्ञः सुतः ॥ ४ ॥
दृष्टे यस्मिन् प्रणष्टनिवृत्तिमना मुग्धापरा अङ्गना । वर्तमानेव श्वश्र्वाः पुरतोऽन्या इदं जल्पति ॥ ५ ॥
इत्येवं सविलासाभिर्नगरनारीभिर्दृश्यमानः । कुमारो वधूसमेतः सम्प्राप्तो निजकभवने ॥ ६ ॥
तत्र गतेन च कृता सविशेषं गुरुजनानां प्रणामादिप्रतिपत्तिः, समर्पितश्च राज्ञा अम्बरतलमनुलिहन् निजकभवननिर्विशेषः



For Private and Personal Use Only

व्विसेसो पासाओ कुमारस्स, तत्थ ठिओ य सो सक्को इव देवलोए धरणो इव पायाले विसयसुहं भुंजंतो कालं गमेइ, अन्तरं-तरा य तुरगवाहियालिं च मत्तसिंधुरदमणं च मल्लजुज्झब्भसणं च राहावेहकोऊहलं च धम्मसत्थसवणं च देसंतरनयरवत्ता-निसामणं च गुरुचरणनिसेवणं च मग्गणजणमणोरहपूरणं च करेइत्ति । अह कुमारस्स कालक्कमेण सीलवईए सह विसयसुहं भुंजमाणस्स कुसुमसेहरविजयसेहरनामाणो जाया दोन्नि पुत्ता, ते य वल्लहा पियामहस्स, विविहप्पयारेहिं उवला-लिज्जमाणा वड्ढंति । अन्नया राइणो समीवे निसन्नंमि नरविक्कमे जहोचियट्ठाणनिविट्ठंमि सेवगजणे मयभरसंभरियसच्छंद-जमुणावणविहारो तडयडारावतोडियनिविडघडणुत्तरतारसयप्पमाणलोहनिगडो सयखंडचुन्नियमहालाणखंभो निद्दयकरप्पहा-राहयारोहगवग्गो पहाविओ नयरमज्झेण जयकुंजरो उम्मूलियगरुयदुममोडियगुरुविडवकडयडरउद्दो कुंभत्थलपणोल्लण-

प्रासादः कुमारस्य, तत्र स्थितश्च स शक्र इव देवलोके धरण इव पाताले विषयसुखं भुञ्जन् कालं गमयति, अन्तराऽन्तरा च तुर-गवाहिकालीं च मत्तसिन्धुरदमनं च मल्लयुद्धाभ्यसनं च राधावेधकुतूहलं च धर्मशास्त्रश्रवणं च देशान्तरनगरवार्तानिशमनं च गुरु-चरणनिषेवणं च मार्गणजनमनोरथपूरणं च करोतीति । अथ कुमारस्य कालक्रमेण शीलवत्या सह विषयसुखं भुञ्जतः कुसुमशेखर-विजयशेखरनामानौ जातौ द्वौ पुत्रौ, तौ च वल्लभौ पितामहस्य, विविधप्रकारैरुपलाल्यमानौ वर्धेते । अन्यदा राज्ञः समीपे निषण्णे नरविक्रमे यथोचितस्थाननिविष्टे सेवकजने मदभरसंस्मृतस्वच्छन्दयमुनावनविहारः, तडतडारावत्रोटितनिबिडघटणोत्तरतार-शतप्रमाणलोहनिगडः शतखण्डचूर्णितमहालानस्तम्भो निर्दयकरप्रहाराहतारोहकवर्गः प्रधावितो नगरमध्येन जयकुञ्जर उन्मूलित-गुरुकद्रुममोटितगुरुविटपकडकडरौद्रः कुम्भस्थलप्रणो-

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir





पाडियसुरभवणसिहरग्गो अइकढिणकरप्फालणविहाडिउद्दामतुंगपागारो अइवेगुच्चालियकन्नतालविद्दवियभमलउलो अइरभस-भरपहावणसपक्खकुलसेलचल्लिकयसंको दढदंतदंडताडणढलढलियट्टालयसमूहो करघायदंतवेहणचरणुप्पीडणनिवाडियजणोहो सव्वत्थ भमइ भीमो जमोव्व जुगविगमसमयंमि, अह मंदरमहिज्जमाणमहोयहिघोसघोरे समुच्छलिए तियचउक्कचच्चरेसु जणाणं अक्कंदियरवे पुच्छियं नरवइणा–भो भो किमेवं नयरे कोलाहलो सुम्मइत्ति ?, जणेण भणियं–देव ! एस तुम्ह जयकुंजरो भग्गालाणखंभो नयरं विद्दवेइ, एवं सोच्चा विसज्जिया कुमारपमुहा पहाणलोया जयकुंजरगहणनिमित्तं, भणिया य–अरे ! सव्वहा सत्थघायं परिहरंतेहिं एयस्स वट्टियव्वं, एवं च पडिवज्जिय गया ते तदभिमुहं, न य पेच्छंति कमवि उवायं जेण हत्थी वसमुवगच्छइत्ति, एत्थंतरे वेलामासवत्तिणी गुरुगब्भभारवसविसंठुलनिवडंतचरणा गाढपाणभयकंपंतसरीरजट्ठी इओ

---

दनपातितसुरभवनशिखराग्रोऽतिकठिनकरस्फालनविघाटितोद्दामतुङ्गप्राकारोऽतिवेगोच्चालितकर्णतालविद्रवितभ्रमरकुलोऽतिरभसभर-प्रधावनसपक्षकुलशैलचलनकृतशङ्को दृढदन्तदण्डताडनढलढलिता[पातिता]ट्टालकसमूहः करघातदन्तवेधनचरणोत्पीडननिपातितजनौघः सर्वत्र भ्रमति भीमो यम इव युगविगमसमये, अथ मन्दरमथ्यमानमहोदधिघोषघोरे समुच्छलिते त्रिकचतुष्कचत्वरेषु जनानामाक्रन्दितरवे पृष्टं नरपतिना–भो भोः ! किमेवं नगरे कोलाहलः श्रूयत इति, जनेन भणितं देव ! एष युष्माकं जयकुञ्जरो भग्नालानस्तम्भो नगरं विद्रावयति, एवं श्रुत्वा विसर्जिताः कुमारप्रमुखाः प्रधानलोका जयकुञ्जरग्रहणनिमित्तं, भणिताश्च–अरे ! सर्वथा शस्त्रघातं परिहरद्भिरेतस्य वर्तितव्यम्, एवं च प्रतिपद्य गतास्ते तदभिमुखं, न च प्रेक्षन्ते कमप्युपायं येन हस्ती वशमुपगच्छतीति, अत्रान्तरे वेलामासवर्तिनी गुरुगर्भभारवशविसंस्थुलनिपतच्चरणा गाढप्राणभयकम्पमानशरीरयष्टिरित-



For Private and Personal Use Only

तओ य धावंती एगा कुलंगणा दिट्ठा जयकुंजरेण, तओ उल्लालियकरग्गो पवणवेगेण धाविओ तीसे अभिमुहो, सावि कुंजरं तहा सिग्घंमागच्छंतं पेच्छिऊण सज्झसभरनिरुद्धपयप्पयारा कलुणाइं दीणाइं विलविउं पयत्ता, कहं चिय ?—

हे माइ भाय ताया तायह मं मा उवेक्खह इयाणिं । एसो मम वहणट्ठा दुट्ठकरी पासमल्लियइ ॥ १ ॥
हं हो पेच्छगलोया ! निक्करुणा करिवरं पडिक्खलह । गुरुगब्भभरक्कंता एसा संपइ विवज्जामि ॥ २ ॥
अहह कहं पावकरी एसो सो आगओ मम समीवे । निस्सरणा नित्ताणा कमुवायं संपइ सरामि ? ॥ ३ ॥
किं कोऽवि महापुरिसो परोवयारत्थधरियनियपाणो । एत्थ न पेच्छइ सहसा मं दुक्खत्तं विणस्संतिं ॥ ४ ॥
इय दीणकलुणवयणाइं णेगसो भासिऊण खणमेक्कं । मुच्छानिमीलियच्छी धसत्ति सा महियले पडिया ॥ ५ ॥

---

स्ततश्च धावन्त्येका कुलाङ्गना दृष्टा जयकुञ्जरेण, तत उल्लालितकराग्रः पवनवेगेन धावितस्तस्या अभिमुखः, साऽपि कुञ्जरं तथा शीघ्रमागच्छन्तं प्रेक्ष्य साध्वसभरनिरुद्धपदप्रचारा करुणानि दीनानि विलपितुं प्रवृत्ता, कथमेव ?—

हे मातः ! भ्रातः ! तात ! त्रायध्वं मां मा उपेक्षध्वमिदानीम् । एष मम वधनार्थं दुष्टकरी पार्श्वमालीयते ॥ १ ॥
हं हो प्रेक्षकलोकाः ! निष्करुणाः करिवरं प्रतिस्खलयत । गुरुगर्भभाराक्रान्ता एषा सम्प्रति विपद्यते ॥ २ ॥
अहह कथं पापकरी एष स आगतो मम समीपे ? । निश्शरणा निस्त्राणा कमुपायं सम्प्रति स्मरामि ? ॥ ३ ॥
किं कोऽपि महापुरुषः परोपकारार्थधृतनिजप्राणः । अत्र न प्रेक्षते सहसा मां दुःखार्तां विनश्यन्तीम् ॥ ४ ॥
इति दीनकरुणवचनान्यनेकशो भाषित्वा क्षणमेकम् । मूर्च्छानिमीलिताक्षी धस इति सा महीतले पतिता ॥ ५ ॥



For Private and Personal Use Only

सोवि करिवरो दढरोसभररत्तणेत्तो संपत्तो तीसे थेवंतरेण, दिट्ठा य सा कुमारेण भयवसभूमिनिस्सहनिवडियंगी, चिंतियं च–अजुत्तमजुत्तमियाणिं उवेहणं एयाए, जओ—

एक्कं अबला एसा अन्नं गुरुगब्भभारविवसंगी । अन्नं पुण मुच्छाए निमीलियच्छी धरणिपडिया ॥ १ ॥

अन्नं च पुणो तायस्स एस जयकुंजरो अतीव पिओ । सत्थेण न हंतव्वो विसममिमं निवडियं कज्जं ॥ २ ॥

अहवा रूसउ ताओ जं भवइ तं करेउ मम इण्हिं । हंतव्वो एस करी ' दुब्बलजणपालणं धम्मो ' ॥ ३ ॥

इय निच्छिऊण निबिडबद्धदुगुलंचलो तुरंगाओ अवयरिऊण अवलोइज्जंतो नरनारीजणेण निवारिज्जंतो पासवत्तिपरियणेण पडिखलिज्जमाणो अंगरक्खेहिं निरवेक्खो नियजीवियस्स सिग्घं पधाविऊण मेहस्स व मयजलासारपसमियरयनियरस्स-

---

सोऽपि करिवरो दृढरोषभररक्तनेत्रः सम्प्राप्तस्तस्याः स्तोकान्तरेण, दृष्टा च सा कुमारेण भयवशभूमिनिस्सहनिपतिताङ्गी, चिन्तितं च–अयुक्तमयुक्तमिदानीमुपेक्षणं एतस्याः, यतः—

एकमबला एषा अन्यद् गुरुगर्भभारविवशाङ्गी । अन्यत् पुनर्मूर्च्छया निमीलिताक्षी धरणिपतिता ॥ १ ॥

अन्यच्च पुनस्तातस्य एष जयकुञ्जरोऽतीव प्रियः । शस्त्रेण न हन्तव्यो विषममिदं निपतितं कार्यम् ॥ २ ॥

अथवा रुष्यतु तातो यद्भवति तत्करोतु ममेदानीम् । हन्तव्य एष करी " दुर्बलजनपालनं धर्मः " ॥ ३ ॥

इति निश्चित्य निबडबद्धदुकूलाञ्चलस्तुरङ्गादवतीर्यावलोक्यमानो नरनारीजनेन निवार्यमाणः पार्श्ववर्तिपरिजनेन प्रतिस्खल्यमानोऽङ्गरक्षकैर्निरपेक्षो निजजीवितस्य शीघ्रं प्रधाव्य मेघस्येव मदजलाऽऽसारप्रशमितरजोनिकरस्य-



For Private and Personal Use Only

जयकुञ्जरविनाशः ॥

कयगंभीरगलगज्जियस्स सहस्सनयणोव्व थेवंतरेणासंपत्तस्स जयकुंजरस्स करणप्पओगवसेण आरूढो पट्ठिदेसंमि कुमारो, ताडिओ य कुलिसनिट्ठुरेण मुट्ठिप्पहारेण करी कुंभत्थलंमि, अह खरयरं रोसमुवागओ मणागंपि अनियत्तंतो नारीवहाओ सो कुमारेण जमजीहादुव्विसहाए खग्गधेणूए आहओ सव्वसत्तीए कुंभजुयलंतराले, तओ पढमुग्गमंतरविमंडलाओव्व करपसरो खरपवणपणुन्नकमलसंडाओव्व मयरंदनीसंदो महागिरिगेरुयागराओव्व निब्भरसलिलुप्पीलो कुंभत्थलाओ से वूढो महारुहिरप्पवाहो, सहसच्चिय विगयनयणोवलंभो विहलंधलीभूओ मओ इव मुच्छिओ इव दढपाससहस्ससंजमिओ इव निच्चलो ठिओ करी, तओ अवयरिऊण कुमारेण संठविया सा भूमिगया इत्थिया, विमुक्का य समीहियपएसंमि, सयंपि गओ नियमंदिरं, सोऽवि करिवरो गहिओ आरोहेहिं पारद्धो अणवरयजलघडसहस्सखेवेण सिसिरोवयारो, पयट्टावियाइं घायविसोहणाइं,

---

कृतगम्भीरगलगर्जितस्य सहस्रनयन इव स्तोकान्तरेणासम्प्राप्तस्य जयकुञ्जरस्य करणप्रयोगवशेनारूढः पृष्ठिदेशे कुमारः, ताडितश्च कुलिशनिष्ठुरेण मुष्टिप्रहारेण करी कुम्भस्थले, अथ खरतरं रोषमुपागतो मनागपि अनिवर्तयन् नारीवधात् स कुमारेण यमजिह्वादुर्विसहया खड्गधेन्वा आहतः सर्वशक्त्या कुम्भयुगलान्तरे, ततः प्रथमोद्गच्छद्रविमण्डलादिव करप्रसरः खरपवनप्रणोदितकमलखण्डादिव मकरन्दनिःस्यन्दो महागिरिगेरुकाकरादिव निर्भरसलिलोत्पीडः कुम्भस्थलात् तस्य व्यूढो महारुधिरप्रवाहः, सहसैव विगतनयनोपलम्भो विह्वलान्धीभूतो मृत इव मूर्च्छित इव दृढपाशसहस्रसंयमित इव निश्चलः स्थितः करी, ततोऽवतीर्य कुमारेण संस्थापिता सा भूमिगता स्त्री, विमुक्ता च समीहितप्रदेशे, स्वयमपि गतो निजमन्दिरं, सोऽपि करिवरो गृहीत आरोहकैः प्रारब्धोऽनवरतजलघटसहस्रक्षेपेण शिशिरोपचारः, प्रवर्तितानि घातविशोधनानि,



For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir





महाविमद्देण नीओ नियमावासे, निवेइयं नरवइणो जहावित्तं, रुट्ठो राया, परं सोयमुवागओ, भणिउमाढत्तो य—

रे रे वच्चह पुरिसा ! निस्सारह तं सुयं दुरायारं । जयकुंजरेऽवि निहए अज्जवि इह वसइ जोऽलज्जो ॥ १ ॥

अव्वो साहसतुट्ठाएँ तीए देवीएँ सुंदरो दिन्नो । पुत्तो अमित्तरूवो देवाविहु विप्पयारंति ॥ २ ॥

नूणं मूढो लोओ तम्मइ पुत्तस्स जो निमित्तंमि । न मुणइ एवंविहदोससाहणे पयडसत्तुत्तं ॥ ३ ॥

अन्नाणविलसियमिणं गइं अपुत्तस्स जं निवारेंति । इहलोयप्पडिणीओ परलोयसुहो कहं होज्जा ? ॥ ४ ॥

नीसेसरज्जसारं एयं जयकुंजरं हणंतेण । कह मह सावेक्खत्तं पुत्तेण पयासियं भणसु ? ॥ ५ ॥

ता जह पुव्वं एक्केण रक्खियं खोणिवलयमक्खंडं । रक्खिस्सामि तहेण्हिं निस्सारह वेरियं एयं ॥ ६ ॥

---

महाविमर्देन नीतो निजकाऽऽवासे, निवेदितं नरपतेर्यथावृत्तं, रुष्टो राजा, परं शोकमुपागतः, भणितुमारब्धश्च—

रे रे व्रजत पुरुषाः ! निस्सारय तं सुतं दुराचारम् । जयकुञ्जरेऽपि निहते अद्यापीह वसति योऽलज्जः ॥ १ ॥

अव्वो साहसतुष्टया तया देव्या सुन्दरो दत्तः । पुत्रोऽमित्ररूपो देवा अपि हु विप्रतारयन्ति ॥ २ ॥

नूनं मूढो लोकस्ताम्यति पुत्रस्य यो निमित्ते । न जानाति एवंविधदोषसाधने प्रकटशत्रुत्वम् ॥ ३ ॥

अज्ञानविलसितमिदं गतिमपुत्रस्य यन्निवारयति । इह लोकप्रत्यनीकः परलोकसुखः कथं भवेत् ? ॥ ४ ॥

निःशेषराज्यसारमेनं जयकुञ्जरं घ्नता । कथं मम सापेक्षत्वं पुत्रेण प्रकाशितं भण ॥ ५ ॥

ततो यथापूर्वमेकेन रक्षितं क्षोणिवलयमखण्डम् । रक्षिष्यामि तथेदानीं निस्सारय वैरिकमेतम् ॥ ६ ॥



For Private and Personal Use Only

जो एरिसं अणत्थं वीसत्थो कुणइ वसइ निस्संको । सो नूण ममंपि विणासिऊण रज्जंपिहु हरेज्जा ॥ ७ ॥

इय पुणरुत्तं नरवइस्स निच्छयमुवलब्भ विमणदुम्मणा गया कुमारसमीवं रायपुरिसा, तं च पणमिऊण सामवयणा निविट्ठा एगदेसे, पलोइऊण य तेसिं मुहसोहं भणियं कुमारेण–किं भो ! गाढमुव्विग्गा दीसह ?, साहह किमेत्थ कारणं ? खणंतरं निरुद्धकंठं चिट्ठिय दीहुण्हुण्हमुक्कनीसासपुरस्सरं दुस्सहविरहविहुरनिस्सरंतबाहप्पवाहं परामुसियलोयणजुयलं भणियं पुरिसेहिं–कुमार ! निब्भग्गसिरसेहरा किं साहेमो ?, कुमारेण भणियं–कहं चिय ?, पुरिसेहिं भणियं–जेण तुम्हेहिं सह दुस्सहो दीहविरहो भविस्सइत्ति, इंगियाकारकुसलत्तणओ परियाणिऊण तेसिमभिप्पायं भणियं कुमारेण–किं कुविओ ताओ निव्विसयमाणवेइ ?, रायपुरिसेहिं भणियं–कहमेयं परुसक्खरं देवदुल्लहाणं तुम्ह भणिज्जइ ?, सयमेव जाणह तुब्भे जमेत्थ पत्तकालं,

---

य ईदृशमनर्थं विश्वस्तः करोति वसति निशङ्कः । स नूनं मामपि विनाश्य राज्यमपि हु हरेत् ॥ ७ ॥

इति पुनरुक्तं नरपतेर्निश्चयमुपलभ्य विमनसो दुर्मनसो गताः कुमारसमीपं राजपुरुषाः, तं च प्रणम्य श्यामवदना निविष्टा एकदेशे, प्रलोक्य च तेषां मुखशोभां भणितं कुमारेण–किं भो गाढमुद्विग्ना दृश्यध्वे ? कथयत किमत्र कारणं ? क्षणान्तरं निरुद्धकण्ठं स्थित्वा दीर्घोष्णोष्णमुक्तनिःश्वासपुरस्सरं दुस्सहविरहविधुरनिस्सरद्बाष्पप्रवाहं परामृश्यलोचनयुगलं भणितं पुरुषैः–कुमार ! निर्भाग्यशिरःशेखराः किं कथयामः ?, कुमारेण भणितं–कथमेव ? पुरुषैर्भणितं–येन युष्माभिः सह दुस्सहो दीर्घविरहो भविष्यतीति, इङ्गिताऽऽकारकुशलत्वेन परिज्ञाय तेषामभिप्रायं भणितं कुमारेण–किं कुपितस्तातो निर्विषयमाज्ञापयति ?, राजपुरुषैर्भणितं–कथमेतत् परुषाक्षरं देवदुर्लभानां युष्माकं भण्यते ? स्वयमेव जानीथ यूयं यदत्र प्राप्तकालं,



For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir





तओ वत्थतंबोलाइणा पूइऊण रायपुरिसा सट्ठाणे पेसिया कुमारेण, वाहराविया य निययसेवगा, भणिया य-भो महाणुभावा ! वारणसिरवियारणकुविएण ताएण निव्विसओ आणत्तोम्हि, ता गच्छह नियट्ठाणेसु तुब्भे, अवसरे पुणरवि एज्जहत्ति, सम्माणिऊण सप्पणयं पेसिया, देवी य सीलवई भणिया, जहा-गच्छसु पिए ! तुमंपि पियहरं, पत्थावे पुणरवि एज्जाहि, सा य खणमवि विओगदुक्खमसहमाणी जमुणाजलसच्छहं सकज्जलं नयणबाहप्पवाहं मुंचंती रोविउं पयत्ता, संठविया कुमारेण तेहिं तेहिं महुरवयणेहिं, नेच्छइ य सा खणमवि विओगं, तओ भणिया कुमारेण-पिए ! दुग्गा मग्गा आजम्मसुहलालियाणं दढमजोग्गा य, असंजायसरीरबला बालजुयलपरिवुडा य तंसि, ता विरम सव्वहा ममणुग्गहं कुणमाणी इमाओ असग्गहाओत्ति, सीलवईए भणियं-अज्जपुत्त ! तइया ताएण तुह किमुवइट्ठं ?, कुमारेण भणियं-न सरामि, सीलवईए जंपियं-

---

ततो वस्त्रताम्बूलादिना पूजयित्वा राजपुरुषाः स्वस्थाने प्रेषिताः कुमारेण, व्याहारिताश्च निजकसेवकाः, भणिताश्च भो महानुभावाः ! वारणशिरोविदारणकुपितेन तातेन निर्विषय आज्ञप्तोऽस्मि, तस्माद् गच्छत निजस्थानेषु यूयम्, अवसरे पुनरपि एयातेति, संमान्य सप्रणयं प्रेषिताः, देवी च शीलवती भणिता, यथा-गच्छ प्रिये ! त्वमपि पितृगृहं, प्रस्तावे पुनरपि एयाः, सा च क्षणमपि वियोगदुःखमसहमाना यमुनाजलसच्छभं सकज्जलं नयनबाष्पप्रवाहं मुञ्चन्ती रोदितुं प्रवृत्ता, संस्थापिता कुमारेण तैस्तैर्मधुरवचनैः, नेच्छति च सा क्षणमपि वियोगं, ततो भणिता कुमारेण-प्रिये ! दुर्गा मार्गा आजन्मसुखलालितानां दृढमयोग्याश्च, असंजातशरीरबला बालयुगलपरिवृता च त्वमसि, तस्माद्विरम सर्वथा ममानुग्रहं कुर्वाणाऽस्मादसद्ग्रहादिति, शीलवत्या भणितम्-आर्यपुत्र ! तदा तातेन तव किमुपदिष्टम् ? कुमारेण भणितं-न स्मरामि, शीलवत्या जल्पितं-



For Private and Personal Use Only

मम एक्कच्चिय धूया एसा अच्चंतं निव्वुइट्ठाणं छायव्व सहचरी जह हवइ सया तह तए किच्चंति, कुमारेण भणियं-पिए ! सुमरियमियमियाणिं, तीए जंपियं-ता कीस नियत्तेसि मं ?, कुमारेण भणियं-मग्गगाढपरिस्समकारणेण नियत्तेमि, जइ पुण अवस्समेवागंतव्वं मए समं ता पउणा भवसु, विमुंचसु भवणनिवासाभिरइं परिचय सुकुमारत्तणंति, सीलवईए भणियं-एसा समसुहदुक्खसहा जाया पगुणम्हि तओ करकलियसरासणो पिट्ठिप्पएसबद्धतोणीरो सुयजुयलसमेयाए सीलवईए सहिओ सुहपसुत्तेसु नयरलोएसु पसंतेसु गीयरवेसु सट्ठाणनिविट्ठेसु अंगरक्खेसु पमत्तेसु जामकरिघडाधिरूढेसु सुहडेसु इओ तओ पेसिएसु नियचेडगेसु नीहरिओ नयराओ कुमारो, अविच्छिन्नप्पयाणएहिं परं रज्जंतरं गंतुं पवत्तो य ।

इओ य आयन्निऊण कुमारस्स विदेसगमणं सयलोऽवि नयरीजणो मुक्ककंठं विलविउमारद्धो, मंतिणोऽवि परिचत्तनीसेस-

---

ममैकैव दुहिता एषाऽत्यन्तं निवृत्तिस्थानं छायेव सहचरी यथा भवति सदा तथा त्वया कृत्यमिति, कुमारेण भणितं-प्रिये ! स्मृतमिदमिदानीम्, तया जल्पितम्-ततः कस्मान्निवर्तयसि मां ?, कुमारेण भणितम्-मार्गगाढपरिश्रमकारणेन निवर्तयामि, यदि पुनरवश्यमेवागन्तव्यं मया समं तर्हि प्रगुणा भव, विमुञ्च भवननिवासाभिरतिं परित्यज सुकुमारत्वमिति, शीलवत्या भणितम्-एषा समसुखदुःखसहा जाता प्रगुणाऽस्मि, ततः करकलितशरासनः पृष्ठप्रदेशबद्धतूणीरः सुतयुगलसमेतया शीलवत्या सहितः सुखप्रसुप्तेषु नगरलोकेषु प्रशान्तेषु गीतरवेषु स्वस्थाननिविष्टेषु अङ्गरक्षकेषु प्रमत्तेषु यामकरिघटाधिरूढेषु सुभटेषु इतस्ततःप्रेषितेषु निजचेटकेषु निस्सृतो नगरात् कुमारः, अविच्छिन्नप्रयाणकैः परं राज्यान्तरं गन्तुं प्रवृत्तश्च ।

इतश्चाऽऽकर्ण्य कुमारस्य विदेशगमनं सकलोऽपि नगरीजनो मुक्तकण्ठं विलपितुमारब्धः, मन्त्रिणोऽपि परित्यक्तनिःशेषराज्य-



For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



मन्त्रिणां नृपतिं प्रति रोषः ॥

रज्जवावारा हरियसव्वस्ससारा इव विमणदुम्मणा गंतूण नरनाहं उवलंभिउं पवत्ता, कहं विय ?

तिलतुसमित्तंपिहु नियपओयणं अम्ह साहिउं देवो । पुव्विं करिंसु इण्हिं पव्वयमेत्तेऽवि नो पुट्ठा ॥ १ ॥
ता देव ! जुत्तमेयं काउं किं तुम्ह थेवकज्जेऽवि ? । रज्जभरधरणधीरो जमेस निव्वासिओ कुमरो ॥ २ ॥
किं एगदुट्ठकुंजरकएण नियजीयनिव्विसेसस्स । पुत्तस्स एरिसगई विहिया केणावि नरवइणा ? ॥ ३ ॥
किं वा विंझमहागिरिपरिसरधरणीएँ कुंजरकुलाइं । हरियाइं तक्करेहिं जं देवो ववसिओ एवं ॥ ४ ॥
इत्थीए रक्खणओ किमजुत्तं नणु कयं कुमारेण ? । नियडिंभदुट्ठचेट्ठावि जणेइ जणयस्स संतोसं ॥ ५ ॥
पररज्जेसु य अजसो अम्हाण पयासिओ तए नूणं । जह नरसिंघनराहिवरज्जमुवेक्खंति गुरुणो य ॥ ६ ॥

---

व्यापारा हृतसर्वस्वसारा इव विमनो दुर्मनसो गत्वा नरनाथमुपलम्भयितुं प्रवृत्ताः, कथमेव ?—

तिलतुषमात्रमपि हु निजप्रयोजनमस्माकं कथयित्वा देवः । पूर्वमकरोरिदानीं पर्वतमात्रेऽपि नो पृष्टाः ॥ १ ॥
ततो देव ! युक्तमेतत् कर्तुं किं तव स्तोककार्येऽपि । राज्यभारधरणधीरो यदेष निर्वासितः कुमारः ॥ २ ॥
किमेकदुष्टकुञ्जरकृतेन निजजीवनिर्विशेषस्य । पुत्रस्येदृशगतिर्विहिता केनापि नरपतिना ? ॥ ३ ॥
किं वा विन्ध्यमहागिरिपरिसरधरण्यां कुञ्जरकुलानि । हृतानि तस्करैर्यद्देवो व्यवसितवानेवम् ॥ ४ ॥
स्त्रिया रक्षणतः किमयुक्तं ननु कृतं कुमारेण ? । निजडिम्भदुष्टचेष्टाऽपि जनयते जनकस्य सन्तोषम् ॥ ५ ॥
परराज्येषु चायशोऽस्माकं प्रकाशितं त्वया नूनम् । यथा नरसिंहनराधिपराज्यमुपेक्षन्ते गुरवश्च ॥ ६ ॥

१



For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir





ता गिण्हह नियमुद्दं सह भवणधणेहिं मोक्कलह अम्हे । न सहिस्सामो एत्तियमवजसरयफंसणं देव ! ॥ ७ ॥
इय मंतीहिं भणिए राया संजायचित्तसंतावो । अब्भुवगयनियदोसो ताहे ते भणिउमाढत्तो ॥ ८ ॥
मरिसह मम अवराहं जमपुच्छिय एरिसं कयं कज्जं । नो कोवभराओ जओ जुत्ताजुत्तं मए नायं ॥ ९ ॥
जइ तुब्भे भणह तहा न कोऽवि दोसेऽवि चयइ नियपुत्तं । इय वइयरछउमेणं मन्ने लच्छीएँ छलिओऽहं ॥ १० ॥
जं पुण इय दोसाओ मंतित्तविमोयणं कुणह तुब्भे । एसेव निरंजणसामिभत्तिजुत्ताण होइ मई ॥ ११ ॥
केवलमेक्को पुत्तो रज्जसमत्थो गओ विदेसंमि । तुम्हेवि उवेक्खह मं उभयं सोढुं न सक्कोऽहं ॥ १२ ॥
ता संपयं पसीयह रज्जं चिंतेह लहह कुमरस्स । सव्वत्थावि पउत्तिं एत्तो रोसेण पज्जत्तं ॥ १३ ॥

---

तस्माद् गृह्णीत निजमुद्रां सह भवनधनैर्मुत्कलयतास्मान् । न सहिष्याम एतावदपयशोरजःस्पर्शनं देव ! ॥ ७ ॥
इति मन्त्रिभिर्भणिते राजा संजातचित्तसन्तापः । अभ्युपगतनिजदोषस्तदा तान् भणितुमारब्धः ॥ ८ ॥
मृष्यत ममापराधं यदपृष्टा ईदृशं कृतं कार्यम् । न कोपभराद् यतो युक्तायुक्तं मया ज्ञातम् ॥ ९ ॥
यथा यूयं भणत तथा न कोऽपि दोषेऽपि त्यजति निजपुत्रम् । इति व्यतिकरच्छद्मना मन्ये लक्ष्म्या छलितोऽहम् ॥ १० ॥
यत्पुनरेतद्दोषान् मन्त्रित्वविमोचनं कुरुथ यूयम् । एषैव निरञ्जनस्वामिभक्तियुक्तानां भवति मतिः ॥ ११ ॥
केवलमेकः पुत्रो राज्यसमर्थो गतो विदेशे । यूयमप्युपेक्षध्वे मामुभयं सोढुं न शक्तोऽहम् ॥ १२ ॥
तस्मात् साम्प्रतं प्रसीदत राज्यं चिन्तयत लभध्वं कुमारस्य । सर्वत्रापि प्रवृत्तिमतो रोषेण पर्याप्तम् ॥ १३ ॥



For Private and Personal Use Only

एवं गाढनिबंधेणं पडिवन्नं मंतिजणेणमेयं, पेसिया य सयलदिसासु वरतुरयाधिरूढा पुरिसनियरा कुमारन्नेसणनिमित्तं, गया य सव्वत्थ, निरूविओ सव्वजत्तेण, न केणवि दिसाभागमेत्तंपि वियाणियं, तओ कइवयवासराइं वियरिय तेसु तेसु ठाणेसु अकयकज्जेहिं चेव नियत्तिऊण तेहिं सिट्ठो सभानिविट्ठस्स मंतिजणसमेयस्स नरिंदस्स कुमाराणुवलंभवुत्तंतो, तं च सोच्चा अच्चंतं सोगं कुणंतो राया वागरिओ मंतीहिं—देव ! अलं परिदेविएण, न कयाइ करतलाओ विगलिओ पुणोवि पाविज्जइ चिंतामणी, न य दढकुनयदंडताडिया पुणोऽवि मंदिरे निवसइ रायलच्छी, न गाढमकारणावमाणिओ नियत्तइ सप्पुरिसजणो, राइणा भणियं—जइ पढममेव सो तुम्हेहिं नियत्तिओ होंतो ता जुत्तं हुन्तं, मंतीहिं भणियं—जइ मूलेऽवि से न रोसुप्पायणं देवो करेंतो ता जुत्ततरं हुंतं । अवि य—

---

एवं गाढनिर्बन्धेन प्रतिपन्नं मन्त्रिजनेनैतत्, प्रेषिताश्च सकलदिक्षु वरतुरगाधिरूढाः पुरुषनिकराः कुमारान्वेषणनिमित्तं, गताश्च सर्वत्र, निरूपितः सर्वयत्नेन, न केनापि दिग्भागमात्रमपि विज्ञातं, ततः कतिपयवासराणि विचर्य तेषु तेषु स्थानेषु अकृतकार्यैरेव निवृत्य तैः शिष्टः सभानिविष्टस्य मन्त्रिजनसमेतस्य नरेन्द्रस्य कुमारानुपलम्भवृत्तान्तः, तं च श्रुत्वाऽत्यन्तं शोकं कुर्वन् राजा व्याकृतो मन्त्रिभिः—देव ! अलं परिदेवितेन, न कदाचित् करतलाद् विगलितः पुनरपि प्राप्यते चिन्तामणिः, न च दृढकुनयदण्डताडिता पुनरपि मन्दिरे निवसति राजलक्ष्मीः, न गाढमकारणापमानितो निवर्तते सत्पुरुषो जनः, राज्ञा भणितं—यदि प्रथममेव स युष्माभिर्निवर्तितोऽभविष्यत्तर्हि युक्तमभविष्यत्, मन्त्रिभिर्भणितं—यदि मूलेऽपि तस्य न रोषोत्पादनं देवोऽकरिष्यत्तदा युक्ततरमभविष्यत् । अपि च—



For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



कज्जविणासे जाए जह बुद्धी बंधुरा पवित्थरइ । तह जइ पढमं चिय होज्ज देव ! ता किं न पज्जत्तं ? ॥ १ ॥
धन्ना सबुद्धिविभवेण जाणिउं वत्थु तस्स य सरूवं । पढमं चिय सुग्गहियं कुणंति सप्पस्स वयणं व ॥ २ ॥
रन्ना वुत्तं सच्चं एयमहो केवलं वहुसणाहो । जाणेण विणा कह सो दूरपहं पाविओ होही ? ॥ ३ ॥
मंतीहिं तओ भणियं जेणेसा विहडणा कया देव ! । सो दूरेऽवि नएज्जा नूण कुमारं लहुं दइवो ॥ ४ ॥

एवं चिरं परितप्पिय पुणोवि चारपुरिसे[हिं] कुमारवत्ताजाणणत्थं पेसिय नियनियठाणेसु गया मंतिणो, रायावि सुयविरहवेयणाविहुराए चंपयमालाए देवीए संठवणनिमित्तमंतेउरं गओत्ति ॥

इओ य सो कुमारो कमंकमेण गच्छंतो चिरकमलवणविहारुव्विग्गाए लच्छिदेवीए तुट्ठेण पयावइणा निवासनिमित्तं व

---

कार्यविनाशे जाते यथा बुद्धिर्बन्धुरा प्रविस्तरति । तथा यदि प्रथममेव भवेद्देव ! तर्हि किं न पर्याप्तम् ? ॥ १ ॥
धन्याः स्वबुद्धिविभवेन ज्ञात्वा वस्तु तस्य च स्वरूपम् । प्रथममेव सुगृहीतं कुर्वन्ति सर्पस्य वदनमिव ॥ २ ॥
राज्ञा उक्तं सत्यमेतदहो केवलं वधूसनाथः । यानेन विना कथं स दूरपथं प्राप्तो भविष्यति ॥ ३ ॥
मन्त्रिभिस्ततो भणितं येनैषा विघटना कृता देव ! । स दूरेऽपि नयेन्नूनं कुमारं लघु दैवः ॥ ४ ॥

एवं चिरं परितप्य पुनरपि चारपुरुषान् कुमारवार्ताज्ञानार्थं प्रेषयित्वा निजनिजस्थानेषु गता मन्त्रिणः, राजाऽपि सुतविरह-वेदनाविधुरायाश्चम्पकमालाया देव्याः संस्थापननिमित्तमन्तःपुरं गत इति ।

इतश्च स कुमारः क्रमंक्रमेण गच्छन् चिरकमलवनविहारोद्विग्नाया लक्ष्मीदेव्यास्तुष्टेन प्रजापतिना निवासनिमित्तमिव विर-

शान्त्यर्थं नृपस्य देवीपार्श्वे आगमनम् ॥



For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir





विरइए नाणाविहतरुणतरुसामलियसयलरविकरपसरे अणेगकोडीसरीयजणसंकुले संदणपुरवेलाउले संपत्तो, अवियाणमाणो य तहाविहं गेहंतरं गोपुरपच्चासन्नस्स पाडलाभिहाणमालागारस्स मंदिरंमि पविट्ठो, दिट्ठो य सो पाडलेण विन्नाओ य विसिट्ठागिईए जहा नूणं कोई एस महापुरिसोत्ति, तओ अब्भुट्ठिऊण सपणयं कया उचियपडिवत्ती, दंसिओ गिहस्स एगदेसो, निक्कारणवच्छल्लयाए य भायरं व तं उवयरिउमाढत्तो, कुमारोऽवि तत्थट्ठिओ सजूहभट्ठोव पवंगमो दिणगमणियं कुणंतो अच्छइ। अन्नया य पुव्वसमाणियंमि निट्ठियंमि दविणजाए पाडलेण भणियं-कुमार! महायस निव्ववसायाणं केरिसो निव्वाहो?, ता परिचयसु आलस्सं, गिण्हसु ममारामस्स एगदेसं, समुच्चिणसु कुसुमाइं, गुंथिऊण य विविहमालाओ विक्किणसु रायमग्गंमि जहा सुहेण चेव निव्वहइ तुह परिग्गहोत्ति।

---

चिते नानाविधतरुणतरुश्यामलितसकलरविकरप्रसरेऽनेककोटीश्वरजनसङ्कुले स्यन्दनपुरवेलाकुले सम्प्राप्तः, अविजानानश्च तथाविधं गेहान्तरं गोपुरप्रत्यासन्नस्य पाटलाभिधानमालाकारस्य मन्दिरे प्रविष्टः, दृष्टश्च सः पाटलेन, विज्ञातश्च विशिष्टाऽऽकृत्या यथा नूनं कोऽपि एष महापुरुष इति, ततोऽभ्युत्थाय सप्रणयं कृतोचितप्रतिपत्तिः, दर्शितो गृहस्यैकदेशः, निष्कारणवत्सलतया च भ्रातरमिव तमुपचरितुमारब्धः, कुमारोऽपि तत्र स्थितः स्वयूथभ्रष्ट इव प्लवङ्गमो दिनगमनिकां कुर्वन्नास्ते। अन्यदा च पूर्वसमानीते निष्ठिते द्रविणजाते पाटलेन भणितं-कुमार! महायशः! निर्व्यवसायानां कीदृशो निर्वाहः? तस्मात्परित्यजाऽऽलस्यं, गृहाण ममाऽऽरामस्यैकदेशं, समुच्चिनु कुसुमानि, ग्रथित्वा च विविधमाला विक्रीणीष्व राजमार्गे यथा सुखेनैव निर्वहति तव परिग्रह इति।



For Private and Personal Use Only

तओ-जह जह वाएइ विही विसरिसकरणेहिं निट्ठुरं पडहं । धीरा पहसितवयणा नच्चंति तहा तह चेव ॥ १ ॥

इय चिंतिऊण खत्तधम्माणणुरूवंपि तयणुरोहेण पडिवन्नमेयं कुमारेण, पइदियहं च सह सीलवईए मालागारोवदंसिय-काणणेगदेसतरुकुसुमाइं उच्चिणिय नियगेहमागंतूण मालाओ विरएइ, पाडलगभज्जाए य समं सीलवइं तव्विक्कयनिमित्तं रायमग्गे पेसेइ, उप्पज्जइ बहू अत्थो, एवं च पइदिणं पुप्फविक्कयकरणेणं सुहेण संपज्जइ निव्वाहो, अन्नया पप्फुल्लविइल्लमालाओ गहाय सीलवई गया रायमग्गे, अह तीसे रूवेण जोव्वणेण य लायण्णेण य सोहग्गेण य अक्खित्तचित्तो समागओ एगो कोडीसरीओ देहिलो नाम नावावणिओ, भणिया य तेण-भद्दे ! केत्तिएण इमाओ मालाओ लब्भंति ?, तीए भणियं-पंचहिं सुवण्णधरणेहिं, तओ

---

ततः—यथा यथा वादयति विधिर्विसदृशकरणैर्निष्ठुरं पटहम् । धीराः प्रहसितवदना नृत्यन्ति तथा तथैव ॥ १ ॥

इति चिन्तयित्वा क्षत्रधर्माननुरूपमपि तदनुरोधेन प्रतिपन्नमेतत् कुमारेण, प्रतिदिवसं च सह शीलवत्या मालाकारोपदर्शितकानननैकदेशतरुकुसुमानि उच्चित्य निजगृहमागत्य माला विरचयति, पाटलकभार्यया च समं शीलवतीं तद्विक्रयनिमित्तं राजमार्गे प्रेषयति, उत्पद्यते बहुरर्थः, एवञ्च प्रतिदिनं पुष्पविक्रयकरणेन सुखेन संपद्यते निर्वाहः, अन्यदा प्रफुल्लविचकिलमाला गृहीत्वा शीलवती गता राजमार्गे, अथ तस्या रूपेण यौवनेन च लावण्येन च सौभाग्येन चाऽऽक्षिप्तचित्तः समागत एकः कोटीश्वरो देहिलो नाम नावावणिक्, भणिता च तेन-भद्रे ! कियता [मूल्येन] इमा माला लभ्यन्ते ?, तया भणितं-पञ्चभिः सुवर्णधरणैः, ततः—



For Private and Personal Use Only

दानेन वैराण्युपयान्ति नाशं, दानेन भूतानि वशीभवंति । दानेन कीर्तिर्भवतींदुशुभ्रा, दानात्परं नो वरमस्ति वस्तु ॥१॥
इय चिंतितेण तीसे चित्तावहरणत्थं समप्पिया तेण तिण्णि दीणारा, सहरिसाए तीए गहिऊण समप्पियाओ फुल्लमालाओ, विणएण भणिया य सा–भद्दे ! इओ दिणाओ आरब्भ मा अन्नस्स दाहिसि, समहिगतरमुल्लेणवि अहमेव गहिस्सामि, पडिवन्नं च तीए, गयाइं दोन्निवि नियनियगेहेसु, एवं पइदिणं सो तीए सगासाओ पुप्फमालाओ गिण्हइ, साऽवि समहिगदविणलोभेण तस्स चेव दलयइ । अन्नया परतीरगमणनिमित्तं नाणाविहअमुल्लभंडभरियं जाणवत्तं ठावियं अणेण समुद्दतीरे, सावि भणिया, जहा–कल्लेऽहं परतीरे गमिस्सामि, तम्हा तुमे समुद्दतीरे अमुगंमि पएसे आगंतूण नीसेसाइं कुंदवेइल्लनवमालईपाडलाइमुत्तयचंपयपमुहाइं कुसुमाइं समप्पेज्जासि, अहं ते चउग्गुणं मोल्लं दवाविस्सामि, पडिवन्नं च तीए हट्ठहिययाए, न मुणिओ

---

दानेन वैराण्युपयान्ति नाशं, दानेन भूतानि वशीभवन्ति । दानेन कीर्तिर्भवतीन्दुशुभ्रा, दानात्परं नो वरमस्ति वस्तु ॥१॥
इति चिन्तयता तस्याश्चित्तापहरणार्थं समर्पितास्तेन त्रयो दीनाराः, सहर्षया तया गृहीत्वा समर्पिताः पुष्पमालाः, विनयेन भणिता च सा–भद्रे ! इतो दिनादारभ्य माऽन्यस्मै दास्यसि, समधिकतरमूल्येनापि अहमेव ग्रहीष्यामि, प्रतिपन्नं च तया, गतौ द्वावपि निजनिजगृहेषु, एवं प्रतिदिनं स स्तस्याः सकाशात् पुष्पमाला गृह्णाति, साऽपि समधिकद्रव्यलोभेन तस्मा एव दलयति [ददाति] । अन्यदा परतीरगमननिमित्तं नानाविधाभूल्यभाण्डभृतं यानपात्रं स्थापितमनेन समुद्रतीरे, साऽपि भणिता, यथा–कल्येऽहं परतीरे गमिष्यामि, तस्मात्त्वं समुद्रतीरे अमुकस्मिन् प्रदेशे आगत्य निःशेषाणि कुन्दविचकिलनवमालतीपाटलाऽतिमुक्तकचम्पकप्रमुखानि कुसुमानि समर्पयेः, अहं तुभ्यं चतुर्गुणं मूल्यं दापयिष्यामि, प्रतिपन्नं च तया हृष्टहृदयया, न ज्ञातः कोऽपि परमार्थः,



For Private and Personal Use Only

कोऽवि परमत्थो, बीयदिवसे गया समग्गकुसुममालाओ गहिऊण निद्दिट्ठट्ठाणे, दिट्ठो सो वणिओ जाणवत्ताधिरूढो, पणामियाइं तीए कुसुमाइं, पसारिओ तेण हत्थो, तीएवि समप्पणं( णत्थं ) पलंबिया मुणालकोमला नियभुयलया, तेणवि हरिसभरनिब्भरंगेण सकुसुममाला चेव गहिऊण आरोविया सीलवई जाणवत्ते, उक्खित्ता उवरिगाए, एत्थंतरे वज्जावियाइं मंगलतूराइं पयट्टियं पवहणं विमुक्का सियवडा वाहियाइं आवल्लयाइं चंडगंडीवविमुक्ककंडंव वेगेण गंतुं पवत्तं जाणवत्तं । इओ य सो नरविक्कमकुमारो अच्चंतं तदणागमणकालविलंबुव्विग्गचित्तो इओ तओ सीलवइं पलोइउं पवत्तो, तं अपेच्छमाणेण य तेण पुट्ठा पाडिवेसिया, अवलोइओ रायमग्गो, सम्मं निरिक्खिया तियचउक्कचच्चरा, अवलोइयाइं सयलदेवउलभवणकाणणाइं, निवेइया वत्ता पाडलयमालागारस्स, तेणावि सव्वायरेण गवेसिया सीलवई सव्वट्ठाणेसु, कत्थवि य पउत्तिमपावमाणेण सिग्घमेव नियत्तिय

द्वितीयदिवसे गता समग्रकुसुममाला गृहीत्वा निर्दिष्टस्थाने, दृष्टः स वणिक् यानपात्राधिरूढः, प्रणामितानि तया कुसुमानि, प्रसारितस्तेन हस्तः, तयाऽपि समर्पणार्थं प्रलम्बिता मृणालकोमला निजभुजलता, तेनापि हर्षभरनिर्भराङ्गेन सकुसुममाला एव गृहीत्वा आरोपिता शीलवती यानपात्रे, उत्क्षिप्ता उपरिकायाम्, अत्रान्तरे वादितानि मङ्गलतूर्याणि, प्रवर्तितं प्रवहणं, विमुक्ता सितपटा, वाहितानि आवल्लकानि, चण्डगाण्डीवविमुक्तकाण्डमिव वेगेन गन्तुं प्रवृत्तं यानपात्रम् । इतश्च सो नरविक्रमकुमारोऽत्यन्तं तदनागमनकालविलम्बोद्विग्नचित्त इतस्ततः शीलवतीं प्रलोकयितुं प्रवृत्तः, तामप्रेक्षमाणेन च तेन पृष्टाः प्रातिवेश्मिकाः, अवलोकितो राजमार्गः, सम्यग् निरीक्षितास्त्रिकचतुष्कचत्वराः, अवलोकितानि सकलदेवकुलभवनकाननानि, निवेदिता वार्ता पाटलकमालाकारस्य, तेनापि सर्वाऽऽदरेण गवेषिता शीलवती सर्वस्थानेषु, कुत्रापि च प्रवृत्तिमप्राप्नुवता शीघ्रमेव निवृत्य

भणिओ कुमारो—महायस । धीरो भव, परिचयसु कायरत्तं, कुमारेण भणियं—भद्द ! न किंपि मम कायरत्तं, केवलं एए बालए जणणीविओगवसविसंठुलं रोयमाणे न सक्केमि पेच्छिउं, पाडलेण भणियं—एवं ठिएवि पुरिसाय( सयार )त्तं कायव्वं, ता पुव्वदिसिविभागे तीसे अन्नेसणनिमित्तं अहं गच्छामि, तुमं पुण पुत्तसमेओ चिय उत्तरदिसिहुत्तं इमाए नईए उभयकूलेसु उज्झरेसु य दरीसु य दुत्तडीसु य विसमप्पवेसेसु य अवलोइज्जासित्ति, एवं करेमित्ति पडिवज्जिय पुत्तजुयलसमेओ चेव गओ नरविक्कमो नईए पासदेसंमि, ते य पुत्तए मणागंपि सन्निहिममुंचमाणे संठविय चिंतिउमारद्धो । कहं चिय ?—

किं होज्ज केणवि हडा ? वसीकया वावि केणवि नरेण ? । किं वा सरीरपीडाए होज्ज कत्थवि निसन्ना सा ॥ १ ॥

किं वा ममावमाणं किंपि हु दट्ठूण विलयमावन्ना । पुरिसंतरंमि अहवा जाओ तीसे पणयभावो ॥ २ ॥

---

भणितः कुमारः—महायशः ! धीरो भव, परित्यज कातरत्वं, कुमारेण भणितं—भद्र ! न किमपि मम कातरत्वं, केवलमेतौ बालकौ जननीवियोगवशविसंस्थुलौ रुदन्तौ न शक्नोमि प्रेक्षितुं, पाटलेन भणितम्—एवं स्थितेऽपि पुरुषकारत्वं कर्तव्यम्. तस्मात्पूर्वदिग्विभागे तस्या अन्वेषणनिमित्तमहं गच्छामि, त्वं पुनः पुत्रसमेत एवोत्तरदिङ्मुखम् अस्या नद्या उभयकूलयोः निर्झरेषु च दरीषु च दुस्तटीषु च विषमप्रवेशेषु चावलोकयेरिति, एवं करोमीति प्रतिपद्य पुत्रयुगलसमेत एव गतो नरविक्रमो नद्याः पार्श्वदेशे, तौ च पुत्रकौ मनागपि सन्निधिममुञ्चमानौ संस्थाप्य चिन्तयितुमारब्धः । कथमेव ?—

किं भवेत् केनापि हृता ? वशीकृता वापि केनापि नरेण ? । किं वा शरीरपीडया भवेत्कुत्रापि निषण्णा सा ॥ १ ॥

किं वा ममापमानं किमपि हु दृष्ट्वा विलयमापन्ना । पुरुषान्तरे अथवा जातस्तस्याः प्रणयभावः ॥ २ ॥



For Private and Personal Use Only

सुमरामि न तावऽवमाणकारणं होउ वाऽवमाणेऽवि । नो सा चएज्ज पुत्तं अवच्चनेहो जओ गरुओ ॥ ३ ॥
संभवइ न एयंपिहु जमन्नपुरिसं मणेऽवि चिंतेज्जा । कह तारिसकुलजाया सीलं मइलेज्ज ससिधवलं ? ॥ ४ ॥
अहवा जुवईण मणं कुडंगगुविलं क एव जाणेज्जा ? । बाहिंदंसियपणयाण कवडभरियाण मज्झंमि ? ॥ ५ ॥
अन्नं वयंति पुव्वं पच्छा पुण वाहरंति गिरमन्नं । अन्नं धरेंति हियए साभिप्पेयं करेंति पुणो ॥ ६ ॥
गयणे गणंति गहगणमुयहिंमि जलंपि जे परिमिणंति । पेच्छंति भावि कज्जं न तेऽवि जाणंति जुवइयणं ॥ ७ ॥
सच्चं चिय जुवईओ एरिसियाओ न एत्थ संदेहो । केवलमेयाएँ मए दिट्ठं लहुयंपि नो विलियं ॥ ८ ॥
ता सव्वहा न उवेहणिज्जा होइ एसत्ति निच्छिऊण पुत्ते य नईकूले संठविय परकूलन्नेसणट्ठाए पविट्ठो नईए, पत्तो य मज्झ-

---

स्मरामि न तावदपमानकारणं भवतु वाऽपमानेऽपि । नो सा त्यजेत् पुत्रम" पत्यस्नेहो यतो गुरुकः " ॥ ३ ॥
संभवति नैतदपि हु यदन्यपुरुषं मनस्यपि चिन्तयेत् । कथं तादृशकुलजाता शीलं मलिनयेत् शशिधवलम् ॥ ४ ॥
अथवा युवतीनां मनः कुडङ्गगुपिलं क एव जानीयात् । बहिर्दर्शितप्रणयानां कपटभूतानां मध्ये ॥ ५ ॥
अन्यद् वदन्ति पूर्वं पश्चात्पुनः व्याहरन्ति गिरमन्याम् । अन्यं धारयन्ति हृदये स्वाभिप्रेतं कुर्वन्ति पुनः ॥ ६ ॥
गगने गणयन्ति ग्रहगणमुदधौ जलमपि ये परिमिमते । प्रेक्षन्ते भाविकार्यं न तेऽपि जानन्ति युवतिजनम् ॥ ७ ॥
सत्यमेव युवतय ईदृश्यो नात्र संदेहः । केवलमेतस्या मया दृष्टं लघुकमपि नो विलितम् ॥ ८ ॥
तस्मात् सर्वथा नोपेक्षणीया भवति एषेति निश्चित्य पुत्रौ च नदीकूले संस्थाप्य परकुलान्वेषणार्थं प्रविष्टो नद्यां, प्राप्तश्च मध्ये



For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir





यारे, एत्थंतरे अच्चंतपडिणियत्तणओ हयविहिस्स अघडंतवत्थुसंघडणसीलयाए भवियव्वयानिओगस्स बलवत्तणओ वेयणीय-कम्मस्स गिरिसिरवरिसणवसविसप्पमाणसलिलप्पवाहेण पूरिया तक्खणेण नई, जाया अगाहा, खलिओ पयप्पयारो पवाहिओ तरुपल्लववारिपूरेण नरविक्कमकुमारो नीओ दूरप्पएसं, अह कहवि कुसलकम्मवसओ पाविय मणेण फलगं, तंनिस्साए अवयरिओ तीरे तीए, नुवन्नो तरुवरच्छायाए, चिंतिउं पवत्तो—

कह नियनयरच्चाओ ? कहेत्थ वासो ? कहिं गया भज्जा ? । कह पुत्तेहि विओगो ? कह वा नइवेगवहणं च ? ॥ १ ॥
खरपवणाहयजरतिणनियरो व्विव देवया दिसिबलिव्व । एक्कपए च्चिय कह मज्झ परियरो विसरिओ झत्ति ? ॥ २ ॥
हे दइव ! तुज्झ पणओ एसोऽहं खिवसु सव्वदुक्खाइं । मज्झं सयणजणाओ जेणऽन्नजणो सुहं वसइ ॥ ३ ॥

---

अत्रान्तरेऽत्यन्तप्रत्यनीकत्वात् हतविधेः अघटमानवस्तुसंघटनशीलतया भवितव्यतानियोगस्य, बलवत्त्वाद् वेदनीयकर्मणो, गिरिशिरोवर्षणवशविसर्पत्सलिलप्रवाहेण पूरिता तत्क्षणेन नदी, जाताऽगाधा, स्खलितः पदप्रचारः प्रवाहितस्तरुपल्लववारिपूरेण नरविक्रमकुमारो नीतो दूरप्रदेशम्, अथ कथमपि कुशलकर्मवशतः प्राप्तमनेन फलकं, तन्निश्रयाऽवतीर्णस्तीरे तस्याः, निषण्णस्तरुवरच्छायायां, चिन्तयितुं प्रवृत्तः—

कथं निजनगरत्यागः ? कथमत्र वासः ? कुत्र गता भार्या ? । कथं पुत्राभ्यां वियोगः ? क्व वा नदीवेगवहनं च ॥ १ ॥
खरपवनाहतजरतृणनिकर इव देवता दिशि बलिरिव । एकपदे एव कथं मम परिकरो विसृतो [ विकीर्णो ] झटिति ॥ २ ॥
हे दैव ! तव प्रणत एषोऽहं क्षिप सर्वदुःखानि । मम स्वजनजनाद् येनान्यजनः सुखं वसति ॥ ३ ॥



For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



पञ्चदिव्याभिषेकः ॥

एत्थंतरे पच्चासन्नजयवद्धणनयराहिवई कित्तिवम्मनामो नरवई अनिवत्तगसूलवेयणाए अपुत्तो सहसा पंचत्तमुवगओ, तओ मिलिआ मंतिसामंताइणो लोया, कओ पंचदिव्वाभिसेओ, रज्जारिहं च पुरिसं सव्वत्थ मग्गिउं पवत्ता, खणंतरेण नयरब्भंतरे रज्जारिहमपेच्छंताणि बाहिं अवलोयणट्ठा निग्गयाणि पंच दिव्वाणि, गंतुं पयट्टाणि य तमुद्देसं जत्थ सो चिंताउरो नरविक्कमकुमारो निवसइ, अह तदग्गगामिणं पयंडसुंडादंडुड्डामरं वेगेण पवरकुंजरमिन्तं दट्ठूण विगप्पियं एवं कुमारेण—

मन्ने पुव्वब्भत्थं इयाणि दइवो समीहए काउं । कहमन्नहेह हत्थी दूरुल्लालियकरो एज्जा ? ॥ १ ॥

अहवा एउ इमो लहु कुणउ य मणवंछियं जहा मज्झं । ससुयदइयविरहपमोक्खदुक्खवोच्छेयणं होइ ॥ २ ॥

अह गलगज्जि घणघोसविब्भमं कुंजरेण काऊण । नियपट्ठीए ठविओ झत्ति कुमारो करग्गेण ॥ ३ ॥

---

अत्रान्तरे प्रत्यासन्नजयवर्धननगराधिपतिः कीर्तिवर्मनामा नरपतिः अनिवर्तकशूलवेदनया अपुत्रः सहसा पञ्चत्वमुपगतः, ततो मिलिता मन्त्रिसामन्तादयो लोकाः, कृतः पञ्चदिव्याभिषेकः, राज्यार्हं च पुरुषं सर्वत्र मार्गयितुं प्रवृत्ताः, क्षणान्तरेण नगराभ्यन्तरे राज्यार्हमप्रेक्षमाणानि बहिरवलोकनार्थं निर्गतानि पञ्च दिव्यानि, गन्तुं प्रवृत्तानि च तमुद्देशं यत्र सः चिन्तातुरो नरविक्रमकुमारो निवसति, अथ तदग्रगामिनं प्रचण्डशुण्डादण्डोड्डामरं वेगेन प्रवरकुञ्जरमायन्तं दृष्ट्वा विकल्पितमेवं कुमारेण—

मन्ये पूर्वाभ्यस्तमिदानीं दैवः समीहते कर्तुम् । कथमन्यथेह हस्ती दूरोल्लालितकर एयात् ॥ १ ॥

अथवा ऐतु अयं लघु करोतु च मनोवाञ्छितं यथा मम । ससुतदयिताविरहप्रमुखदुःखव्युच्छेदनं भवति ॥ २ ॥

अथ गलगर्जिं घनघोषविभ्रमं कुञ्जरेण कृत्वा । निजपृष्ठे स्थापितो झटिति कुमारः कराग्रेण ॥ ३ ॥



For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir





हयहेसियं च जायं जयतूररवो वियंभिओ सहसा । सामंतमंतिलोएण परिवुडो तो गओ नयरं ॥ ४ ॥
जाओ पुरे पमोओ अपणयपुव्वात्ति पत्थिवा पणया । नरविक्कमेण रज्जं अत्तायत्तं कयं सव्वं ॥ ५ ॥
नरसिंघनिव्विसेसा जाया करितुरयरयणभंडारा । सक्कोव्व देवलोए विलसइ सो विविहकीलाहिं ॥ ६ ॥
केवलमेक्को चिय फुरइ तस्स हिययंमि नट्ठसल्लं व । दइयासुयदीहरविरहवइयरो दुस्सहो अणिसं ॥ ७ ॥

अन्नया जयवद्धणनयरासन्नुज्जाणे अणेगसीसपरिवुडो सीहोव्व दुद्धरिसो सूरोव्व निहि(ह)यतमपसरो चंदोव्व सोमसरीरो मंदरो इव थिरो जच्चकणगंव परिक्खखमो दूरविवज्जियराओवि अणंतराओ धरियपयडजमव्वओवि नीसेससत्तरक्खणबद्धलक्खो समिइ-वावारियमणपसरोऽवि सया पसंतचित्तो छत्तीसगुणमहामणिरोहणभूमिव्व धीनिहाणं व पच्चक्खधम्मरासिव्व भुवणभवणेक्कदीवोव्व

हयहेषितं च जातं जयतूर्यरवो विजृम्भितः सहसा । सामन्तमन्त्रिलोकेन परिवृतस्ततो गतो नगरम् ॥ ४ ॥
जातः पुरे प्रमोदोऽप्रणतपूर्वा अपि पार्थिवाः प्रणताः । नरविक्रमेण राज्यमात्मायत्तं कृतं सर्वम् ॥ ५ ॥
नरसिंहनिर्विशेषा जाताः करितुरगरत्नभाण्डागाराः । शक्र इव देवलोके विलसति स विविधक्रीडाभिः ॥ ६ ॥
केवलमेकमेव स्फुरति तस्य हृदये नष्टशल्यमिव । दयितासुतदीर्घविरहव्यतिकरो दुस्सहोऽनिशम् ॥ ७ ॥

अन्यदा जयवर्धननगरासन्नोद्याने अनेकशिष्यपरिवृतः सिंह इव दुर्द्धर्षः, सूर्य इव निहततमःप्रसरश्चन्द्र इव सौम्यशरीरः मन्दर इव स्थिरः, जात्यकनकमिव परीक्षाक्षमः, दूरविवर्जितरागोऽपि अनन्तरागः[जः] धृतप्रगटयमव्रतोऽपि निःशेषसत्वरक्षण-बद्धलक्षः समितिव्यापारितमनःप्रसरोऽपि सदा प्रशान्तचित्तः, षट्त्रिंशद्गुणमहामणिरोहणभूमिरिव, धीनिधानमिव, प्रत्यक्षधर्मराशिरिव,



For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir





सिवपंथसत्थवाहोव्व कम्मतरुनियरहव्ववाहोव्व दढजायदप्पकंदप्पसप्पसन्नागदमणिव्व समसमयपरसमयजलप्पवाहसिंधुव्व लोयच-
क्खुव्व नियनियविसंठुलकरणकुरंगेक्कपासोव्व मिच्छत्तजलाउलभवसमुद्दनिवडंतजंतुबोहित्थो पंचविहायारमहाभरेक्कनित्थारण-
समत्थो जइधम्मे असमत्थे सावयधम्मंमि संठवमाणो इयरे पुण जइधम्मे सिद्धंतपसिद्धनाएणं अपुव्वापुव्वजिणभवणाइं वंदमाणो
गामाणुगामं विहरंतो आगंतूण समंतभद्दाभिहाणो सूरी समोसरिओत्ति, जाया नयरे पसिद्धी, जहा असेसगुणगणावासो सूरी
आगओ, तओ कोऊहलेण य भवनिव्वेएणत्ति य संदेहपुच्छणेण य बहुमाणेण य धम्मसवणनिमित्तेण य नियनियदरिसणा-
भिप्पायविमरिसेण य समागया बहवे मंतिसामंतसेट्ठिसेणावइसत्थवाहदंडनाहप्पमुहा नयरलोया, निवडिया चरणेसु, निविट्ठा
जहासंनिहिया धरणिवट्ठे सूरीवि पुव्वभवज्जियगुरुकम्मजलणजालालितत्तगत्तेसु करुणामयवुट्ठिपिव दिट्ठिं सत्तेसु पेसंतो मंदर-

---

भुवनभवनैकदीप इव, शिवपथसार्थवाह इव, कर्मतरुनिकरहव्यवाह इव, दृढजातदर्पकन्दर्पसर्पसन्नागदमनीव, स्वसमयपरसमय-
जलप्रवाहसिन्धुरिव, लोकचक्षुरिव, निजनिजविसंस्थुलकरणकुरङ्गैकपाश इव, मिथ्यात्वजलाकुलभवसमुद्रनिपतज्जन्तुबोहित्थः, पञ्च-
विधाऽऽचारमहाभारैकनिस्तारणसमर्थो, यतिधर्मेऽसमर्थान् श्रावकधर्मे संस्थापयन् इतरान् पुनर्यतिधर्मे सिद्धान्तप्रसिद्धन्यायेन
अपूर्वापूर्वजिनभवनानि वन्दमानो ग्रामानुग्रामं विहरन्नागत्य सामन्तभद्राभिधानः सूरिः समवसृत इति, जाता नगरे प्रसिद्धिः,
यथाऽशेषगुणगणावासः सूरिरागतः, ततः कुतूहलेन च भवनिर्वेदनेति च संदेहप्रच्छनेन च बहुमानेन च धर्मश्रवणनिमित्तेन च
निजनिजदर्शनाभिप्रायविमर्शेन च समागता बहवो मन्त्रिसामन्तश्रेष्ठिसेनापतिसार्थवाहदण्डनाथप्रमुखा नगरलोकाः, निपतिताश्चरणयोः,
निविष्टा यथासन्निहिता धरणिपृष्ठे, सूरिरपि पूर्वभवार्जितगुरुकर्मज्वलनज्वालालितप्तगात्रेषु करुणाऽमृतवृष्टिमिव दृष्टिं सत्त्वेषु प्रेषयन्



For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir





गिरिमंथमहिज्जमाणखीरोयरवगंभीरेण सद्देण सद्धम्मदेसणं काउमारद्धो, कहं ?—

खरपवणपणुन्नकुसग्गलग्गजलबिंदुचंचलं जीयं । सुररायचावचवलं खणेणवि गलइ सरीरबलं ॥ १ ॥

पेम्मंपि तुंगगिरिसिरसरंतसरियातरंगमिव तरलं । लच्छीवि छइुणुड्डमरवंछिरी पेच्छइ छलाइं ॥ २ ॥

पयडपयट्टियदारुणविविहवियारा महासमुद्दे व । निवडंति आवया आवयव्व निच्चं सरीरंमि ॥ ३ ॥

मणिमंततंतदिव्वोसहीण वावारणेवि अविणासं । भुंजंता देंति दुहं विसया विसवल्लरीउव्व ॥ ४ ॥

मिच्छत्तमोहमोहियमईहिं कीरंति जाइं पावाइं । भवसयपरंपरासुवि वेरिव्व मुयंति नो ताइं ॥ ५ ॥

पियपुत्तकलत्ताईण जाण कज्जेसु वट्टियं बहुसो । परलोयपयट्टाणं ताणिवि नो हुंति ताणाय ॥ ६ ॥

---

मन्दरगिरिमन्थमध्यमानक्षीरोदरवगम्भीरेण शब्देन सद्धर्मदेशनां कर्तुमारब्धः, कथम्—

खरपवनप्रणुन्नकुशाग्रलग्नजलबिन्दुचञ्चलं जीवितम् । सुरराजचापचपलं क्षणेनापि गलति शरीरबलम् ॥ १ ॥

प्रेमापि तुङ्गगिरिशिरःसरत्सरित्तरङ्गमिव तरलम् । लक्ष्मीरपि च्छर्दनोड्डमरवाच्छित्री प्रेक्षते छलानि ॥ २ ॥

प्रकटप्रवर्तितदारुणविविधविकारा महासमुद्रे इव । निपतन्ति आपद आवर्ता इव नित्यं शरीरे ॥ ३ ॥

मणिमन्त्रतन्त्रदिव्यौषधीनां व्यापारणेऽपि अविनाशम् । भुज्यमाना ददति दुःखं विषया विषवल्लर्य इव ॥ ४ ॥

मिथ्यात्वमोहमोहितमतिभिः क्रियन्ते यानि पापानि । भवशतपरम्परास्वपि वैरीव मुञ्चन्ति नो तानि ॥ ५ ॥

प्रियपुत्रकलत्रादीनां येषां कार्येषु वर्तितं बहुशः । परलोकप्रवृत्तानां तान्यपि नो भवन्ति त्राणाय ॥ ६ ॥



For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir





इय भो नाउं जिणधम्ममणुदिणं सरह सरहसं कुसला ! । जावज्जवि वज्जमहासणिव्व निवडइ न तुम्ह जरा ॥ ७ ॥
तीसे पडणे पुण छिन्नपक्खपुडया विहंगवग्गव्व । उक्ड्डियदाढाभुयगव्व हरियरज्जा णरिंदव्व ॥ ८ ॥
सच्छंदगमणपरमीइजणणसव्वत्थसाहणविहीणा । चिररिद्धिं सुमरंता सुचिरं तुब्भे किलिस्सिहिह ॥ ९ ॥
पज्जंतं(ज्जत्तं)एत्तो जंपिएण जइ कामियाइं सोक्खाइं । भोत्तुं वंछह ता वीयरायवयणे समुज्जमह ॥ १० ॥

इय संसारनिस्सारत्तणपरिकहणेण पडिबुद्धा बहवे पाणिणो । बीयदिवसे य समायन्नियसूरिसमागमणवुत्तंतो समग्गगय-तुरयनरनियरपरियरिओ भारियासुयसंपओगपुच्छणकए समागओ नरविक्कमनराहिवो, तओ वंदिऊण सूरिं चिंतिउमाढत्तो-अहो एयस्स भुवणच्छरियभूयं रूवं विमुक्कामयवुट्ठी दिट्ठी सजलघणघोससुंदरो सरो नीसेसपसत्थलक्खणजुत्तं गत्तं पाणिग-

---

इति भो ज्ञात्वा जिनधर्ममनुदिनं स्मरत सरभसं कुशलाः । यावदद्यापि वज्रमहाशनिरिव निपतति न युष्माकं जरा ॥ ७ ॥
तस्याः पतने पुनः छिन्नपक्षपुटको विहङ्गमवर्ग इव । अपकर्षित[उद्धृत]दंष्ट्रभुजगा इव हृतराज्या नरेन्द्रा इव ॥ ८ ॥
स्वच्छन्दगमनपरमीतिजननसर्वार्थसाधनविहीनाः । चिरर्द्धिं स्मरन्तः सुचिरं यूयं क्लेशिष्यथ ॥ ९ ॥
पर्याप्तमितो जल्पितेन यदि कामितानि सौख्यानि । भोक्तुं वाञ्छथ तदा वीतरागवचने समुद्यच्छत ॥ १० ॥

इति संसारनिस्सारत्वनकथनेन प्रतिबुद्धा बहवः प्राणिनः। द्वितीयदिवसे च समाकर्णितसूरिसमागमनवृत्तान्तः समग्रगजतुरगनर-निकरपरिकरितो भार्यासुतसम्प्रयोगप्रच्छनकृते समागतो नरविक्रमनराधिपः, ततो वन्दित्वा सूरिं चिन्तयितुमारब्धः—अहो एतस्य भुवनाश्चर्यभूतं रूपं, विमुक्तामृतवृष्टि र्दृष्टिः, सजलघनघोषसुन्दरः स्वरः, निश्शेषप्रशस्तलक्षणयुक्तं गात्रं, प्राणिग-



For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir





णकयरई भारई, तहा—

तमनिग्गहिओ चंदो तमंमि मंदा रुई दिणयरस्स । गिरिविहियाभिभवो सायरोऽवि को हुज्ज एयसमो ? ॥ १ ॥

तं नत्थि जं न जाणइ भूयं भव्वं भविस्समवि वत्थुं । ता होइ पुच्छणिज्जो नियदइयापुत्तवुत्तंतं ॥ २ ॥

इय निच्छिऊण उवविट्ठो उचियासणे राया, गुरुणावि पारद्धा धम्मकहा, पुणरवि पडिबुद्धा पभूयपाणिणो, राइणावि पत्थावमुवलब्भ पुच्छिओ सूरी—भयवं ! निच्छियं मए, जहा—तं नत्थि जं न जाणह तुब्भे, ता काऊणाणुकंपं साहह कइया भारियाए सुएहि य सह मम समागमो भविस्सइत्ति, गुरुणा भणियं—महाराय ! धम्मुज्जमेण तदंतराइयकम्मक्खओवसमो जया होहिइ, राइणा भणियं—भयवं ! जाणामि एयं, केवलं दुस्सहविओगविहुरो न सक्केमि धम्मुज्जमं काउं, चित्तनिरोहस-

---

णकृतरतिः भारती, तथा—

तमोनिगृहीतश्चन्द्रस्तमसि मन्दा रुचिर्दिनकरस्य । गिरिविहिताभिभवः सागरोऽपि को भवेदेतत्समः ॥ १ ॥

तन्नास्ति यन्न जानाति भूतं भव्यं भविष्यदपि वस्तु । तस्माद्भवति प्रच्छनीयो निजदयितापुत्रवृत्तान्तम ॥ २ ॥

इति निश्चित्य उपविष्ट उचितासने राजा, गुरुणाऽपि प्रारब्धा धर्मकथा, पुनरपि प्रतिबुद्धाः प्रभूतप्राणिनः, राज्ञाऽपि प्रस्तावमुपलभ्य पृष्टः सूरिः—भगवन् ! निश्चितं मया, यथा—तन्नास्ति यन्न जानीथ यूयं, तस्मात्कृत्वाऽनुकम्पां कथयत कदा भार्यया सुताभ्यां च सह मम समागमो भविष्यतीति, गुरुणा भणितं—महाराज ! धर्मोद्यमेन तदन्तरायितकर्मक्षयोपशमो यदा भविष्यति, राज्ञा भणितं—भगवन् ! जानाम्येतत्, केवलं दुःसहवियोगविधुरो न शक्नोमि धर्मोद्यमं कर्तुं, चित्तनिरोधस-



For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir





वपेक्खो हि धम्मलक्खो कहमम्हारिसेहिं साहिउं तीरइ ?, ता सव्वहा कुणह पसायं, निवेयह अवरमुवायंति, गुरुणा भणियं-जइ एवं ता पज्जुवासेसु पइदिणं मुणिजणं, एयं खु परमोवाओ वंछियकज्जसिद्धीए, जओ—

विहडइ निविडकम्मनिगडंपि हु भिंदइ दुग्गइं, लहु कल्लाणवल्लिमुल्लासइ नासइ दुक्खसंगइं ।

वंछइ लच्छि पास परिसप्पणु दप्पणु जिम पभासए, मुणिजणसंगमेवि किं किं जणु जं नवि सोक्खु पासए ? ॥ १ ॥

तओ रोगिणव्व वेज्जोवइट्ठोसहं पंथपरिब्भट्ठेण व सुमग्गदेसणं तण्हाभिभूएण व विमलसलिलपडिपुण्णमहासरोवरनिवेयणं राइणा संममब्भुवगयमिमं गुरुवयणं, गओ य पणमिऊण सट्ठाणं ।

इओ य ते दोवि तस्स सुया नदीए कूलंमि निलीणा तण्हाछुहाभिभूया जाव खणंतरं चिट्ठंति तात्र एगो गोउलिओ

---

व्यपेक्षो हि धर्मलक्षः कथमस्मादृशैः साधुयितुं तीर्यते ? तस्मात्सर्वथा कुरुत प्रसादं, निवेदयतापरमुपायमिति, गुरुणा भणितं-यद्येवं तर्हि पर्युपासस्व प्रतिदिनं मुनिजनम्, एतत् खलु परमोपायो वाञ्छितकार्यसिद्धये, यतः—

विघटयति निबिडकर्मनिगडमपि हु भिनत्ति दुर्गतिम्, लघु कल्याणवल्लीमुल्लासयति नाशयति दुःखसंगतिम् ।

वाञ्छति लक्ष्मीः पार्श्वपरिसर्पणो दर्पण इव प्रभासते, मुनिजनसङ्गमेऽपि किं किं जनो यन्नापि सौख्यं पश्यति ॥ १ ॥

ततो रोगिणेव वैद्योपदिष्टौषधं पथिपरिभ्रष्टेनेव सुमार्गदेशनं, तृष्णाभिभूतेनेव विमलसलिलपरिपूर्णमहासरोवरनिवेदनं राज्ञा सम्यगभ्युपगतमिदं गुरुवचनं, गतश्च प्रणम्य स्वस्थानम् । इतश्च तौ द्वावपि तस्य सुतौ नद्याः कूले निलीनौ तृषाक्षुधाऽभिभूतौ यावत्क्षणान्तरं तिष्ठतस्तावदेको गोकुलिको



For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir





दहिमहियाणि णयरे विक्किणिऊण समागओ तत्थ पएसे, पेच्छइ देवकुमारनिविसेसरूवे करुणसरं रुयमाणे ते दोऽवि दारगे, तओ पुच्छिया तेण–रे पुत्तगा ! कीस रोयह ?, केण तुब्भे एत्थ ठविया ? को वा तुम्ह एत्थ सयणजणोत्ति ? जेट्ठेण साहिओ सवो पुववुत्तंतो, अह अणाहत्ति परिकलिऊण तेण जहासंनिहियअसणपाणदाणेणमहिनंदिऊण तेहिं तेहिं पयारेहिं उवलोभिऊण य नीया ते नियगोउलंमि, समप्पिया य गोउलाहिवस्स, तेणावि पुत्तविरहियाए समप्पिया नियदइयाए, सावि उदरुब्भवे इव परिपालेइ सव्वजत्तेण, उवयरइ खंडखज्जाइपमुहविसिट्ठवत्थुप्पयाणेण अणवरयं, सोऽवि गोउलाहिवई किल जयवद्धणनयराहिवस्स संबद्धोत्ति अन्नया कयाइ तेहिं दोहिवि पुत्तेहिं समेओ महामुल्लं पाहुडमादाय नरविक्कमनरिंददंसणत्थं समागओ जयवद्धणनयरं, दिट्ठो य नरवई, पणमिओ सव्वायरेणं, समप्पियं पाहुडं, दिन्नो राइणा सहत्थेण तंबोलो पुट्ठो य

---

दधिमथितानि नगरे विक्रीय समागतस्तत्र प्रदेशे, प्रेक्षते देवकुमारनिर्विशेषरूपौ करुणस्वरं रुदन्तौ तौ द्वावपि दारकौ, ततः पृष्टौ तेन–रे पुत्रकौ ! कस्माद् रुदितम् ? केन युवामत्र स्थापितौ ? को वा युवयोरत्र स्वजनजन इति ? ज्येष्ठेन कथितः सर्वः पूर्ववृत्तान्तः, अथानाथाविति परिकल्प्य तेन यथासन्निहिताशनपानदानेनाभिनन्द्य तैस्तैः प्रकारैरुपलोभ्य च नीतौ तौ निजगोकुले, समर्पितौ च गोकुलाधिपस्य, तेनापि पुत्रविरहितायै समर्पितौ निजदयितायै, साऽपि उदरोद्भवाविव परिपालयति सर्वयत्नेन, उपचरति खण्डखाद्यादिप्रमुखविशिष्टवस्तुप्रदानेन अनवरतम् ' सोऽपि गोकुलाधिपतिः किल जयवर्धननगराधिपस्य संबद्ध इति, अन्यदा कदाचित्ताभ्यां द्वाभ्यामपि पुत्राभ्यां समेतो महामूल्यं प्राभृतमादाय नरविक्रमनरेन्द्रदर्शनार्थं समागतो जयवर्धननगरं, दृष्टश्च नरपतिः, प्रणतः सर्वादरेण, समर्पितं प्राभृतं, दत्तो राज्ञा स्वहस्तेन ताम्बूलः, पृष्टश्च



For Private and Personal Use Only

सयलसुत्थासुत्थवत्ताओ, एत्थंतरे निवडिया दोसु तेसु पुत्तेसु राइणो दिट्ठी, जाओ गाढं पमोओ, परिभावियं च जहा धुवं एए मम तणयत्ति, तहावि पुच्छामि एयं–को पुण एत्थ वइयरोत्ति परिभाविय पुट्ठो गोउलाहिवई, कस्स भो एए पुत्तगत्ति ?, तेण भणियं–देव ! मम संबंधिणो, गेहिणीए आबालकालाओ उ वड्डियत्ति, राइणा भणियं–संमं साहेसु, जायसंखोभेण तेण सिट्ठो नईकूलाओ आरब्भ सयलो वुत्तंतो, एयमायन्निऊण राइणा परमहरिसपगरिसमुव्वहंतेण ते दोऽवि दारगा गाढमालिंगिय उच्छंगे निवेसिया, गोउलनायगेण भणियं–देव ! पुरावि मए विविहचेट्ठाहिं नाया एए जहा कस्सइ सामंतस्स वा सेणावइस्स वा नरवइस्स वा मग्गे गच्छंतस्स केणावि विसमपओगेण पब्भट्ठा होहिंति, कहमन्नहा एएसिं पइदिणंपि मट्टियाघडियदोघट्टघडभेडणेण य कित्तिमतुरयघट्टपयट्टणेण य संपिंडियसरिंडयपरिकप्पियसंदणवाहणेण य बुद्धिपइट्ठियकट्ठलट्ठिखग्गुव्व-

---

सकलस्वास्थ्यास्वास्थ्यवार्ताः, अत्रान्तरे निपतिता द्वयोस्तयोः पुत्रयो राज्ञो दृष्टिः, जातो गाढं प्रमोदः, परिभावितं च यथा ध्रुवमेतौ मम तनयाविति, तथाऽपि पृच्छाम्येतं–कः पुनरत्र व्यतिकर इति परिभाव्य पृष्टो गोकुलाधिपतिः, कस्य भो एतौ पुत्रकाविति ?, तेन भणितं–देव ! मम सम्बन्धिनः, गेहिन्या आबालकालात्तु वर्धिताविति, राज्ञा भणितं–सम्यक् कथय जातसंक्षोभेण तेन शिष्टो नदीकूलादारभ्य सकलो वृत्तान्तः, एतदाकर्ण्य राज्ञा परमहर्षप्रकर्षमुद्वहता तौ द्वावपि दारकौ गाढमालिङ्ग्य उत्सङ्गे निवेशितौ, गोकुलनायकेन भणितं–देव ! पुराऽपि मया विविधचेष्टाभिर्ज्ञातौ एतौ यथा कस्यापि सामन्तस्य वा सेनापतेर्वा नरपतेर्वा मार्गे गच्छतः केनापि विषमप्रयोगेणप्रभ्रष्टौ भविष्यत इति, कथमन्यथा एतयोः प्रतिदिनमपि मृत्तिकाघटितदोघट्ट[ हस्ति ]घटाभेदनेन च कृत्रिमतुरगघट्टप्रवर्तनेन च संपीण्डितसरिण्डकपरिकल्पितस्यन्दनवाहनेन च बुद्धिप्रतिष्ठितकाष्ठलष्टिखड्गो–



For Private and Personal Use Only

हणेण य चाउरंगसेणासंमद्दुद्दामसंगामपरिकप्पणेण य डिंभाण गामागरनगरपसायदाणेण य विविहा कीला अहेसि ?, न य एवंविहा चेट्ठा पागयसुयाण होइ, तहा सव्ववेलासु मम तुम्ह दंसणत्थमेंतस्स एयाणवि नरिंदभवणदंसणकए गाढनिब्बंधो आसि, केवलमहं वावत्तिऊण विसिट्ठवत्थदाणेण दिट्ठिवंचणेण य पुरा एंतो, इण्हिं पुण गाढनिब्बंधं काऊण मम खणंपि पुट्ठिं अमुंचमाणा समागयत्ति, अहो महाणुभावेण कहं ममोवयरियंति चिंततेण रन्ना परमपमोयभरनिब्भरंगेण दिन्नं तस्स तं चेव गोउलं गामसयं च आचंदकालियं सासणनिबद्धं भुत्तीए, पभूयवत्थतंबोलाइणा य पूइऊण पेसिओ सट्ठाणंति । सयंपि पुत्त-जुयलपरियरिओ गओ सूरिसमीवं, वंदित्ता परमायरेणं निवेइओ पुत्तसमागमवुत्तंतो, सूरिणा भणियं-महाराय ! सुमरिसि पुव्वभणियं अम्ह वयणं ? राइणा भणियं-भयवं ! नियनामंपिव सुमरामि, सूरिणा भणियं-महाभाग ! केत्तियमेत्तमेयं ?,

---

हनेन च चतुरङ्गसेनासंमर्दोद्दामसंग्रामपरिकल्पनेन च डिम्भेभ्यो ग्रामाकरनगरप्रासाद[ प्रसाद ]दानेन च विविधाः क्रीडा आसन् ? न चैवंविधा चेष्टा प्राकृतसुतानां भवति, तथा सर्ववेलासु मम युष्माकं दर्शनार्थमायत एतयोरपि नरेन्द्रभवनदर्शनकृते गाढनिर्बन्ध आसीत्, केवलमहं व्यावर्त्य विशिष्टवस्त्रदानेन दृष्टिवञ्चनेन च पुरा आयम्, इदानीं पुनर्गाढनिर्बन्धं कृत्वा मम क्षणमपि पृष्ठम-मुञ्चमानौ समागताविति, अहो महानुभावेन कथं ममोपचरितमिति चिन्तयता राज्ञा परमप्रमोदभरनिर्भराङ्गेन दत्तं तस्य तदेव गोकुलं ग्रामशतं चाचन्द्रकालिकं शासननिबद्धं भुक्त्यै, प्रभूतवस्त्रताम्बूलादिना च पूजयित्वा प्रेषितः स्वस्थानमिति । स्वयमपि पुत्रयुगलप-रिकरितो गतः सूरिसमीपं, वन्दित्वा परमादरेण निवेदितः पुत्रसमागमवृत्तान्तः, सूरिणा भणितं-महाराज ! स्मरसि पूर्वभणित-मस्माकं वचनम् ?, राज्ञा भणितं-भगवन् ! निजनामेव स्मरामि, सूरिणा भणितं-महाभाग ! कियन्मात्रमेतत् ?



For Private and Personal Use Only

गुरुजणपज्जुवासणेण तं नत्थि जं न सिज्झइत्ति, रन्ना भणियं-अवितहमेयं, किं पच्चक्खेवि अणुववन्नं भणिज्जइ ?, पसीयसु इयाणिं एक्केण दइयवियोगदुक्खवोच्छेयणेणं, गुरुणा भणियं-मा ऊसुगो होसु, एवंति पडिवज्जिय पणमिऊण य सव्वायरेण गओ राया सट्ठाणं ।

इओ य सो देहिलो नावावणिओ अणुकूलपवणपणोलिज्जमाणसियवडवसवेगपयट्टियजाणवत्तो गंतुं पवत्तो समुद्दंमि, सीलवईवि तहाविहं अदिट्ठपुव्वं वइयरं अवलोइऊण हा पिय ! पाणनाह ! किमेवंविहं वसणं विसममावडियंति जंपिऊण य अकंडनिवडियवज्जदंडताडियव्व मुच्छानिमीलियच्छी परसुछिन्नव्व चंपगलया निवडिया जाणवत्तभूमितले, समासासिया पासवत्तिणा परियणेण सिसिरोवयारेहिं, खणंतरेण लद्धचेयणा गाढसुयपिययमवियोगवसविसंठुला गलंतनयणजलप्पवाहा विलविउमेवं पवत्ता—

---

गुरुजनपर्युपासनेन तन्नास्ति यन्न सिद्ध्यतीति, राज्ञा भणितं-अवितथमेतत्, किं प्रत्यक्षेऽपि अनुपपन्नं भण्यते ?, प्रसीदेदानीमेकेन दयितावियोगदुःखव्युच्छेदनेन, गुरुणा भणितं-मा उत्सुको भव, एवमिति प्रतिपद्य प्रणम्य च सर्वादरेण गतो राजा स्वस्थानम् ।

इतश्च स देहिलो नावावणिजोऽनुकूलपवनप्रणोद्यमानसितपटवशवेगप्रवर्तितयानपात्रो गन्तुं प्रवृत्तः समुद्रे, शीलवत्यपि तथाविधमदृष्टपूर्वं व्यतिकरमवलोक्य हा प्रिय ! प्राणनाथ ! किमेवंविधं व्यसनं विषममापतितमिति जल्पित्वा च अकाण्डनिपतितवज्रदण्डताडितेव मूर्च्छानिमीलिताक्षी परशुच्छिन्नेव चम्पकलता निपतिता यानपात्रभूमितले, समाश्वासिता पार्श्ववर्तिना परिजनेन शिशिरोपचारैः, क्षणान्तरेण लब्धचेतना गाढसुतप्रियतमवियोगवशविसंस्थुला गलन्नयनजलप्रवाहा विलपितुमेवं प्रवृत्ता—

हा भुवणपयडपोरिस ताय ! सजीयस्स संनिहं दट्ठुं । किमुवेहसि अइदुहियं नियदुहियं संपयं एयं ? ॥ १ ॥
नरसिंहनराहिव ! नियवहुंपि किमुवेहसे अणज्जेण । एवंपि हीरमाणिं ? हा हा विपरंमुहो दइवो ॥ २ ॥
हा पाणनाह ! हा गोत्तदेवया हा समत्थदिसिनाहा । रक्खह रक्खह एयं हीरंती पावमिच्छेणं ॥ ३ ॥

एवमाईणि करुणाइं जंपंती सा संभासिया नावावणिएण–भद्दे ! कीस एवं विलवसि ?, धीरा भव, नाहं सुमिणेवि तुह पडिकूलकारी, जओ एसा समुद्धुरा रिद्धी तुहायत्ता, एसोऽहं दासनिव्विसेसो, ता पडिवज्जसु सामिणीसद्दं, वावारेसु नियबुद्धीए गेहकज्जेसु एयं परियणंति, सीलवईए भणियं—

अवसर दिट्ठिपहाओ निट्ठुर ! पाविट्ठ ! धिट्ठ ! दुच्चेट्ठ ! । अहवा सासनिरोहेण जीवियं लहु चइस्सामि ॥ १ ॥

---

हा भुवनप्रकटपौरुष ! तात ! स्वजीवस्य संनिभां दृष्ट्वा । किमुपेक्षसे अतिदुःखितां निजदुहितरं साम्प्रतमेताम् ॥ १ ॥
नरसिंहनराधिप ! निजवधूमपि किमुपेक्षसे अनार्येण । एवमपि ह्रियमाणां हाहा विपराङ्मुखो दैवः ॥ २ ॥
हा प्राणनाथ ! हा गोत्रदेवताः ! हा समस्तदिङ्नाथाः ! । रक्षत रक्षत एतां ह्रियमाणां पापम्लेच्छेन ॥ ३ ॥

एवमादीनि करुणानि जल्पन्ती सा संभाषिता नावावणिजा–भद्रे ! कस्मादेवं विलपसि ?, धीरा भव, नाहं स्वप्नेऽपि तव प्रतिकूलकारी, यत एषा समुद्धुरा ऋद्धिस्तवाऽऽयत्ता, एषोऽहं दासनिर्विशेषः, तस्मात्प्रतिपद्यस्व स्वामिनीशब्दं, व्यापारय निजबुद्ध्या गृहकार्येषु एतं परिजनमिति, शीलवत्या भणितम्—

अपसर दृष्टिपथात् निष्ठुर ! पापिष्ठ ! धृष्ट ! दुश्चेष्ट ! । अथवा श्वासनिरोधेन जीवितं लघु त्यक्ष्यामि ॥ १ ॥



For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir





रे रे खत्तियकुलसंभवंपि आजम्मसुद्धसीलंपि । मं एवमुल्लवंतो नियजीयस्सवि न लज्जेसि ? ॥ २ ॥

किंच–खिज्जउ देहं निहरउ जीवियं पडउ दुक्खरिंछोली । नियतायदिन्ननामत्थविहडणं नेव काहामि ॥ ३ ॥

इय तीए निच्छयमुवलब्भ निवारियं तेण भत्तपाणं, छुहापिवासाभिभूयाएवि न परिचत्तो तीए नियनिच्छओ, एत्थंतरे तीए विसुद्धसीलपरिपालणतुट्ठाए सण्णिहियसमुद्ददेवयाए खित्तं महावत्ते तस्स जाणवत्तं, कओ जुगंतसमयदारुणो समीरणो समुल्लासिया कुलसिहरविब्भमा जलकल्लोला, विउव्वियाइं गयणे घोरायाराइं गंधव्वनयराइं, दंसिया गहिरगज्जिरवभीसणा फुरंतफारविज्जुपुंजपिंजरा जलहरा, तओ वाउलीहूओ कन्नधारो, जाया विहत्था सुहडसत्था, ठिया विमणदुम्मणा अवल्लवाहगजणा, बाढं वाउलीभूओ नावावणिओ, एत्थंतरे गयणट्ठियाए जंपियं देवीए—

---

रे रे क्षत्रियकुलसंभवामपि आजन्मशुद्धशीलामपि । मामेवमुल्लपन् निजजीवितादपि न लज्जसे ॥ २ ॥

किं च—क्षीयतां देहः निस्सरतु जीवितं पततु दुःखरिञ्छोली । निजतातदत्तनामार्थविघटनां नैव करिष्यामि ॥ ३ ॥

इति तस्या निश्चयमुपलभ्य निवारितं तेन भक्तपानं, क्षुत्पिपासाऽभिभूतयाऽपि न परित्यक्तस्तया निजनिश्चयः, अत्रान्तरे तस्या विशुद्धशीलपरिपालनतुष्टया सन्निहितसमुद्रदेवतया क्षिप्तं महाऽऽवर्ते तस्य यानपात्रं, कृतो युगान्तसमयदारुणस्समीरणः, समुल्लासिताः कुलशिखरविभ्रमा जलकल्लोलाः, विकूर्वितानि गगने घोराकाराणि गन्धर्वनगराणि, दर्शिता गभीरगर्जद्रवभीषणाः स्फुरत्स्फारविद्युत्पुञ्जपिञ्जरा जलधराः, ततो व्याकुलीभूतः कर्णधारः, जाता विहस्ताः सुभटसार्थाः, स्थिता विमनोदुर्मनसः अवल्लवाहकजनाः, बाढं व्याकुलीभूतो नावावणिक्, अत्रान्तरे गगनस्थितया जल्पितं देव्या—



For Private and Personal Use Only

रे रे जइ दुट्ठवणियतणय! णयविरहियहियकाम कामगद्दह दहणसारिच्छ रिंच्छोव्व तुच्छपेच्छय छयलगलथणसमाण माणवजणगरहणिज्जसील! सीलवइं धरिसिहिसि एवं ता पाव! पावेसि इयाणिं विणासंति सोच्चा पंडुरपडपाउरणो कयपूया-वित्थरो विणयपणओ करकलियधूवदहणो सो विन्नविउं समाढत्तो–देवि! ममेक्कं दोसं दासस्स व खमसु परिहरसु कोवं न पुणो काहामीमं, पणए न परंमुहा देवा, ताहे भणियं देवीए–रे तुमं जइ सुहेण पालिहिसि नियजणणिनिव्विसेसं एयं ता जीवसि हयास!, तेण तहत्ति सव्वं पडिवन्नं गाढभयवसट्टेण, उवसंहरियं देवीए डमरं अद्दंसणं च गया। अह जाओ अणु-कूलो पवणो, मग्गेण लग्गं जाणवत्तं, हरिसिया कन्नधाराइणो जणा, परितुट्ठो सो वणिओ, पडिओ सव्वायरेण चलणेसु सील-वईए, खामिया नियदुच्चरियं, भणिया य सा–सुयणु! मा काहिसि सव्वहा सोगं, अचिरेण तहा काहामि जहा मिलसि

---

रे रे यदि दुष्टवणिक्तनय! नयविरहितहितकाम कामगर्दभ दहनसदृक्ष! ऋक्ष इव तुच्छप्रेक्षक! छगलगलस्तनसमान! मानवजनगर्हणीयशील! शीलवतीं धर्षिष्यसि एवं तर्हि पाप! प्राप्नोषीदानीं विनाशमिति श्रुत्वा पाण्डुरपटप्रावरणः कृतपूजाविस्तारः विनयप्रणतः करकलितधूपदहनः स विज्ञपयितुं समारब्धः–देवि! ममैकं दोषं दासस्येव क्षमस्व परिहर कोपं न पुनः करिष्यामीदं, प्रणते न पराङ्मुखाः देवाः, तदा भणितं देव्या–रे त्वं यदि सुखेन पालयिष्यसि निजजननीनिर्विशेषामेतां तर्हि जीवसि हताश! तेन तथेति सर्वं प्रतिपन्नं गाढभयवशार्तेन, उपसंहृतं देव्या डमरमदर्शनं च गता। अथ जातोऽनुकूलः पवनः, मार्गेण लग्नं यानपात्रं हर्षिताः कर्णधारादयो जनाः, परितुष्टः स वणिक्, पतितः सर्वादरेण चरणयोः शीलवत्याः, क्षमिता निजदुश्चरितं, भणिता च सा–सुतनो! मा करिष्यसि सर्वथा शोकम्, अचिरेण तथा करिष्यामि यथा मिलिष्यसि

११



For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir





नियपिययमस्स, कारविया य पाणवित्ति, समप्पिया निरुवद्दवनिवासनिमित्तमेक्का उव्वरिगा, तओ पइदिणं मायरं व भयणिं व देवयं व गुरुं व सामिं व वत्थेण य भोयणेण य भेसहेण य तंबोलेण य संमं पडियरमाणो पत्तो परतीरं, विक्किणियाइं नियभंडाइं पाविओ भूरिअत्थसंचओ निवत्तियासेसकज्जो वलिओ सनयराभिमुहं, अंतरे आगच्छंतस्स अणणुकूलपवणपणोल्लियं लग्गं जयवद्धणनयरपरिसरंमि बोहित्थं, तओ विमुक्का नंगरा पाडिओ सियवडो उत्तरिओ बहुकिंकरनरपरियरिओ सो वाणिओ, गओ विचित्ताइं महरिहाइं परतीरभवाइं पाहुडाइं गहाय नरविक्कमनराहिवस्स दंसणत्थं, पडिहारनिवेइओ य पविट्ठो रायभवणं दिट्ठो राया, समप्पियाइं पाहुडाइं, कओ राइणा सम्माणो, तओ समुद्दलंघणवइयरनिवेयणेण परतीरनयररायसरूववत्ताकहणेण नियकयाणगगुणदोसपयडणेण य ठिओ नरवइस्स समीवे पहरमेक्कं, एत्थंतरे पणमिऊण विन्नत्तं तेण-देव ! सुन्नं पवहणं समा-

---

निजप्रियतमस्य, कारिता च प्राणवृत्तिः, समर्पिता निरुपद्रवनिवासनिमित्तमेका उद्वरिका[अपवरिका], ततः प्रतिदिनं मातरमिव भगिनीमिव देवतामिव गुरुमिव स्वामिनमिव वस्त्रेण च भोजनेन च भैषज्येन च ताम्बूलेन च सम्यक् परिचरन् प्राप्तः परतीरम्, विक्रीतानि निजकभाण्डानि प्राप्तो भूर्यर्थसंचयः निवर्तिताशेषकार्यो वलितः स्वनगराभिमुखम्, अन्तरे आगच्छतोऽननुकूलपवनप्रणोदितं लग्नं जयवर्धननगरपरिसरे बोहित्थं [ प्रवहणं ], ततो विमुक्ता नङ्गराः, पातितः सितपटः, उत्तीर्णो बहुकिङ्करनरपरिकरितः स वणिक्, गतो विचित्राणि महार्हाणि परतीरभवानि प्राभृतानि गृहीत्वा नरविक्रमनराधिपस्य दर्शनार्थं, प्रतिहारनिवेदितश्च प्रविष्टो राजभवनं, दृष्टो राजा, समर्पितानि प्राभृतानि, कृतो राज्ञा संमानः, ततः समुद्रलङ्घनव्यतिकरनिवेदनेन परतीरनगरराजस्वरूपवार्ताकथनेन निजक्रयाणकगुणदोषप्रकटनेन च स्थितो नरपतेः समीपे प्रहरमेकम्, अत्रान्तरे प्रणम्य विज्ञप्तं तेन-देव ! शून्यं प्रवहणं,



For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



गच्छइ रयणी ता अणुजाणह ममं गमणायत्ति, राइणावि पिययमाविओगविहुरेण एस चेव अज्ज दीहरनिसाए विणोयकारी हवउत्ति परिचिंतयंतेण भणिओ सो–भद्द ! वीसत्थो इहेव चिट्ठसु, नियपहाणपुरिसेहिं रक्खावइस्सामि तुह जाणवत्तं, जं देवो आणवेइत्ति भणिऊण पडिवन्नं तेण, विसज्जिया य राइणा नियपहाणपुरिसा पवहणरक्खणत्थं, एत्थंतरे उट्ठिया दोवि कुमारा विन्नत्तं च तेहिं, जहा–ताय ! अदिट्ठपुव्वं अम्ह पवहणं, गाढं च कोउयं तद्दंसणे, ता अणुजाणउ ताओ जेण गच्छामोत्ति, तन्निच्छयमुवलब्भ अणुन्नाया य नरिंदेण, गया य अंगरक्खनरपरिक्खित्ता ते जाणवत्ते, तं च इओ तओ निरिक्खिऊण पसुत्ता तत्थेव। अह पच्छिमरयणिसमए पडिबुद्धा परोप्परं वत्ता काउमारद्धा, खणंतरेण लहुएण भाउणा पुट्ठो जेट्ठो भाया–अहो भाय ! कहसु किंपि अपुव्वं अक्खाणयं, इह ठियाण न झिज्जइ कहमवि विभावरी, जेट्ठभाउणा भणियं–भद्द ! किमन्नेण

---

समागच्छति रजनी तस्मादनुजानीत मां गमनायेति, राज्ञाऽपि प्रियतमावियोगविधुरेण एष एवाद्य दीर्घनिशि विनोदकारी भवत्विति परिचिन्तयता भणितः सः–भद्र ! विश्वस्त इहैव तिष्ठ, निजप्रधानपुरुषै रक्षयिष्यामि तव यानपात्रं, यद्देव आज्ञापयतीति भणित्वा प्रतिपन्नं तेन, विसृष्टाश्च राज्ञा निजप्रधानपुरुषाः प्रवहणरक्षणार्थम् । अत्रान्तरे उत्थितौ द्वावपि कुमारौ, विज्ञप्तं च ताभ्यां यथा–तात ! अदृष्टपूर्वमावयोः प्रवहणं, गाढं च कौतुकं तद्दर्शने, तस्मादनुजानातु तातो येन गच्छाव इति । तन्निश्चयमुपलभ्यानुज्ञातौ च नरेन्द्रेण, गतौ चाङ्गरक्षनरपरिक्षिप्तौ तौ यानपात्रे । तच्चेतस्ततो निरीक्ष्य प्रसुप्तौ तत्रैव । अथ पश्चिमरजनीसमये प्रतिबुद्धौ परस्परं वार्ताः कर्तुमारब्धौ । क्षणान्तरेण लघुकेन भ्रात्रा पृष्टो ज्येष्ठो भ्राता–अहो भ्रातः ! कथय किमपि अपूर्वमाख्यानकम् , इह स्थितयोः न क्षीयते कथमपि विभावरी । ज्येष्ठभ्रात्रा भणितं–भद्र ! किमन्ये-

नृपपुत्रयोः प्रवहणरक्षार्थं गमनम् ॥



For Private and Personal Use Only

अक्खाणयसवणेण ?, एयं चिय अप्पणोतणयं अक्खाणयमपुव्वं निसुणेहि, तेण जंपियं-एयमवि साहेहि, तओ—

करकलियकुसुममाला जह जणणी रायमग्गमणुपत्ता । जह वलिया नो पुणरवि जह नयरे मग्गिया बहुसो ॥१॥
जह ताओवि दुहत्तो अम्हेहिं समं गओ नईकूले । जह परतीरनिरूवणकएण सलिलंमि ओगाढो ॥ २ ॥
जह सरियनीरपूरप्पवाहिओ दूरदेसमणुपत्तो । जह अम्हे गोउलिएण गोउलं पाविया विवसा ॥ ३ ॥
जह वुड्ढिं संपत्ता रायउले जह गया तओ अम्हे । रायावलोणत्थं जह विन्नाया य ताएणं ॥ ४ ॥
जह वा महल्लकोऊहलेण एत्थागया तहा सव्वं । अक्खाणयमप्पणगं उवइट्ठं लहुगभाउस्स ॥ ५ ॥

एयं च कहिज्जमाणमामूलाओ निसुणियं समग्गमवि समीवदेससंठियाए सीलवईए, तओ अपुव्वं अणाइक्खणिज्जं केवल-

---

नाऽऽख्यानकश्रवणेन ? एतदेव आत्मनः सत्कमाख्यानकमपूर्वं निशृणु, तेन जल्पितम्—एतदपि, कथय, ततः—

करकलितकुसुममाला यथा जननी राजमार्गमनुप्राप्ता । यथा वलिता नो पुनरपि यथा नगरे मार्गिता बहुशः ॥ १ ॥
यथा तातोऽपि दुःखार्त आवाभ्यां सह गतो नदीकूले । यथा परतीरनिरूपणकृतेन सलिलेऽवगाढः ॥ २ ॥
यथा सरिन्नीरपूरप्रवाहितो दूरदेशमनुप्राप्तः । यथाऽऽवां गोकुलिकेन गोकुलं प्रापितौ विवशौ ॥ ३ ॥
यथा वृद्धिं सम्प्राप्तौ राजकुले यथा गतौ तत आवाम् । राजाऽवलोकनार्थं यथा विज्ञातौ च तातेन ॥ ४ ॥
यथा वा महाकुतूहलेनात्राऽऽगतौ तथा सर्वम् । आख्यानकमात्मीयमुपदिष्टं लघुकभ्रात्रे ॥ ५ ॥

एतच्च कथ्यमानमामूलाद् निश्रुतं समग्रमपि समीपदेशसंस्थितया शीलवत्या, ततोऽपूर्वमनाचक्षणीयं केवलमनुभवगम्यं



For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir





मणुभवगम्मं नियसुयसाहियवइयरपरिन्नायसमुत्थहरिसपगरिसमुव्वहंती समुच्चरोमंचुच्चाइयकंचुया सुयसिणेहवसपगलंतथणमुह-सुद्धदुद्धधारा एह चिरकालपत्तगा पुत्तगा ! नियजणणिं गाढमालिंगहत्ति भणंती गया तेसिं पच्चासन्नं, निवेइओ पुव्ववित्तंतो, विन्नाया जेट्ठपुत्तेण, तओ गाढं कंठमवलंबिय चिरविरहदुहावेगसूयगविसंठुलवयणगब्भं निब्भरं सपुत्तावि रोविउं पवत्ता, विन्नायपरमत्थेण मुहुत्तमेत्तं विलंबिय समासासिया कुमारपरियणेण, अह उग्गयंमि दिणयरे परियणमज्झाओ एगेण पुरिसेण तुरियं गंतूण भणिओ नरविक्कमो–देव ! तुम्ह दइया कुमारेहिं एयस्स चेव नावावाणियस्स जाणवत्ते पत्तत्ति, तओ हरिसभर-निब्भरहियएण सविम्हयं पुच्छिओ राइणा एसो–भद्द ! को एस वुत्तंतोत्ति ?, तेणवि संजायभएण भणियं–देव ! वियरसु मे अभयदाणेणप्पसायं जेण जहावित्तं निवेएमि, पडिवन्नं नरिंदेण, तओ पढमाणुरागाओ आरब्भ जाणवत्तारोवणकंदणोव-

---

निजसुतकथितव्यतिकरपरिज्ञातसमुत्थहर्षप्रकर्षमुद्वहन्ती समुच्चरोमाञ्चोच्चायितकञ्चुका सुतस्नेहवशप्रगलत्स्तनमुखशुद्धदुग्धधारा ऐतं चिरकालप्राप्तकौ पुत्रकौ ! निजजननीं गाढमालिङ्गतमिति भणन्ती गता तयोः प्रत्यासन्नं, निवेदितः पूर्ववृत्तान्तः, विज्ञाता ज्येष्ठ-पुत्रेण, ततो गाढं कण्ठमवलम्ब्य चिरविरहदुःखावेगसूचकविसंस्थुलवचनगर्भं निर्भरं सपुत्राऽपि रोदितुं प्रवृत्ता, विज्ञातपरमार्थेन मूहूर्तमात्रं विलम्ब्य समाश्वासिता कुमारपरिजनेन, अथोद्गते दिनकरे परिजनमध्यादेकेन पुरुषेण त्वरितं गत्वा भणितो **नरविक्रमः**–देव ! युष्माकं दयिता कुमाराभ्यामेतस्यैव नौवणिजो यानपात्रे प्राप्तेति ! ततो हर्षभरनिर्भरहृदयेन सविस्मयं पृष्टो राज्ञा एषः–भद्र ! क एष वृत्तान्त इति ? तेनापि संजातभयेन भणितं–देव ! वितर मेऽभयदानेन प्रसादं येन यथावृत्तं निवेदयामि, प्रतिपन्नं नरेन्द्रेण । ततः प्रथमानुरागादारभ्य यानपात्राऽऽरोपणाक्रन्दनोप-



For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir





लोभणदेवयाभेसणप्पमुहो साहिओ नीसेसो वुत्तंतो, एयमायन्निऊण य नरवइणा समग्गधणजाणवत्तसहिओ निव्विसओ आणत्तो सो वाणियगो, सीलवईवि देवी करेणुगाखंधगया धरियसियछत्ता चामरेहिं वीइज्जमाणी पए पए पडिच्छंती नयर-जणकयं पूयासक्कारं ठाणे ठाणे वियरमाणा दीणाणाहाण कणगदाणं पवेसिया परमविभूईए नियमंदिरं, काराविओ पुरे अट्ठदिवसिओ महूसवो, अह ण्हवियविलित्ताए नियंसियामलमहग्घवत्थाए सुयजुयलपरिवुडाए पमोयभरनिब्भरंगीए सील-वईए पुरओ पुव्वणुभूयं कहं कहंतेण तीसे य हरणपमुहं वित्तंतं निसुणमाणेण रण्णा मालागारस्स तस्स पाडलयनामधेयस्स सच्चरियमणुवयारं तहाविहं सुमरियं झत्ति, तो भणिया सीलवई–पिए ! पियाविहु न एरिसो होइ जारिसओ स महप्पा मालागारो सिणेहपरो, भणियं सीलवईए–सच्चमिणं नाह !, ता कुण पसायं सुसमिद्धिवियरणेणं महाणुभावस्स तस्स तुमं,

लोभनदेवताभीषणाप्रमुखः कथितो निःशेषो वृत्तान्तः । एतदाकर्ण्य च नरपतिना समग्रधनयानपात्रसहितो निर्विषय आज्ञप्तः स वणिक् । शीलवत्यपि देवी करेणुकास्कन्धगता धृतश्वेतच्छत्रा चामराभ्यां वीज्यमाना पदे पदे प्रतीच्छन्ती नगरजनकृतं पूजासत्कारं स्थाने स्थाने वितरन्ती दीनानाथेभ्यः कनकदानं प्रवेशिता परमविभूत्या निजकमन्दिरं, कारितः पुरे अष्टदैवसिको महोत्सवः । अथ स्नपितविलिप्ताया निवसितामलमहर्घ्यवस्त्रायाः सुतयुगलपरिवृतायाः प्रमोदभरनिर्भराङ्गयाः शीलवत्याः पुरतः पूर्वानुभूतां कथां कथयता तस्याश्च हरणप्रमुखं वृत्तान्तं निशृण्वता राज्ञा मालाकारस्य तस्य पाटलकनामधेयस्य सच्चरितमनुपचारं तथाविधं स्मृतं झटिति, ततो भणिता शीलवती–प्रिये ! पिताऽपि हु न ईदृशो भवति यादृशः स महात्मा मालाकारः स्नेहपरः । भणितं शीलवत्या–सत्यमिदं नाथ ! तस्मात्कुरु प्रसादं सुसमृद्धिवितरणेन महानुभावस्य तस्य त्वम् ।



For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir





फलमेयं चिय लच्छीए नाह ! संझब्भरागचवलाए जं पूरिज्जंति मणोरहाओ उवयारिलोगस्स ।
इय सोच्चा से वयणं रण्णा संदणपुराउ सो सिग्घं । आणाविऊण ठविओ चोडयविसए महाराओ ॥ १ ॥
दिन्नो से भंडारो समप्पिया करितुरंगरहजोहा । किं बहुणा ? अत्तसमो सोऽवि कओ तेण नरवइणा ॥ २ ॥
अन्नदिवसे य भज्जासुयसमेओ नरविक्कमो महया रिद्धिसमुदएणं गओ उज्जाणे, दिट्ठो सूरी, सव्वायरेण पणमिऊण पसाहिओ समीहियसंपत्तिवइयरो, गुरुणा भणियं-महाराय ! एरिसकल्लाणवल्लिनिबंधणाणि मुणिजणचरणसेवणाणि, राइणा चिंतियं-अहो अमोहं गुरुवयणं, अहो जिणधम्मस्स माहप्पं, सव्वहा धन्नोऽहं जस्स मे एवंविहेण मुणिणाहेण समं संगमो जाओ, एवं च चिंतयंतेण रन्ना उवज्जियं सुगइकप्पतरुस्स सम्मत्तस्स बीयंति, गुरुणा भणियं-महाराय ! पडिवज्जसु निच्छइयं

---

फलमेतदेव लक्ष्म्या नाथ ! सन्ध्याऽभ्ररागचपलायाः यत् पूर्यन्ते मनोरथा उपकारिलोकस्य ।
इति श्रुत्वा तस्या वचनं राज्ञा स्यन्दनपुरात् स शीघ्रम् । आनाय्य स्थापितः चोडकविषये महाराजः ॥ १ ॥
दत्तस्तस्य भण्डारः समर्पिताः करितुरङ्गरथयोधाः । किं बहुना ? आत्मसमः सोऽपि कृतस्तेन नरपतिना ॥ २ ॥
अन्यदिवसे च भार्यासुतसमेतो नरविक्रमो महता ऋद्धिसमुदयेन गत उद्याने, दृष्टः सूरिः, सर्वाऽऽदरेण प्रणम्य प्रकथितः समीहितसम्प्राप्तिव्यतिकरः, गुरुणा भणितं-महाराज ! ईदृशकल्याणवल्लीनिबन्धनानि मुनिजनचरणसेवनानि, राज्ञा चिन्तितम्-अहो अमोघं गुरुवचनम्, अहो जिनधर्मस्य माहात्म्यं, सर्वथा धन्योऽहं यस्य मम एवंविधेन मुनिनाथेन सह सङ्गमो जातः, एवं च चिन्तयता राज्ञोपार्जितं सुगतिकल्पतरोः सम्यक्त्वस्य बीजमिति । गुरुणा भणितं-महाराज ! प्रतिपद्यस्व नैश्चयिकं



For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



संपइ जिणधम्मं, राइणा भणियं-भयवं ! दढमप्पमत्तुत्तमसत्तजणजोग्गो जिणधम्मो, कहमम्हारिसजणा सक्कंति अणुपालिउं ?, गुरुणा नायं-अज्जवि निट्ठुरो मोहगंठी दढनिबंधणा मिच्छत्तवासणा तिव्वाणुबंधो विसयपडिबंधो सवणमेत्ता विसेसधम्मवत्ता, तम्हा जहाभद्दगत्तमेव एयस्स इण्हिमुचियंति चिंतिऊण वुत्तो सो-महाराय ! जइ एवं ता पज्जुवासेज्ज सुसाहुणो पसंसेज्जसु जिणधम्मं अणुमोएज्जसु तप्पडिवन्ने भव्वजणे, एत्तियमेत्तेणवि होही दढकम्मविगमो, एवंति पडिवज्जिऊण गओ राया सट्ठाणंमि ।

निप्पच्चवायमउले भोगे भुंजेति पंचरूवेवि । सव्वत्थ जायकित्ती नरविक्कमनरवई ताहे ॥ १ ॥
सूरीवि धम्ममग्गे आरोविय भूरि भव्वपाणिगणे । सीसगणसंपरिवुडो नयराउ विहरिओ बाहिं ॥ २ ॥

---

सम्प्रति जिनधर्मम् । राज्ञा भणितं-भगवन् ! दृढमप्रमत्तोत्तमसत्त्वजनयोग्यो जिनधर्मः, कथमस्मादृशजनाः शक्नुवन्ति अनुपालयितुं ?, गुरुणा ज्ञातम्-अद्यापि निष्ठुरो मोहग्रन्थिः दृढनिबन्धना मिथ्यात्ववासना तीव्रानुबन्धो विषयप्रतिबन्धः श्रवणमात्राविशेषधर्मवार्ता, तस्माद्यथा भद्रकत्वमेवैतस्य इदानीमुचितमिति चिन्तयित्वोक्तः स-महाराज ! यद्येवं तर्हि पर्युपास्व सुसाधून् प्रशंस जिनधर्मम्, अनुमोदय तत्प्रतिपन्नान् भव्यजनान्, इयन्मात्रेणापि भविष्यति दृढकर्मविगमः, एवमिति प्रतिपद्य गतो राजा स्वस्थाने ।

निष्प्रत्यपायमतुलान् भोगान् भुनक्ति पञ्चरूपानपि । सर्वत्र जातकीर्तिः नरविक्रमनरपतिस्तदा ॥ १ ॥
सूरिरपि धर्ममार्गे आरोप्य भूरि भव्यप्राणिगणान् । शिष्यगणसंपरिवृतो नगराद्विहृतो बहिः ॥ २ ॥





For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



पडिबोहेंतो सूरोव्व भव्वकमलाइं वयणकिरणेहिं । कालक्कमेण पत्तो जयंतीनयरिं विहारेण ॥ ३ ॥
उग्गहमणुजाणाविय नयरीए बाहिं चंपगुज्जाणे । सद्धम्मकम्मउज्जुयजइजणसहिओ ठिओ भयवं ! ॥ ४ ॥
जाया पुरे पसिद्धी सिद्धंतविसारओ जहा सूरी । इह आगउत्ति ताहे वंदणवडियाए नयरिजणो ॥ ५ ॥
अंतेउरेण सहिओ हरिकरिरहजोहवूहपरिकिण्णो । नरसिंहभूमिनाहोवि आगओ सूरिपासंमि ॥ ६ ॥
सायरमह विणमंतुत्तिमंगमणिमउडलीढपयपीढं । पणमिय मुणिजणसहियं गुरुमुवविट्ठो धरणिवट्टे ॥ ७ ॥
संसारासारयागब्भा, तओ सद्धम्मदेसणा । गुरुणा काउमाढत्ता, मोहविद्धंसकारिणी ॥ ८ ॥
जहा—वलयासिंधुनिम्मग्गवडबीयं व दुल्लहं । को माणुसत्तं संपप्प, पमाएज्ज वियक्खणो ? ॥ ९ ॥

---

प्रतिबोधयन् सूर्य इव भव्यकमलानि वचनकिरणैः । कालक्रमेण प्राप्तो जयन्तीनगरीं विहारेण ॥ ३ ॥
अवग्रहमनुज्ञाप्य नगर्या बहिश्चम्पकोद्याने । सद्धर्मकर्मोद्यतयतिजनसहितः स्थितो भगवान् ॥ ४ ॥
जाता पुरे प्रसिद्धिः सिद्धान्तविशारदो यथा सूरिः । इहाऽऽगत इति तदा वन्दनप्रत्ययं नगरीजनः ॥ ५ ॥
अन्तःपुरेण सहितो हरिकरिरथयोधव्यूहपरिकीर्णः । नरसिंहभूमिनाथोऽप्यागतः सूरिपार्श्वे ॥ ६ ॥
साऽऽदरमथ विनमदुत्तमाङ्गमणिमुकुटलीढपादपीठम् । प्रणम्य मुनिजनसहितं गुरुमुपदिष्टो धरणीपृष्ठे ॥ ७ ॥
संसारासरातागर्भा ततः सद्धर्मदेशना । गुरुणा कर्तुमारब्धा मोहविध्वंसकारिणी ॥ ८ ॥
यथा—वलयासिन्धुनिमग्नवटबीजमिव दुर्लभम् । को मानुष्यत्वं सम्प्राप्य प्रमाद्येद् विचक्षणः ॥ ९ ॥

For Private and Personal Use Only

खणोऽवि नाउकम्मस्स, जाइ जेणाविणस्सरो । तेणेस मुच्छिओ लोओ, निरुव्विग्गो कहं भवे ? ॥ १० ॥
भवेज्ज कोऽवि किं धीमं, निद्दाकरणलालसो । मंदिरे हव्ववाहुग्गजालामालापलीविए ? ॥ ११ ॥
विएसे सुहगम्मेवि, सप्पाहेओ पयट्टइ । दुग्गेऽणंते भवट्ठाणे, जे न किंपि समीहए ॥ १२ ॥
हए से नियबुद्धीए, ठाणे ठाणे विसीयइ । अन्ने सोक्खे न पावेइ, सिद्धिसद्धम्मसंबले ॥ १३ ॥
बलेण तेण किं कज्जं ?, किं वा तेण धणेणवि ? । न जं सद्धम्ममग्गस्स, उवयारे निजुज्जइ ? ॥ १४ ॥
जएज्ज सव्वहा धम्मे, पमायपरिहारओ । जीवघायनिवित्तिमि, पवित्तिमि सुहेसु य ॥ १५ ॥
सुयाइमोहसंबद्धा, पावं कुव्वंति पाणिणो । तेण पावेण संतत्ता, निवडंति अहो गइं ॥ १६ ॥

---

क्षणोऽपि नायुःकर्मणो याति येनाविनश्वरः । तेनैष मूर्च्छितो लोको निरुद्विग्नः कथं भवेत् ? ॥ १० ॥
भवेत्कोऽपि किं धीमान् निद्राकरणलालसः । मन्दिरे हव्यवाहोग्रज्वालामालाप्रदीपिते ॥ ११ ॥
विदेशे सुखगम्येऽपि, सत्पाथेयः प्रवर्तते । दुर्गेऽनन्ते भवस्थाने, यो न किमपि समीहते ॥ १२ ॥
हतः स निजबुद्ध्या, स्थाने स्थाने विषीदति । अन्यानि सौख्यानि, न प्राप्नोति सिद्धिसद्धर्मशम्बलानि ॥ १३ ॥
बलेन तेन किं कार्यं ?, किं वा तेन धनेनापि । न यत् सद्धर्ममार्गस्य, उपकारे नियुज्यते ॥ १४ ॥
यतेत सर्वथा धर्मे, प्रमादपरिहारतः । जीवघातनिवृत्तौ, प्रवृत्तौ शुभेषु च ॥ १५ ॥
सुतादिमोहसंबद्धाः, पापं कुर्वन्ति प्राणिनः । तेन पापेन संतप्ता, निपतन्ति अधोगतिम् ॥ १६ ॥

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



गइंदा इव बज्झंति, जोणिलक्खेसु णेगसो । किं किं दुक्खं न पेक्खंति, ते तिक्खमवियक्खणा ? ॥ १७ ॥
तम्हा एवं नाउं जइधम्मं सव्वहा समायरह । एसो खु तिव्वदुहजलणसमणघणवरिसणसमो जं ॥ १८ ॥
सग्गापवग्गमंदिररोहणनिस्सेणिदंडसारिच्छो । कम्मुब्भडविडविविहाडणेकधारुक्कडकुहाडो ॥ १९ ॥
अचिरेण दिन्ननिस्सेससारनिस्सेयसो सुहत्थीहिं । अणुसरियव्वो सम्मं सुसत्तिजुत्तेहिं सत्तेहिं ॥ २० ॥
रन्ना भणियं भयवं ! जं तुब्भे वयह तं पवज्जामि । जाव नियरज्जभारप्पणेण सुत्थं करेमि जणं ॥ २१ ॥
गुरुणा भणियं जुत्तं एयं तुम्हं भवेक्कभीयाणं । निव्विग्घं कुणह लहुं चयह पमायं पयत्तेण ॥ २२ ॥
अह गुरुं पणमिऊण गओ राया सभवणं कयमणंतरकरणिज्जं आहूया मंतिणो कहिओ निययाभिप्पाओ अवगओ

---

गजेन्द्रा इव बध्यन्ते, योनिलक्षेष्वनेकशः । किं किं दुःखं न प्रेक्षन्ते, ते तीक्ष्णमविचक्षणाः ॥ १७ ॥
तस्मादेवं ज्ञात्वा यतिधर्मं सर्वथा समाचरत । एष खलु तीव्रदुःखज्वलनशमनघनवर्षणसमो यत् ॥ १८ ॥
स्वर्गापवर्गमन्दिररोहणनिश्रेणिदण्डसदृक्षः । कर्मोद्भटविटपिविघाटनैकधारोत्कटकुठारः ॥ १९ ॥
अचिरेण दत्तनिःशेषसारनिःश्रेयसः सुखार्थिभिः । अनुसर्तव्यः सम्यक् सुशक्तियुक्तैः सत्त्वैः ॥ २० ॥
राज्ञा भणितं–भगवन् ! यद् यूयं वदथ तत्प्रपद्ये । यावन्निजराज्यभारार्पणेन स्वस्थं करोमि जनम् ॥ २१ ॥
गुरुणा भणितं–युक्तमेतद् युष्माकं भवैकभीतानाम् । निर्विघ्नं कुरुत लघु त्यजत प्रमादं प्रयत्नेन ॥ २२ ॥
अथ गुरुं प्रणम्य गतो राजा स्वभवनं कृतमनन्तरकरणीयम्, आहूता मन्त्रिणः कथितो निजकाभिप्रायोऽवगतो मन्त्रिभिः,



For Private and Personal Use Only

मंतीहिं, एत्थंतरे समागया कुमारचारोवलंभनिमित्तं पुव्वपेसिया गूढपुरिसा, पणमिओ तेहिं राया, निवेइओ नयरनिग्गमाओ आरब्भ जयवद्धणपुररज्जलाभपज्जंतो सव्वो कुमारवुत्तंतो, तुट्ठो राया, दिन्नं च चिंतियाइरित्तं तेसिं वित्तं, पेसिया य कुमाराणयणनिमित्तं बुद्धिसागरपमुहा मंतिणो, अणवरयप्पयाणएहिं पत्ता य ते जयवद्धणपुरं, नरविक्कमोवि नाऊण तेसिमागमणं सपरियणो निग्गओ अभिमुहो, पवेसिया बहुविच्छड्डेणं, कया जणगनिव्विसेसा पडिवत्ती, पुट्ठा य उचियसमए आगमणप्पओजणं, निवेइयं तेहिं जहा—पव्वज्जापडिवज्जणाभिलासो राया, तुमंमि नियरज्जभरारोवणमणोरहो य देवस्स, अओ तुम्हाणयणनिमित्तं पेसियम्हि, इमं सोच्चा तक्खणमेव तत्थ रज्जे जेट्ठपुत्तं ठविऊण समग्गनियखंधावारसमेओ चलिओ नरविक्कमो समं मंतीहिं, कालक्कमेण पत्तो जयंतीनयरिपरिसरं, विन्नायतदागमणो दूरं संमुहमागओ नरसिंहनरवई समं

---

अत्रान्तरे समागताः कुमारचारोपलम्भनिमित्तं पूर्वप्रेषिता गूढपुरुषाः, प्रणमितस्तै राजा, निवेदितो नगरनिर्गमादारभ्य जयवर्धनपुरराज्यलाभपर्यन्तः सर्वः कुमारवृत्तान्तः, तुष्टो राजा, दत्तं च चिन्तितातिरिक्तं तेभ्यो वित्तं, प्रेषिताश्च कुमाराऽऽनयननिमित्तं बुद्धिसारप्रमुखा मन्त्रिणः, अनवरतप्रयाणकैः प्राप्ताश्च ते जयवर्धनपुरं, नरविक्रमोऽपि ज्ञात्वा तेषामागमनं सपरिजनो निर्गतोऽभिमुखः, प्रवेशिता महाविच्छर्देन, कृता जनकनिर्विशेषा प्रतिपत्तिः, पृष्टाश्चोचितसमये आगमनप्रयोजनं, निवेदितं तैर्यथा—प्रव्रज्याप्रतिपत्त्यभिलाषो राजा, त्वयि निजराज्यभाराऽऽरोपणमनोरथश्च देवस्य, अतस्तवाऽऽनयननिमित्तं प्रेषिता वयम्, इदं श्रुत्वा तत्क्षणमेव तत्र राज्ये ज्येष्ठपुत्रं स्थापयित्वा समग्रनिजस्कन्धावारसमेतश्चलितो नरविक्रमः समं मन्त्रिभिः, कालक्रमेण प्राप्तो जयन्तीनगरीपरिसरं, विज्ञाततदागमनो दूरं संमुखमागतो नरसिंहनरपतिः समं



For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir





चंपगमालाए देवीए, तओ दूराओ चेव नरविक्कमो जणगमागच्छंतं पेच्छिऊण हरिसुप्फुल्ललोयणो उयरिऊण करिवराओ मंतिजणसमेओ गंतूण निवडिओ चलणेसु जणयस्स जणणीए य, तेहिंवि चिरदंसणुप्पन्नाणंदसंदिरच्छेहिं गाढमालिंगिऊण निवेसिओ नियउच्छंगे, पुट्ठो य सरीरारोग्गयं, खणंतरे य पविट्ठाइं नियमंदिरं, पत्थावे पुट्ठो नरवइणा नरविक्कमो पुरीगमणकालाओ आरब्भ पुव्ववइयरं, साहिओ नरविक्कमेण समत्थोऽवि, एवं च चिरकालदंसणसमुब्भवसुहसंदोहमणुहवंताण गया कइवि वासरा, अन्नदियहे य भणिओ राइणा नरविक्कमो–पुत्त! पुव्वपुरिसपवित्तियवत्तिणीपरिपालणेण उस्सिंखलजणताडणेण य एत्तियं कालं जाव मए पालियं रज्जं, इयाणिं पुण ममाहिंतो सरीरबलेण य पुन्नपगरिसेण य विक्कमेण य समत्थो तुमं ता अंगीकरेसु रज्जमहाभरं, परिवालेसु पुव्वपवाहेण जणवयं, अहं पुण पुव्वपुरिसायरियं धम्ममग्गं अणुचरिस्सामि, कुमारेण भणियं–

---

चम्पकमालया देव्या, ततो दूरादेव **नरविक्रमो** जनकमागच्छन्तं प्रेक्ष्य हर्षोत्फुल्ललोचनोऽवतीर्य करिवरान्मन्त्रिजनसमेतो गत्वा निपतितश्चरणयोर्जनकस्य जनन्याश्च, ताभ्यामपि चिरदर्शनोत्पन्नानन्दस्यन्दमानाक्षाभ्यां गाढमालिङ्ग्य निवेशितो निजोत्सङ्गे, पृष्टश्च शरीराऽऽरोग्यताम्, क्षणान्तरे च प्रविष्टानि निजमन्दिरम्, प्रस्तावे पृष्टो नरपतिना **नरविक्रमः** पुरीगमनकालादारभ्य पूर्वव्यतिकरं, कथितो **नरविक्रमेण** समस्तोऽपि, एवं च चिरकालदर्शनसमुद्भवसुखसन्दोहमनुभवतां गताः कत्यपि वासराः, अन्यदिवसे च भणितो राज्ञा नरविक्रमः–पुत्र! पूर्वपुरुषप्रवर्तितवर्तनीपरिपालनेन उच्छृङ्खलजनताडनेन च इयन्तं कालं यावन्मया पालितं राज्यम्, इदानीं पुनः मच्छरीरबलेन च पुण्यप्रकर्षेण च विक्रमेण च समर्थस्त्वं, तस्मादङ्गीकुरु राज्यमहाभारं, परिपालय पूर्वप्रवाहेण जनपदम्, अहं पुनः पूर्वपुरुषाऽऽचरितं धर्ममार्गमनुचरिष्यामि । कुमारेण भणितं–

१२



For Private and Personal Use Only

ताय ! विरमह इमाओ अज्झवसायाओ, तुम्ह दंसणुस्सुओ चिरकालेण अहमिहमागओ, नवि य अज्जवि एस पत्थावो पत्थुय-वत्थुस्स, निवसह ताव सगेहे च्चिय कइवयवरिसाइं, राइणा भणियं—वच्छ ! किं न पेच्छसि जायविमलपलियसंगमुत्तिमंगं ? न वा निरूवेसि विसंठुलसयलट्ठिं सरीरलट्ठिं ?, न निरिक्खसि थेवपयासेवि चलंतिं दंतपंतिं ?, न विभावेसि वत्थुविलोयणाबलियं लोयणजुयलं ?, न कलयसि वलिपडलसंतयं सरीरत्तयं ?, न वा मुणसि समत्थकज्जासाहणजायसंदेहं देहं ?, एवं च पच्छिम-दिसावलंबि बिंबं व रविणो रयणीविराममलिणं मंडलं व ससिणो गाढजरत्तणपत्तं पत्तं व तरुणो जायसूरत्थमणसंभावणं वणं व कमलाण पब्भट्ठलट्ठपुव्वसोहं अप्पाणप्पाणमवलोइऊण कहं खणमवि गेहे वसामि ?, ता मुयसु पडिबंधं पडिवज्जसु मम वयणं भवसु धम्मसहाओ, तओ तायनिच्छयमुवलब्भ नरविक्कमो अणणुभूयपुव्वदुक्खक्कंतो वज्जताडिओ इव लेप्पघडिओ इव

---

तात ! विरमत अस्मादध्यवसायात्, युष्माकं दर्शनोत्सुकश्चिरकालेनाहमिहाऽऽगतः, नापि च अद्यापि एष प्रस्तावः प्रस्तुतवस्तुनः, निवसत तावत् स्वगेहे एव कतिपयवर्षाणि, राज्ञा भणितं—वत्स ! किं न प्रेक्षसे जातविमलपलितसङ्गमुत्तमाङ्गं ?, न वा निरूपयसे विसंस्थुलसकलास्थि शरीरयष्टिं ?, न निरीक्षसे स्तोकप्रयासेऽपि चलन्तीं दन्तपङ्क्तिम् ? न विभावयसे वस्तुविलोकनाऽबलिकं लोचनयुगलम् ? न कलयसि बलिपटलसन्ततां शरीरत्वचम् ? न वा जानासि, समस्तकार्यासाधनजातसन्देहं देहम् ? एवं च पश्चिम-दिगवलम्बिबिम्बमिव रवेः रजनीविराममलिनं मण्डलमिव शशिनो गाढजरत्त्वप्राप्तं पत्रमिव तरोः जातसूर्यास्तसंभावनं वनमिव कमलानां, प्रभ्रष्टलष्टपूर्वशोभम् आत्मनात्मानमवलोक्य कथं क्षणमपि गृहे वसामि ? तस्मान्मुञ्च प्रतिबन्धं प्रतिपद्यस्व मम वचनं भव धर्मसहायः, ततः तातनिश्चयमुपलभ्य नरविक्रमः अननुभूतपूर्वदुःखाऽऽक्रान्तो वज्रताडित इव लेप्यघटित इव



For Private and Personal Use Only

पत्थरुक्कीरिओ इव चित्तलिहिओ इव खणं ठाऊण बाढं रोविउं पवत्तो, समासासिओ य रन्ना कोमलवयणेहिं, पडिवन्नो य तेण महाकट्ठेण रज्जाभिसेओ, समागए य पसत्थवासरे सव्वसामग्गीए मंतिसामंतमित्तयप्पमुहमहाजणसमक्खं निवेसिओ नरविक्कमो नियसीहासणंमि, कओ अट्ठोत्तरकलससएणं महाविभूईए रायाभिसेओ, पणमिओ य रन्ना मंडलाहिवपुरपहाण-लोयपरियरिएण, भणिओ य सव्वायरेण वच्छ ! जइवि नयविणयसच्चाइगुणगणमणिमहोयही तुमं तहवि किंपि भणेज्जसि, एसा हि रायलच्छी अपडमंधत्तणं अमज्जपाणं मयजणणं सूरससहरकरप्पसरासज्झमंधयारं, ता तहाकहंपि वट्टिज्जासि जहा न मइलिज्जइ ससहरधवलं नियकुलं, जहा न खंडिज्जइ दूरप्परूढो पयावपायवो, जहा न पमिलायइ नीइकमलिणी, जहा न उस्सिखली हवंति खला, जहा न विरच्चं(ज्जं)ति पयइणो, जहा करभरेहिं न पीडिज्जइ जणवउत्ति, एवं च वट्टमाणस्स पुत्त !

---

प्रस्तरोत्कीर्ण इव चित्रलिखित इव क्षणं स्थित्वा बाढं रोदितुं प्रवृत्तः, समाश्वासितश्च राज्ञा कोमलवचनैः, प्रतिपन्नश्च तेन महाकष्टेन राज्याभिषेकः, समागते च प्रशस्तवासरे सर्वसामग्र्या मन्त्रिसामन्तमित्रकप्रमुखमहाजनसमक्षं निवेशितो नरविक्रमो निजकसिंहासने, कृतोऽष्टोत्तरकलशशतेन महाविभूत्या राज्याभिषेकः, प्रणमितश्च राज्ञा मण्डलाधिपपुरप्रधानलोकपरिकरितेन, भणितश्च सर्वादरेण—वत्स ! यद्यपि नयविनयसत्यादिगुणगणमणिमहोदधिस्त्वं तथापि किमपि भण्यसे, एषा हि राजलक्ष्मीरपटमन्धत्वम् अमद्यपानं मदजननं सूर्यशशधरकरप्रसरासाध्यमन्धकारं, तस्मात् तथाकथमपि वर्तेथा यथा न मलिनति शशधरधवलं निजकुलं, यथा न खण्ड्यते दूरप्ररूढः प्रतापपादपः, यथा न प्रम्लायते नीतिकमलीनी, यथा नोच्छृङ्खली भवन्ति खलाः यथा न विरज्यन्ते प्रकृतयः, यथा करभारैर्न पीड्यते जनपद इति, एवं च वर्तमानस्य पुत्र !



For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir





इहलोए इच्छिया होहिंति सयलवंछियत्थसिद्धीओ, किमंग पुण परलोएत्ति ?, एवं सिक्खविऊण नरसिंघनरवई पट्ठिओ समंतभद्दसूरिसमीवंमि, तओ पउणाविया नरविक्कमनरवइणा सहस्सवाहिणी सिबिगा से निक्खमणनिमित्तं, कयमज्जणोवयारो सव्वालंकारविभूसिओ समारूढो तत्थ नरसिंहनरवई, उक्खित्ता पवराभरणविभूसियसरीरेहिं सुइनेवत्थेहिं पवरपुरिसेहिं सिबिगा, तओ दिज्जंतेहिं महादाणेहिं वज्जंतेहिं चउव्विहाउज्जेहिं पढंतेहिं मागहसत्थेहिं गायंतेहिं गायणेहिं मंगलमुहरमुहीहिं नयरनारीहिं पणच्चिराहिं वारविलियाहिं महाविभूईए निग्गओ नयरीओ, पत्तो सूरिसगासं, ओयरिऊण सिबिगाओ तिपयाहिणपुव्वं पडिओ गुरुचलणेसु—

भालयलघडियकरसंपुडेण भणिओ गुरू तओ रण्णा । भयवं ! तायसु इण्हिं जिणिंददिक्खापयाणेण ॥ १ ॥

---

इह लोके इष्टा भविष्यन्ति सकलवाञ्छितार्थसिद्धयः, किमङ्ग ! पुनः परलोक इति ?, एवं शिक्षयित्वा **नरसिंहनरपतिः** प्रस्थितः **सामन्तभद्रसूरिसमीपे**, ततः प्रगुणिता **नरविक्रमनरपतिना** सहस्रवाहिनी शिबिका तस्य निष्क्रमणनिमित्तं, कृतमज्जनोपचारः सर्वालङ्कारविभूषितः समारूढस्तत्र**नरसिंहनरपतिः**, उत्क्षिप्ता प्रवराऽऽभरणविभूषितशरीरैः शुचिनेपथ्यैः प्रवरपुरुषैः शिबिका, ततो दीयमानैर्महादानैर्वाद्यमानैश्चतुर्विधाऽऽतोद्यैः पठद्भिर्मागधसार्थैर्गायद्भिर्गायकैर्मङ्गलमुखरमुखीभिर्नगरनारीभिःप्रनृत्यद्भिर्वारवनिताभिर्महाविभूत्या निर्गतो नगरीतः, प्राप्तः सूरिसकाशम्, अवतीर्य शिबिकातस्त्रिप्रदक्षिणापूर्वं पतितो गुरुचरणयोः—

भालतलघटितकरसम्पुटेन भणितो गुरुस्ततो राज्ञा । भगवंस्त्रायस्व इदानीं जिनेन्द्रदीक्षाप्रदानेन ॥ १ ॥



For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir





पडिवन्नंमि य गुरुणा पुव्वुत्तरदिसिसमुज्झियाहरणो । एगनियंसियवत्थो पसंतवड्ढंतसुहलेसो ॥ २ ॥
सिद्धंतभणियजुत्तीएँ तत्थ सूरीहिं गाहिओ सम्मं । पव्वज्जं निरवज्जं कम्ममहासेलवज्जसमं ॥ ३ ॥
भणिओ य जहा भद्दय ! एसा संसारसिंधुनावव्व । तुमए गहिया दिक्खा ता सम्मं उज्जमिज्जासु ॥ ४ ॥
मा काहिसि खणमेक्कंपि पावमित्तेहिं दुहनिमित्तेहिं । संसग्गि दुक्खेहिं विसयकसाएहिं सह भद्द ! ॥ ५ ॥
एवं चंकमियव्वं भोत्तव्वं एवमेव सइयव्वं । एवं भासेयव्वं इच्चाइ निवेइयं गुरुणा ॥ ६ ॥
संमं संपडिवज्जिय छट्ठट्ठमखमणकरणखीणंगो । अप्पडिबद्धविहारं विहरिय गामागराईसु ॥ ७ ॥
अहिगयजइधम्मविही विहियाणुट्ठाणनिच्चतल्लिच्छो । लच्छिव्व संजमं रक्खिऊण निम्महियकम्मंसो ॥ ८ ॥

---

प्रतिपन्ने च गुरुणा पूर्वोत्तरदिशि समुज्झिताऽऽभरणः । एकनिवसितवस्त्रः प्रशान्तवर्धमानशुभलेश्यः ॥ २ ॥
सिद्धान्तभणितयुक्त्या तत्र सूरिभिर्ग्राहितः सम्यक् । प्रव्रज्यां निरवद्यां कर्ममहाशैलवज्रसमम् ॥ ३ ॥
भणितश्च यथा भद्रक ! एषा संसारसिन्धुनौरिव । त्वया गृहीता दीक्षा तस्मात् सम्यगुद्यच्छेः ॥ ४ ॥
मा करिष्यसि क्षणमेकमपि पापमित्रैर्दुःखनिमित्तैः । संसर्गं दुःखैर्विषयकषायैः सह भद्र ! ॥ ५ ॥
एवं चङ्क्रमितव्यं भोक्तव्यमेवमेव शयितव्यम् । एवं भाषितव्यमित्यादि निवेदितं गुरुणा ॥ ६ ॥
सम्यक् संप्रतिपद्य षष्ठाष्टमक्षपणकरणक्षीणाङ्गः । अप्रतिबद्धविहारं विहृत्य ग्रामाकरादिषु ॥ ७ ॥
अधिगतयतिधर्मविधिर्विहितानुष्ठाननित्यतल्लिप्सः[तत्परः] । लक्ष्मीरिव संयमं रक्षित्वा निर्मथितकर्मांशः ॥ ८ ॥



For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir





सो मोक्खपयं पत्तो नरविक्कमनरवईवि तस्स सुओ । उवभुंजिय रज्जदुगं नियपयए ठविय पुत्तं च ॥ ९ ॥
पावियसम्मत्तगुणो पज्जंते पालिऊण पवज्जं । कयदुक्करतवचरणो महिंदकप्पे सुरो जाओ ॥ १० ॥
इय नंदण ! नरपुंगव ! चरियं एएसिं पुरिससीहाण । तुज्झ मए परिकहियं जं तुमए पुच्छिअं आसि ॥ ११ ॥
सोऊण इमं तुममवि नरिंद ! धम्मे तहुज्जमं कुणसु । जह उत्तिमपुरिसाणं अचिरेण निदंसणं होसि ॥ १२ ॥

---

स मोक्षपदं प्राप्तो नरविक्रमनरपतिरपि तस्य सुतः । उपभुज्य राज्यद्विकं निजकपदे स्थापयित्वा पुत्रं च ॥ ९ ॥
प्राप्तसम्यक्त्वगुणः पर्यन्ते पालयित्वा प्रव्रज्याम् । कृतदुष्करतपश्चरणो माहेन्द्रकल्पे सुरो जातः ॥ १० ॥
इति नन्दन ! नरपुङ्गव ! चरित्रमेतेषां पुरुषसिंहानाम् । तुभ्यं मया परिकथितं यत्त्वया पृष्टमासीत् ॥ ११ ॥
श्रुत्वेदं त्वमपि नरेन्द्र ! धर्मे तथोद्यमं कुरु । यथोत्तमपुरुषाणामचिरेण निदर्शनं भवति ॥ १२ ॥



For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir





# प्रशस्तिः-

श्रीमान् नैकगुणालयः सुविदितः पूर्णेन्दुचञ्चद्यशा, आसीत्तीर्थसमुद्धृतिव्रतपरः शास्त्राब्धिपारङ्गतः ।
आबाल्यामलवर्णिवर्यनियमः शिष्यालिसंशोभितः, प्रातःसंस्मरणीय इष्टसुरवच्छ्रीनेमिसूरीश्वरः ॥ १ ॥
तत्पट्टाऽऽभरणं प्रशान्तिनिलयः सच्छासनोन्नायको, गीतार्थः परमो विराजतितरां विज्ञानसूरीश्वरः ।
तत्पादाम्बुजयुग्मभृङ्गहृदयः सिद्धान्तिताऽऽचान्तहृद् , विज्ञः प्राकृतसंस्कृते विजयते कस्तूरसूरीश्वरः ॥ २ ॥
शिष्यस्तस्य कवीश्वरो विजयते पन्न्यासताऽलङ्कृतः, सद्धर्मामृतवारिदो भवितरौ श्रीमान् यशोभद्रकः ।
शान्तस्वान्त उदारबुद्धिविभवो वैराग्यभाग्योदितः, स्वीयाचार्यपदारविन्दमकरन्दाऽऽस्वादनेन्दिन्दिरः ॥ ३ ॥
शिष्यस्तस्य शुभङ्करस्तनुमतां श्रेयोऽर्थिनां तुष्टये, चारु श्रीनरविक्रमस्य चरितं सच्छायमाधान्मुनिः ।
पूज्यश्रीगुणचन्द्रसूरिरचितादाकृष्य सत्प्राकृते, श्रीमद्वीरचरित्रतोऽतिमहतः सिन्धोरिवाम्भोऽम्बुदः ॥ ४ ॥

**इति संस्कृतानुवादसमेतं श्रीनरविक्रमचरित्रं समाप्तम् ।**



For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



॥१४०॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

For Private and Personal Use Only



श्री कीशा प्रिन्टरी, रतनपोळ अहमदावाद